No. 5.]

THE

VIZIANAGRAM SANSKRIT SERIES

UNDER THE SUPERINTENDENCE OF

ARTHUR VENIS M. A. Oxon.

PRINCIPAL, SANSKRIT COLLEGE, BENARES.

THE

PANCHAPADIKAVIVARANA

OF

PRAKASATMAN

WITH EXTRACTS FROM THE

TATTVADIPANA AND BHAVAPRAKASIKA

EDITED BY

RAMASASTRI BHAGAVATACHARYA,

ASSISTANT PROFESSOR, SANSKRIT COLLEGE, BENARES.

PART II.

SANSKRIT TEXT.

PRINTED, PUBLISHED AND SOLD BY

E. J. LAZARUS & Co., BENARES.

MAY BE HAD FROM GANESH DAS AND CO, CHOWK, BENARES:

JAYESTHARAM MUKUNDJI AND CO, BOMBAY·

OTTO HARRASSOWITZ AND M. SPIRGATIS LEIPZIG:

LUZAC AND CO., LONDON.

1892.

पञ्चपादिकाविवरणम् ।

श्रीप्रकाशात्मयतिविरचितम् ।

विवरणतत्त्वदीपनविवरणभावप्रकाशिकाभ्यां व्याख्या-
नाभ्यां सङ्कलितया टिप्पण्या सहितम् ।

काशीस्थराजकीयसंस्कृतपाठशालायामध्यापकेन
श्रीरामशास्त्रिभागवताचार्येण संशोधितम् ।

काश्याम् ।

ई. जे. लाजरसकम्पन्याख्येन स्वमुद्रालये मुद्रितम् ।

संवत् १९४८ ।

॥ श्रीः ॥

॥ भूमिका ॥

पञ्चपादिकाविवरणाभिधोऽयं निबन्धोऽनन्यानुभवपूज्यपादशिष्यैः परमहंसपरिव्राजकाचार्यैः प्रकाशानुभवापरनामधेयै[1]र्ब्रह्ममीमांसाशास्त्रस्य सारभूतानर्थांश्चतुःसूचीव्याख्यान एव प्रतिपादयद्भिः श्रीप्रकाशात्मयतिभिः[2] प्रणीतः। सत्स्वप्यनेकेषु पञ्चपादिकाव्याख्यानेषु[3] अमुमेव निबन्धमुत्तमत्वेनावधार्य वेदान्तिनः स्वनिबन्धेषु[4] प्रमाणयन्ति ॥

सोऽयं निबन्धोत्तमः पठनपाठनादिषु विरलप्रचारत्वेन तथा विलुप्तो यदाधुनिका निबन्धेषु "भाष्यटीकाविवरणं" "पञ्चपादिकाविवरणं" वेति दृष्ट्वा किमिदं विवरणं नाम वेदान्तग्रन्थेष्वेव वान्यच्च वेति विकल्पयन्तीति वेदान्तरत्नमञ्जूषामिव निगूढं सम्पाद्य प्रकाशयितुं प्रवृत्ताः सम्पादकमहाशयाः ॥

यतयः स्वीयनिबन्धेषु स्वदेशकालादिकं प्रायो नैव निरूपितवन्त इति भगवतः श्रीप्रकाशात्मयतेः देशकालौ सम्यङ् न ज्ञायेते तथाप्यनुमीयते यद्विद्यारण्यसमयात्[5] पूर्वं तस्य स्थितिरासीदिति। यतो माधवाचार्येण सर्वदर्शनसंग्रहान्ते प्रतिज्ञातं खलु "इतः परं सर्वदर्शनशिरोमणिभूतं शाङ्करदर्शन-

---

(१) वाराणसीस्थराजकीयसंस्कृतपाठशालीयवेदान्तपुस्तकेषु ४ संख्यकपुस्तके। "श्रीपरमहंसपरिव्राजकाचार्यानन्दानन्यानुभवपूज्यपादशिष्यप्रकाशानुभवभगवतः कृतौ पञ्चपादिकाविवरणे" इति ॥

(२) विवरणारम्भे। प्रकाशात्मा यतिः सम्यक् प्राप्तविद्याशुशुत्सया। यथाश्रुतं यथाशक्ति व्याख्यास्ये पञ्चपादिकाम् ॥ तत्त्वदीपनेऽप्येवमेव ॥

(३) अमलानन्दकृतं पञ्चपादिकादर्पणं विद्यासागरकृता पञ्चपादिकाटीका च। एकं तद्व्याख्यानपुस्तकमुक्तपाठशालायां वर्तते किन्त्वाद्यन्तहीनत्वान्न निश्चितं भवति किं तदिति ॥

(४) गोविन्दानन्दो भाष्यरत्नप्रभायां "तदुक्तं प्रकाशात्मश्रीचरणैः" एशियाटिक्सोसाइटीमुद्रितपुस्तके ३ पृ॰ द्रष्टव्यम् ॥

अप्पयदीक्षिता अपि सिद्धान्तलेशसंग्रहे। "स्वप्रपञ्चविपरीतप्रमात्रादिज्ञानसाधनस्यान्तःकरणस्येत्यादिपञ्चपादिकाविवरणग्रन्थेनापि तथा प्रतिपादनात्" अस्यां श्रेण्यां मुद्रिते पुस्तके ६७ पृ॰ द्रष्टव्यम्।

(५) तल्लिखितताम्रपत्रे १३१३ शककालः। आनन्दाश्रमसंस्कृतसीरीज २ संख्या द्रष्टव्या।

मन्यच लिखितमित्यचोपेक्षितमिति" । ततः परमसौ संन्यस्तो विद्यारण्ययोगीत्याख्यया प्रसिद्धो विवरणप्रमेयसंग्रहाख्यं निबन्धं विनिरमादिति ॥

पञ्चपादिकाविवरणस्य प्रसन्नगम्भीरतया सुबोधार्थमखण्डानुभूतिशिष्याखण्डानन्दमुनिकृतविवरणतत्त्वदीपनग्रन्थात् जगन्नाथाश्रमपूज्यपादशिष्यनृसिंहाश्रमकृतविवरणभावप्रकाशिकाग्रन्थाच्च क्वाचित्की लघ्वी टिप्पण्यपि सङ्कलिता ॥

अनयोर्निबन्धयोः पूर्वपरभावचिन्तायां भावप्रकाशिकाग्रन्थे "ऽयमेवार्थस्तत्त्वदीपनकृतामभिप्रेतः" इत्युपलब्ध्या भावप्रकाशिकाकर्तुर्नृसिंहाश्रमस्य समयात् [१] पूर्वं तत्त्वदीपनमासीदिति सिद्धम् । किन्तु तत्त्वदीपनं कस्मात् परमिति विचारे विवरणप्रमेयसंग्रहेणार्थतः साम्यादनुमितं भवति यदेकं दृष्ट्वा एकस्य निर्माणं तत्र च तत्त्वदीपने विद्यारण्यादर्वाचीनानामाचार्याणामनुल्लेखात् विवरणप्रमेयसंग्रहे तत्त्वदीपनप्रदर्शितानां भास्करादीनां मतानां चोल्लेखदर्शनात् तत्त्वदीपने तत्र तत्र निष्कृष्टार्थे "इति प्रमेय"मित्याकारेण दर्शित इति तत्त्वदीपनग्रन्थाद्विवरणप्रमेयसंग्रहः संग्रहत्वान्नवीन इति कथनं तु साहसमिवाभातीति तत्पूर्वपरभावे प्रमाणं मृग्यमेव ॥

अस्य पुस्तकस्य संशोधनार्थं पञ्चादर्शपुस्तकानि सम्पादितानि । तत्र पुस्तकत्रयं वाराणसीस्थराजकीयसंस्कृतपाठशालीयपुस्तकालयात् तत्रोभयं परिशोधितं देवाक्षरं वाराणसेयं तत्रैकं वैक्रमसंवत्सरे १६२५ लिखितम् । तृतीयं तालपत्रस्थं वङ्गाक्षरं प्राचीनत्वाद्दुष्पठमिति तत्रत्यपुस्तकालयाध्यक्षस्य पं० विन्ध्येश्वरीप्रसादशर्मणः साहाय्येन तस्मादुपयोगः सम्पादितः । अन्यच्चोक्तपाठशालाप्रधानाध्यक्षाणां पुस्तकं तत् प्रायो वर्षाणां पञ्चशत्याः प्राचीनं जीर्णं पाठभेदे क्वचिद् दर्शनमेवार्हति । अपरं महामहोपाध्यायपण्डितश्रीगङ्गाधरशास्त्रिभिः प्रदत्तं १८२२ संवत्सरे लिखितं परिशुद्धम् ॥

तत्त्वदीपनपुस्तकं भावप्रकाशिकापुस्तकं च वाराणसीस्थविद्वद्वरपण्डितश्रीविभवरामशर्मभिः प्रदत्तं प्राचीनं परिशोधितं च ययोः प्रारम्भपरिसमाप्तिवाक्यानि प्रदर्श्यन्ते ॥

यथा ।

(१) तत्कृततत्त्वविवेकस्य समाप्तिः वैक्रमीय १६०४ वर्षे पुरुषोत्तमपुरे जाता ।

तत्त्वदीपनम्

यदबोधसमुद्भूतं यद्बोधात् प्रविलीयते ।
नामरूपात्मकं विश्वं तस्मै पूर्णात्मने नमः ॥ १ ॥

जटाजूटं बिभ्रत् क्वचिदपरभागे भृतकच-
स्तथैकस्मिन् भागे भसितमपरत्राग्रघुसृणः ।
फणीन्द्रं कस्मिंश्चिन्मणिगणधरोऽन्यत्र भगवान्
गिरीशः श्रेयो नः प्रदिशतु शिवामिश्रितवपुः ॥ २ ॥

दिक्कूलंकषकीर्तिफेनविशदप्रोद्दामविद्याजल-
भ्राम्यद्वाङ्मयतुङ्गभङ्गविलसत्तीर्थप्रभेदास्पदम् ।
वादिव्रातकथाप्रसङ्गविसर[1]तर्काश्मसारोज्ज्वलं
वन्दे सर्वमुनीन्द्रसेव्यमनिशं श्रीबोधपृथ्वीधरम् ॥ ३ ॥

वादिवारणसन्दोहप्रभञ्जनविशारदम् ।
श्रीमदानन्दशैलाङ्कपञ्चास्यं सततं भजे ॥ ४ ॥

विमलमदजलौघद्योतमानोरुगण्ड-
स्थलनिकटनिकुञ्जद्भ्राजमानालिमालः ।
जयति पृथुलकण्ठाबद्धमालेन्द्रनीला-
वलिरिव सुरसिद्धाराधितो विघ्नराजः ॥ ५ ॥

आधारपङ्केरुहमध्यसंस्था मृणालसूत्राकृतिरप्रमेया ।
शीर्षादिभेदस्थितसर्ववर्णा जिह्वाङ्गणे नृत्यतु वागजस्रम् ॥ ६ ॥

नानाविधनिबन्धाह्वप्रसूनरसमादरात् ।
निबन्धमधु संगृह्य क्रियते तत्त्वदीपनम् ॥ ७ ॥

पञ्चपादिकां व्याचिख्यासुर्ग्रन्थकरणयोग्यतार्थं परां देवतां[2] प्रार्थयते आद्यश्लोकेन । यमेवैष वृणुते तेन लभ्य इतीश्वराधीनत्वं विद्याया लक्ष्यते

(१) विलसत्-पा॰ संस्कृतपाठशालीयपु॰ ।
(२) परदेवतां-पा॰ सं॰ पु॰ ।

विदुषश्च ग्रन्थकरणाधिकारात् परदेवताप्रार्थनमुचितम् । अत्रैवाक्षरयोजना । सते नम इति सम्बन्धः(१) ॥

समाप्तिवाक्यम् ।

ज्ञाने सत्यपि प्रमातृत्वादिकं दृष्टमित्याशङ्क्य तात्पर्यमाह । अद्वितीयेति । सकलशास्त्रव्यवस्थासिद्ध्यर्थं सोपाधिकं निरुपाधिकं च रूपमनूदितमिति द्रष्टव्यम् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्याखण्डानुभूतिपूज्यपादशिष्येणाखण्डानन्दमुनिना विरचिते विवरणतत्त्वदीपने समन्वयसूत्र(२) समाप्तम् । समाप्तं नवमवर्णकम् ॥

भावप्रकाशिका

यत्सत्त्वचैतन्यसुखानुलिप्तं विश्वं हितं सत् स्फुरतीव भाति ।
स मां निरस्ताखिलभेद आत्मा पायादबोधाद्विपदो नृसिंहः ॥ १ ॥
श्रीमद्गुरुपदद्वन्द्वमद्वैतात्मप्रसिद्धये ।
हृदये सदयं भूयान्निगूढात्माञ्जनं परम् ॥ २ ॥
श्रीमद्गुरुकृपालेशादद्वैतब्रह्मगोचरे ।
क्वचित् क्वचिद्विवरणे गूढो भावः प्रकाश्यते ॥ ३ ॥

निर्विशेषब्रह्मप्रतिपादकग्रन्थकरणस्य तत्प्रतिपत्तिं विनायोगात् तस्याश्च यमेवैशं (ष) वृणुते तेन लभ्य इत्यादि शास्त्रा (स्त्रा) त् परमात्मप्रसादाधीनत्वप्रतीतेर्विषयप्रयोजने दर्शयन् परमात्मानं नमस्करोति । पालन इति ॥

नवमवर्णके ।

प्रस्तोष्यमाणवर्णकस्यानन्तरवर्णकादपुनरुक्तमर्थमाह । लोके पदानामित्यादिना । अत्र च ग्रन्थकारस्याशयोऽतिस्पष्ट इति न किञ्चिल्लिख्यते ॥

---

(१) सम्बन्ध-इति नास्ति सं॰ पु॰ ।
(२) चतुर्थसूत्रम्-पा॰ सं॰ पु॰ ।

अहं कियान् क्वाप्यमनःश्रुतीनां विहारदूरं परमात्मतत्त्वम् ।
अहो गुरूणां चरणारविन्दप्रसादभाजां सुलभं समस्तम् ॥

कृतिरियमनवद्या नैव वासीन्न जाने
मम हृदयनिविष्टो यस्तमोदूरचारी ।
हितमहितमथान्यत्कारयन्मां य आस्ते
नरमृगवपुरीशो दृग्भिरेनां पुनातु ॥

यदि च विकृतिरस्याल्पीयसी भूयसी वा
कियदपि मम नैनः संस्तवो वा गुणेन ।
अपि तु भवत एतो किं यद्दयस्तल्लोके
नरमृगवपुषस्ते यत्र वेदाः प्रमाणम् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीजगन्नाथाश्रमपूज्यपादशिष्यश्रीमन्नृसिंहाश्रममुनिविरचितायां पञ्चपादिकाविवरणभावप्रकाशिकायां समन्वयसूत्रविचारः समाप्तः । समाप्ता विवरणटिप्पणी ॥

वाराणसीस्थराजकीयसंस्कृतपाठशालायाम्	विन्ध्येश्वरीप्रसादशर्मा द्विवेदोपाख्यः ।

अथ शुद्धिपत्रम् ।

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
१६	१०	दर्शनाचाप्य	दर्शनात् नाप्य
१७	१९	ऽविद्यासम्भवति	ऽविद्या सम्भवति
१८	२२	प्रमाणामेवहि	प्रमाणमेव हि
२०	१३	कथा–	कथा
२०	१५	वाद इति ।	वाद इति
२१	६	रजतमऽयं	रजतमयं
२१	१४	ज्ञानेपिसंसर्ग	ज्ञानेपि संसर्ग
२६	१६	स्मरामा	स्मरामो
२७	७	दोषो पहिते	दोषोपहिते
२७	१९	दायमानेषु	दीयमानेषु
२८	६	ख्यात्यन्तरा	ख्यात्यन्तर
२८	८	कथम् ।	कथम्
२८	१२	हितोपि	वहितोपि
२९	२८	संयोगादिदं मात्र	संयोगादिदंमात्र
३०	१५	ज्ञानोत्तरो	ज्ञानान्तरो
३१	५	पारोक्ष्य	पारोक्ष्य
३१	९	कल्पनीयं	कल्पनीयम्
३१	१७	मायास्वाश्रय	माया स्वाश्रय
३१	२८	अनयो	‖ अनयो
३२	७	मायायां	मायायाम्
३३	१७	वन्यदाप्रवृत्ति	वन्यदा प्रवृत्ति
३४	१७	परत्रपरा	परत्र परा
३४	२१	परत्रपरा	परत्र परा
३४	२३	चैत्यन्य	चैतन्य
३४	२६	परत्रपरा	परत्र परा
३६	८	विशिषे	विशेषे
४०	४	बाधापेक्षा	बाधापेक्षया
४०	१९	दृष्टुर्दोषः	द्रष्टुर्दोषः
४१	१३	प्रदापादौ	प्रदीपादौ
४१	२४	प्रसिद्ध	प्रसिद्धि
४३	२२	विरोधात्	ऽविरोधात्
४५	६	प्रतिविम्ब *	प्रतिबिम्ब
४६	२६	मीमांसक	मीमांसकं
४८	१६	भासिस्व	भासि स्व
४८	२०	किं	किं–
४८	२१	पि शब्दो	पिशब्दो
४८	२४	भास एवावभास एवा	भास एवा
५०	१०	विम्बपुरत्व	बिम्बपुरस्त्व
५१	१८	त्यात्मनात्म	त्यात्मानात्म
५३	१९	तन्वता न स्यात्	तन्वता स्यात्
५३	२१	चारादित्या	चारादादित्या
५४	९	ष्टापूर्वं	ष्टा पूर्वं
५५	३	द्रष्ट	द्रष्टृ
५८	२४	मतीतर	मतीततर
५८	२५	त ैव	तत्रैव
५९	९	मयः पिण्ड	मयःपिण्ड
“	“	मुखस्याऽयात्र	मुखस्याप्यात्र
६०	हेडिंग	प्रतिविम्ब	प्रतिबिम्ब
६०	२५	आडो देःऽना	आडो दोऽना
६१	१८	ऽनिन्द	ऽनिद
६१	२४	अनिन्द	अनिद
६४	२१	प्रात	प्रति
६५	हेडिंग	प्रतिविम्बत्वा	प्रतिबिम्बत्वो
६५	७	सर्वज्ञाता	सर्वज्ञता
६६	११	निर्विकल्प	निर्विकल्प
६७	१७	परिहार	परिहारा
७२	६	चैतन्यमपि चैतन्य	चैतन्य
७२	११	परिछिचे	परिच्छिन्ने
७२	२२	प्रदीपप्रभा	प्रदीपप्रभ
७४	५	मपह्नुयत	मपह्नूयत
७४	१४	आकारमेकं	न्याकारमेकं
७४	२२	न स्यात् ।	न स्यात्
७५	१४	रितिरे	रितरे
७६	३	प्रभाववर्त्त	प्रभावद्वृत्त
७६	७	संसारास्था-	संसारावस्था-
७७	१८	त्मश्रय	त्माश्रय
७७	१९	संविदत्तर	संविदन्तर
७८	१३	मित्युनु	मित्यनु
७८	२२	सकत्कर्तुः	सकत्कर्तुः
७८	२२	कतृत्वे	कर्तृत्वे
८०	१७	कारणाचि	कारणानि

* एवमग्रेपि विम्बस्थाने 'बिम्ब' इति बोध्यम् ।

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
८०	१७	चिष्पन्न	निष्पन्न
८१	१७	शक्तो	शक्तो
८२	१२	सहकारि सव्य	सहकारिसव्य
८३	१४	नाप	नापि
८३	२३	त्यद्यन्ते ।	त्यद्यन्ते
८३	२६	मद्वदेतास्त्स	मद्वदेतत्सि
८४	४	गमात्म	गमात्म
८४	१५	तत्त्वेनेयं	तत्त्वे नेयं
८६	१०	निरवयस्य	निरवयवस्य
८७	हेडिंग	ज्ञानान	ज्ञानानि
८७	७	क ङ्क्षया	काङ्क्षाया
८७	६	भावात् ।	भावात्
८७	२५	विद्यावि	विद्याव
८८	२	संपति	संप्रति
८९	१६	छया	छाया
९०	१३	च्विपि	च्वपि
९०	२०	द्विविवेको	द्विवेको
९१	१६	शरारा	शरीरा
९४	५	नार्थपत्त्या	नार्थापत्त्या
९४	११	नैकान्ति	ऽनैकान्ति
९५	२१	कर्त्तुर्भा	कर्त्तुर्भा
९५	२६	विविरोधा	विरोधा
९६	२३	पेच्च इत्याह	पेच्चेत्याह
१०४	९	कारिणा	कारणा
१०४	६	पारोच्च	परोच्च
१०८	१६	विशिष्टानन्व	विशिष्टान्व
११०	१४	कृतः	कृतः ।
११२	२	दान्य	दीन्य
११२	१८	ज्ञानकर्म	ज्ञानकर्म-
११२	२६	गम्यत	गम्यते
"	"	च्छयं	च्छेयं
११६	२६	तीति कर्त्तव्य	तीतिकर्त्तव्य
११७	६	विधः	विधिः
११७	७	सिद्धान्ता	सिद्धान्ती
११७	२१	देयताविधिं	देयता विधिं
११८	१२	इति ।	इति
११८	२८	प्रत्यक्षादाना	प्रत्यक्षादीना
"	"	परोक्षा	परोक्ष
११९	१५	विधेः ।	विधेः
११९	२२	कायस्य	काय्यस्य
११९	२५	दृष्ट	दृष्ट
१२०	१४	कल्प्यने	कल्पने
१२२	८	साधनत्वात् ।	साधनत्वात्
१२४	४	न कारः	नकारः

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
१२५	२४	पादय	पादाय
१२७	२३	किचो	किञ्चो
१२८	१६	नुपपत्तेः ।	नुपपत्तेः
१२९	८	प्रताय	प्रतीय
१३१	६	विवक्षादर्शिता	विवक्षा दर्शिता
१३२	२५	लाके	लोके
१३३	२	च्चाभयं	च्चोभयं
१३४	२	मन्यममस्य	मन्यतमस्य
१३५	२२	ऽभिधायते	ऽभिधीयते
१३६	२२	विधाय	विधीय
१३६	२३	घातानिष्वि	घातादिष्वि
१३८	१६	श्रवणा	श्रवणा
१४०	१६	पाठे	पीठे
१४१	२०	देत्तदाह	देत्तदाह
१४१	२३	प्रयोजायितृ	प्रयोजयितृ
१४२	२५	संस्कार्यांक्ष	संस्कार्यक्षि
१४४	१	मुपाठायते	मुपादीयते
१४४	१०	प्रतिपादिक	प्रतिपादक
१४५	३	ऽध्यापन	ऽध्यापन
१४५	६	पायत्वपी	पायत्वेपी
१४५	१६	संप्रत्ति	संपत्ति
१४६	१	कारणाः	कारिणाः
१४६	११	दधिकार	दधिकारि
१४६	२०	निवर्त्तयितु	निवर्त्तयितुं
१४६	२६	ध्यापाय	ध्यापयि
१४७	४	सत्युपप	सत्युप
१४७	५	किंतूग-	किंतूपग-
१४७	६	स्यव	स्यैव
१४९	१	वोपनीयी	वोपनयी
१५१	४	फलभाक्तृ	फलभोक्तृ
१५१	२४	समर्थ्या	सामर्थ्या
१५२	१५	नुबपत्त	नुपपत्ते
१५२	१८	ऽप्यस्ती-	ऽप्यभ्यस्ती-
१५२	१६	दर्शनाभ्यच	दर्शनाच
१५३	७	भावात् दव-	भावादव-
१५३	८	फलपेक्ष	फलापेक्ष
१५३	१६	विधि	विधि
१५४	१	न तु	ननु
१५४	२७	कार्याप	कार्याय
१५५	१४	जिज्ञासायोः	जिज्ञासयोः
१५५	२४	ऽन्यार्थास्वेन	ऽन्यार्थत्वेन
१५६	८	पत्तेति	पेत्तेति
"	"	परिशेषपरिशेषात्	परिशेषात्
१५६	१२	नोत्तरेत्तर	नोत्तरोत्तर

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
१५६	१४	प्रामाणा	प्रमाणा
१५७	१४	संस्कार	संस्कारा
१५७	१६	चत्वारिंश	चत्वारिंश
१५८	१६	मरणता	करणता
"	"	नेति कर्त्त	नेतिकर्त्त
१५८	२३	मात्रत्वा	मात्रत्वा-
१५८	२४	रुद्धेशात्वा	रुद्धेश्यत्वा
१५६	२४	तदुक्तार्थ	तदुक्तार्था
१६०	१७	न्यान्यः	नान्यः
१६१	४	प्रणवता	प्रवणता
१६२	६	न्यसेत्याद	न्यसेत्याद
१६२	१०	विहित्वा	विहितत्वा
१६२	१४	कल्मषस्या	कल्मषस्य
१६४	१०	विधानत्	विधानात्
१६४	१४	नान्यैर्दवै	नान्यैर्दवै
१६४	१७	धर्मै	धर्मैः
१६४	१८	तद्धर्मणां	तद्धर्मणां
१६६	१८	ऽनुरूपि	निरूपि
१६७	११	वृत्तव्यां	वृत्तां
१६८	१६	सत्त्वि	सत्त्वि
१७०	१४	इत्यतः	इति । अतः
१७१	२	च्वातुर्मस्या	चातुर्मास्या
"	"	तत्रव	तत्रैव
१७१	१७	तस्य	तस्या
१७३	३	प्रधान्येन	प्राधान्येन
१७५	१६	केनारम्भः । क्रियते	केनारम्भः क्रियते
१७६	७	जिज्ञासा	जिज्ञासा
१७६	६	व्यमस्त्विति	व्यमस्त्विति
१७७	२५	वस्तुकर्म	वस्तु कर्म
१७६	३	न्याया विष	न्यायविष
१७६	४	सम्भावाना	सम्भावना
१८१	१०	विरुरोधिषु	विरोधिषु
१८१	१५	प्रयोगान्तरेष्व	प्रयोगान्तरेष्व-
१८२	१७	ममुखेन	नमुखेन
१८४	८	समार्थ्या	सामर्थ्या
१८४	२१	तत्रोपय	तत्रोपप
१८५	१६	ऽनुगम्यते ।	ऽनुगम्यते
१८५	२३	वार्थनु	वार्थानु
१८६	५	निर्णात	निर्णीत
"	"	जिज्ञास्य	जिज्ञास्य-
"	२२	रूपानर्णा	रूपनिर्णा
"	२५	प्राणि	प्रामाणि
"	२६	जिज्ञासा	जिज्ञासा
१८७	४	समाधत्त	समाधत्ते
१८७	१८	वैदकैः	वैदिकैः
१८६	२४	कल्पकं	ल्पकं
१६१	१	साद	सादि
१६३	१५	चैतेन्य	चैतन्य
१६४	२२	क्रमकरि	क्रमकारि
१६५	२२	प्रदापा	प्रदीपा
१६६	२७	अपत्तन्त	अपेक्षन्त
२००	७	गात् मान	गात्मान
२००	२५	घटाकाशमिति	घटाकाशमिति ।
२०२	६	नैवताव	नैताव
२०२	२८	यते	र्यते
२०३	२४	कर्तृत्वभावे	कर्तृत्वाभावे
२०४	१७	प्राक्क्तनः	प्राक्तनः
२०५	४	धिकारण	धिकरण
२०७	८	व्याघो	व्याघोऽ
२०८	१४	प्रशान्त	प्रक्रान्त
२०६	२३	सर्वज्ञाता	सर्वज्ञात
२१०	६	ऽपरिभाव	परिभाव
२१२	२०	आहोस्वि	आहोस्वि
२१४	७	वाना मपि	वानामपि
२१५	१०	कार्यत्वात्सि	कार्यत्वासि
२१५	१६	एवाह्या	एव ह्या
२१६	२६	द्धस्वत्वं	दृध्रस्वत्वं
२१७	१३	द्वि शिष्ट	द्विशिष्ट
२१६	७	दात्र ऽद्वि	दात्रऽद्वि
२१६	२४	रित्यतर्थ	रित्यर्थ
२२०	२३	प्रति	प्रति-
२२०	२८	मुद्रयो परि	मुद्रयोपरि
२२०	२६	मुद्रयो परि	मुद्रयोपरि
२२१	८	स्पटिक	स्फटिक
२२१	१४	सामार्थ्या	सामर्थ्या
२२१	२३	कर्त्तव्यता ब्रह्मा	कर्त्तव्यताब्रह्मा
२२२	२२	तथा-	तथा
२२२	२६	नेका-	नेक-
२२३	२६	सहिष्णु धर्म	सहिष्णुधर्म
२२४	१६	तार्हि	तर्हि
"	"	पैरुषे	पौरुषे
२२६	१६	किमिति त	किमिति त-
२२७	३	लभ्योप	लभ्योप-
२२८	११	सर्व	सर्व-
२२६	३	दस्य	वेदस्य
२३१	३१	कत्वानिश्च	कत्वनिश्च
२३४	५	प्रामाणा	प्रमाणा
२३४	१७	कणीति	कणीति इति

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
२३४	२८	तच	तत्र
२३४	२९	किचित्कल्प	किचित्कल्प
२३५	२४	पक्रम	पक्रम
२३६	११	विषविषय	विषय
२४०	४	नावहति	नावहन्ति
२४०	५	सर्वप्रामा	सर्वप्रमा
२४०	१९	प्रामाण्या	प्रमाण्या
२४०	२१	च्चैत्यन्य	च्चैतन्य
२४१	९	व्युत्पित्तुः	व्युत्पत्तुः
२४२	१६	नन्वेवमपि ।	नन्वेवमपि
२४२	२२	व्यावृ	व्यावृत्तं
२४३	१०	अपिचा	अपिच
२४३	२४	नवत	नवगत
२४४	२६	श्चेतरा	श्चेतरेतरा
२४५	३०	अयम	अष्टम
२४६	२०	मानेष्ठ	मानेष्ट
२४६	२५	विलायां	वेलायां
२४७	८	त्वादर्थ	त्वादर्थ-
२४७	२९	नैयैागिक	वैयोगिक
२४९	११	त्सजीती	त्सजाती
२४९	१६	। तदपि	तदपि
२५०	९	प्रति पाद	प्रतिपाद
२५१	२६	ऽलोकि	ऽलौकि
२५३	१४	गतम्विमु	गतम् विमु
२५३	१९	तम	रीतम
२५४	६	नुन	ननु
२५४	१०	त्युपसना	त्युपासना
२५४	१२	परिणाम	परिमाण
२५५	१४	पुन रा	पुनरा
२५५	२३	मुत्त्युपायेग	मुत्त्युपयोग
२५६	१६	मुच्यते ।	मुच्यते
२५६	१९	श्यनृषि	श्यनृषि
२५७	२१	प्रहा	प्रही
२५८	११	इति ।	इति
२५८	२२	मित्यत	मित्यतः
२५९	१३	तत्रावस्था	तत्रावस्था
२५९	१८	स्यान्यत्म	स्यान्यात्म
२५९	२५	ऽशाशि	ऽशांशि
२६०	५	पृथत्कि-	पृथक्कि
२६०	२२	श्चेतित्यु	श्चेत्यु
२६०	२४	पतिपाद	प्रतिपाद
२६०	२५	वस्तु प्रति	वस्तुप्रति
२६२	२३	न च स	न च सा
२६२	२७	नुपायि	नुयायि
२६२	३०	ऽवक्किच	ऽवच्छिच
२६३	२१	नन्तरभूं	नन्तरभू
२६४	२	प्राकाशो	प्रकाशो
२६४	३०	भन्नाभिन्ने	भिन्नाभिन्ने
२६६	२४	नह्मणो	ब्रह्मणो
२६६	२९	स्ताद्भाव	स्तद्भाव
२६७	२७	रेवत्ये	रेवेत्ये
२६८	२०	च्छंमाऽऽमा	च्छंऽऽमा
,,	,,	प्रतीकालम्ब	प्रतीकालम्ब-
२६९	९	ऽस्य यस्य	ऽरयस्य
२६९	१९	गायत्री शा	गायत्रीशा
२६९	२५	फल प्राप्तिः	फलप्राप्तिः
२७०	१	संकल्पै	सकल्पै
२७०	१०	चेदुत् क्रा	चेदुत्क्रा
२७१	५	इत्यादि प	इत्यादिप
२७६	२४	दर्येतिति	दर्येति
२७७	३	सार्थ्यं	सामर्थ्यं
२७७	१८	तस्माद्-	तस्माद्
२७७	२२	द्वितीयो	द्वितीया
२७८	२१	सामञ्जस	समञ्जस
२७८	२८	शोधतं	शोधितं
२८०	३	सम्बध	सम्बन्ध
२८३	३	सम्ब	सम्ब-

वर्णक्रमानुसारिसूचीपत्त्रम् ।

पञ्चपादिकाविवरणम् ।

पालने विमलसत्त्ववृत्तये जन्मकर्म्मणि रजोजुषे लये ।
तामसाय जगतः पराकृतद्वैतजालवपुषे नमः सते ॥ १ ॥
यस्याः प्रसादमवलम्ब्य जगद्गुरूणामप्यस्खलद्बहुगुणाः प्रसरन्ति वाचः ।
सा वेदशास्त्रपरिनिर्मितवन्द्यदेहा भूयात्समग्रवरदैव सरस्वती नः ॥ २ ॥
विघ्नाभितापमभिहत्य मदीयकृत्यबीजं प्रवृद्धमदनुग्रहवर्षपातैः ।
सम्प्रार्थितः सिततरोपि गणेशमेघः सिञ्चन्नऽभीष्टफलमङ्कुरयत्वऽमोघम् ॥ ३ ॥
श्यामोऽपि श्रुतिकमलावबोधरागः शान्तः सन्नयति तमो विनाशमन्तः ।
नीरूपं प्रथयति योपि गोसहस्रैस्तं व्यासं नमत जगत्य ऽपूर्वभानुम् ॥ ४ ॥
उद्धृत्य वेदपयसः कमलामिवाब्धेरालिङ्गिताखिलजगत्प्रभवैकमूर्त्तिम् ।
विद्यामशेषजगतां सुखदाम ऽदाद्यस्तं शङ्करं विमलभाष्यकृतं नमामि ॥ ५ ॥

वन्दे तमात्मसम्बद्धस्फुरद्ब्रह्मावबोधतः ।
अर्थतोपि न नाम्नैव यो ऽनन्यानुभवो गुरुः ॥ ६ ॥
प्रकाशात्मा यतिः सम्यक् प्राप्तविद्याशुशुत्सया ।
यथाश्रुतं यथाशक्ति व्याख्यास्ये पञ्चपादिकाम् ॥ ७ ॥
विदितसकलवेद्यैर्न्न प्रशंसन्ति लोके
ग्रथितमपि महद्भिः किं पुनर्मादृशेन ।
इति विफलसमे ऽस्मिन् वाग्व्यये ऽहं प्रवृत्तः
स्वमतिविमलतायै वन्तुमर्हन्ति सन्तः ॥ ८ ॥

प्रारिप्सितग्रन्थस्याविघ्नेन परिसमाप्तिप्रचयगमनाभ्यां शिष्टाचारपरिपालनाय चाभिलषितदेवतापूजानमस्कारः कर्त्तव्यः शास्त्रार्थश्च तत्त्वम्पदार्थविवेकोपायलभ्यः प्रत्यग्ब्रह्मणोरेकत्वलक्षणः सङ्क्षेपतो दर्शनीयः कृत्स्नस्य भाष्यस्य तच्च तात्पर्य्यकथनायेति तदुभयं श्रुत्यर्थाभ्यां सङ्क्षेपतो दर्शयति अनाद्यानन्दकूटस्थ * ज्ञानानन्तसदात्मने । अभूतद्वैतजालाय साक्षिणे ब्रह्मणे

* ज्ञानानन्देति ३ पु॰ ।

नम इति । कृत्स्नस्य भाष्यस्य ब्रह्मात्मैकत्वे तात्पर्य्यमत्र दर्शितमुत्तरत्र विभ-
ज्यतात्पर्य्यदर्शनात् । अत्र देवतागुरु*विषया पूजानमस्काराद्युपबृंहिता† भक्ति-
र्वक्तुरुक्तप्रयोजनसम्पादिन्यपि श्रोतृणामपि विद्याङ्गभावं प्रतिपद्यत इति
१ ३ वाङ्मनःकायप्रणिधानैर्गुरूनभिपूजयति नमः श्रुतिशिरःपद्मषण्डमार्त्तण्डमूर्त्तये
इत्यादिभिस्त्रिभिः श्लोकैः । यत्कार्य्यमुद्दिश्य मङ्गलाचरणं सम्पादितं तन्नि-
र्दिशति पदादिवृन्तभारेणेति । ननु नेदं भाष्यं व्याख्यानपदवीमुपारोढुमर्हति
भाष्यलक्षणाभावात् । सूत्रार्थो वर्ण्यते यत्र वाक्यैः‡ सूत्रानुकारिभिः । स्वप-
दानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुरिति हि भाष्यलक्षणं वदन्ति ।
तत्राथातो ब्रह्मजिज्ञासेतिसूत्रे अनुवादपरिहाराय शास्त्रे पुरुषप्रवृत्तिसिद्धये च
कर्त्तव्येतिपदमध्याहर्त्तव्यम् । तत्र जिज्ञासापदेनान्त§र्नीतं विचारमुपलक्ष्या-
नुष्ठानयोग्यतया साधनचतुष्टयसम्पन्नस्य ब्रह्मज्ञानाय विचारः कर्त्तव्य इति
सूत्रवाक्यस्य श्रौतोऽर्थः सम्पद्यते । अर्थादधिकारिविशेषणमोक्षसाधनं
ब्रह्मज्ञानमिति सिध्यति । सन्निधानाच्च वेदान्तवाक्यविचार इति श्रुत्यर्थाभ्यां
साधनचतुष्टयसम्पन्नस्य मोक्षसाधनब्रह्मज्ञानाय वेदान्तवाक्यविचारः कर्त्तव्य
इति सूत्रवाक्यस्य तात्पर्य्येण प्रतिपाद्योऽर्थोऽवगतः । तत्रेदं भाष्यं न
सूत्रार्थकलामपि प्रतिपादयत्यतो न व्याख्यानार्हमित्येतं शङ्कितं दोषं परि-
हरन् भाष्यखण्डस्य सूत्रेणार्थादुपात्तविषयप्रयोजनप्रतिपादने तात्पर्य्यं दर्श-
यति युष्मदस्मत्प्रत्ययगोचरयोरित्याद्यहमिदं ममेदमिति नैसर्गिकोऽयं
लोकव्यवहार इत्यन्तं भाष्यमस्यानर्थहेतोः प्रहाणायाऽऽत्मैकत्वविद्याप्रति-
पत्तये सर्वे वेदान्ता आरभ्यन्त इत्यनेन भाष्येण पर्यवस्यच्छास्त्रस्य विषयः
१४ प्रयोजनं चार्थात् प्रथमसूत्रेण सूचिते इति प्रतिपादयतीति । तत्र नैसर्गिकोयं
लोकव्यवहार इत्यन्तं भाष्यमिति ग्रन्थः शास्त्रविषयं प्रयोजनं च प्रतिपाद-
यतीत्युत्तरेण सम्बध्यते । ननु कथं भाष्यद्वयमेव विषयप्रयोजने प्रतिपाद-
यति । शास्त्रारम्भनिमित्तविषयप्रयोजनसिद्धिहेतोरध्यासस्योपस्थापकत्वादिति
ब्रूमः । हेतुवचनं हि प्रतिज्ञातार्थमेव साधयति । तथाहि । एतच्छास्त्रमारम्भ-

---

* विषयपूजेति ३ पु॰ । † उपबृंहिता नाम वर्द्धिता परिपूर्णा संयुक्तेति यावत् ।

‡ सूत्रानुसारिभिरिति क्वचित् पाठः ।

§ अन्तर्नीतमिति पु॰ त्रयेऽप्यस्ति, तथापि अन्तर्णीतेति तु न्याय्यं स्यात् ।

णीयं सम्भावितविषयप्रयोजनत्वात्कृष्याद्यारम्भवत् । शास्त्रं च सम्भावित-
विषयप्रयोजनम् अविद्यात्मकबन्धप्रत्यनीकत्वात् जाग्रद्बोधवदिति । तदेवं
* शास्त्रस्यारम्भनिमित्तविषयप्रयोजनवत्त्वप्रत्यनीकस्य बन्धस्याविद्यात्मकत्वं
निर्दिशद्भाष्यद्वयं विषयप्रयोजने प्रतिपादयतीति । ननु बन्धस्याविद्यात्म-
कत्वलक्षणो हेतुरसिद्धः कथमसिद्धमसिद्धेन साध्यत इत्यत आह । सर्वे
वेदान्ता आरभ्यन्त इत्यनेन भाष्येण पर्यवस्यदिति विषयादिसिद्धिहेतोर- १ १३
ध्यासस्य सिद्धिहेतुभूतानि लक्षणसम्भावनासद्भावप्रमाणानि प्रतिपादयता
भाष्येण सह लक्षणादिभिः स्वार्थमध्यासं साधयित्वा विषयप्रयोजने साध-
यतीत्यर्थः । अत एव व्यवधानाव्यवधानाभ्यां विषयादेः साधकत्वादेत-
दन्तमनेन पर्यवस्यदिति भाष्यस्य विभागेनोपादानं कृतम् । ननु तर्हि सर्व-
लोकप्रत्यक्ष इत्यनेन पर्यवस्यदिति वक्तव्यम् । सत्यम् । अस्यानर्थहेतोरिति
भाष्यस्य विषयप्रयोजनयोर्वेदान्तवाक्यसम्बन्धकथनद्वारेण विचारशास्त्रसम्ब-
न्धप्रतिपादनपरत्वात् । विचारशास्त्रीयविषयप्रयोजनसाधने सव्यवधानत्व-
साम्येन पूर्वभाष्येण सहोपादानं कृतम् । नन्वेवमप्यसूत्रसम्बन्धिनी विषय-
प्रयोजने किमिति † प्रतिपाद्येते इत्यत आह विषयः प्रयोजनं चार्थात्प्रथ- ,, १४
सूत्रेण सूचिते इतीति । इतिशब्दो हेतौ यस्मात्प्रथमसूत्रेणार्थात्सूचिते तस्मा-
त्प्रतिपादयतीति ॥

कः पुनरस्य सूत्रस्य प्रसङ्ग ‡ इति । उच्यते । नित्येनैवाध्ययन-
विधिना ऽधीतस्वाध्यायो वेदान्तवाक्येष्वापातदर्शनेनेदमवगच्छति । आत्म-
नस्तु कामाय सर्वं प्रियमित्युपक्रमात्सर्वतोविरक्तस्यात्मप्रेप्सोरात्मनि विज्ञाते
सर्वमिदं विज्ञातमेतावदरे खल्वमृतत्वमित्युपसंहारादमृतत्वसाधनमात्म-
दर्शनं द्रष्टव्य इत्यनूद्य तादर्थ्येन मनननिदिध्यासनाभ्यां फलोपकार्यङ्गाभ्यां
सह श्रवणं नामाऽङ्गि विधीयत इति । स च तत्र कियद्विशेषणपर्यन्तो
ऽधिकारी किम्प्रमाणकश्च को वा ऽसौ वेदान्तवाक्यविचारो ऽन्यतः प्राप्तो
ऽप्राप्तो वा कथं चात्मज्ञानं मोक्षसाधनं किम्प्रमाणकं च तत्किं वा तदात्म-
तत्त्वं किम्प्रमाणकं चेति जिज्ञासते । तं च जिज्ञासुं पुरुषार्थकाममुपलभ-

---

* शास्त्रारम्भेति २ पु० । † प्रतिपद्येते—इति १,२ पु० । ‡ इतिशब्दो नास्ति ३ पु० ।

मानो भगवान् बादरायणः साधनचतुष्टयसम्पन्नस्य मोक्षसाधनब्रह्मज्ञानाय वेदान्तवाक्यविचारं विदधतो विधेरपेक्षिताधिकारिविषयफलानुबन्धत्रयमागमिकमपि न्यायेन निर्णेतुं सूत्रयामास ऽथातो ब्रह्मजिज्ञासेति । *श्रुतिसूत्रयोरैकरूप्यावगमात् । मननिदिध्यासनयोश्च श्रवणाङ्गत्वमुत्तरत्र वक्ष्यामः । ननु श्रोतव्य इति विधिर्मोक्षसाधनब्रह्मात्मज्ञानाय वेदान्तवाक्यविचारं साधनचतुष्टयसम्पन्नस्य विधातुं न शक्नोति श्रवणादीनां विषयावगमं प्रत्यन्वयव्यतिरेकसिद्धसाधनत्वात् । न चावघातादिवदुभयार्थता सम्भवति । दृष्टादृष्टप्रकारद्वयसाध्यापूर्ववदिहादृष्टसाध्यस्याभावादात्मावगमस्य दृष्टोपायमात्रसाध्यत्वादिति । नैतत्सारम् । आत्मत†त्वापरोक्षस्य सर्वादृष्टसाध्यत्वस्य ‡ वक्ष्यमाणत्वादवघातादिव §दुभयार्थतया विधानोपपत्तेः । ननु विधिपरत्वे वेदान्तानां तन्निष्ठतया ब्रह्मस्वरूपस्यासिद्ध्यादिदोषप्रसङ्गान्नास्ति श्रवणादिविधानमिति भाष्यकारैरेव दर्शितम् । सत्यम् । ज्ञानविधिस्तत्र निराकृतो न श्रवणादिविधिस्तत्रोक्तदोषप्रसङ्गाभावात् । कथम् । दर्शनविधाने हि ब्रह्म ||कर्मतया गुणभूतं प्रसज्यते । ब्रह्मदर्शनमुद्दिश्य विचारविधाने तु स्वप्रधानफलभूतदर्शनविशेषणतया ब्रह्मापि स्वप्रधानं भवति नतु गुणभूतमिति वेदान्तैर्ब्रह्मणि स्वप्रधाने प्रतिपाद्यमाने तद्दर्शनाय श्रवणादिविधानं ¶नैव विरुध्यते । नन्वेवमप्युपक्रमोपसंहाराभ्यामेकस्मिन्नात्मप्रतिपादनपरे वाक्ये कथमवान्तरवाक्यैः श्रवणादिविधानं कल्प्यत **इति । अवान्तरवाक्यभेदेन विविदिषन्तीति यज्ञादीनां ज्ञानसंयोगविधानवदुपरि हि देवेभ्य इत्युपरिधारणविधानवन्मलवद्वाससो व्रतकलापविधानवच्चेति ब्रूमः । अथवा । तस्माद् ब्राह्मणः पाण्डित्यं निर्विद्येत्यादिवाक्यं श्रवणादिविधायकमस्तु तस्य तत्परत्वात् । सूत्रकारेण च वक्ष्यमाणत्वात् । सर्वथा तावन्मनननिदिध्यास-

---

* मुमुक्षोर्ब्रह्मज्ञानाय विचारकर्त्तव्यताप्रतिपादकत्वेन तयोस्तुल्यत्वादिति भावः ।–भावप्रकाशिका । † तत्त्वापरोक्षस्येति २ पु॰ । ‡ सर्वापेक्षा च तद्दर्शनादिति सूत्रे ।

§ न च नियमापूर्वस्योपयोगाभावः कल्मषनिवृत्तेस्तत्साध्यत्वात् । न च यज्ञादिनैव सा सिद्धेति वाच्यम्, जिज्ञासाप्रतिबन्धककल्मषनिवृत्तेस्तत्साध्यत्वे ऽपि ब्रह्मनिर्णयप्रतिबन्धकनिवृत्तेरेतत्साध्यत्वादिति सन्यासापूर्ववत्तस्यार्थवत्त्वादिति भावः–इति भावप्रकाशिका ।

|| ज्ञानस्येति शेषः–भाव॰ ।

¶ विनैव रुध्यत इति पाठे १ पुस्तके सत्यपि नैव विरुध्यत इति युक्तः पाठः, न विरुध्यत इति तु २,३ पु॰ । ** इत्यावान्तरेति १ पाठः ।

नाभ्यामङ्गभूताभ्यां सह श्रवणविधानमस्त्येवा ऽतस्तदपेक्षितानुबन्धचय-
* निर्णयाय † सूत्रमारब्धम् । कर्त्तव्ये ‡ चाधिकारिणा मोक्षसाधन § ब्रह्म-
ज्ञानाय वेदान्तवाक्यविचारे प्रथमसूत्रेण प्रतिपादिते स च कर्त्तव्यो विचारो
जन्मादिसूत्रमारभ्य प्रवर्त्तिष्यत इति तत्र विध्यपेक्षितेष्वधिकारिविषय-
फलानुबन्धेषु विषयफलयो ‖ रुपपादनाय बन्धस्य मिथ्यात्वमत्र वर्ण्यत
इति सूत्रसङ्गतमेवेदं भाष्यं व्याख्येयमिति ॥

ननु यद्यर्थाद्विषयप्रयोजने सूचिते तर्हि भाष्यकारेण सूत्रस्य तत्र
व्यापारं दर्शयित्वा ऽऽक्षेपसमाधानपूर्वकं साक्षादेव प्रतिपादनीये ¶ विषयप्र-
योजने अन्यथा सूत्रकारभाष्यकारयोस्तत्र तात्पर्याभावप्रसङ्गादिति । तत्राह
एतच्च तस्माद् ब्रह्मजिज्ञासितव्यमित्यादिभाष्ये स्पष्टतरं भाष्यकारेणोक्तमिति । १ १५
प्रतिपादयिष्याम इत्यध्याहारः । प्रथमग्रन्थोक्तमेवार्थमाक्षेपसमाधानपूर्वकमति-
तरां स्पष्टीकर्त्तुं चोदयति अत्राह यद्येवमिति । नन्वस्यानर्थहेतोरिति भाष्यव-
त्पूर्वभाष्यमपि विषयादिकमेव प्रतिपादयति कुतस्तत्र पर्यनुयोग इति नेत्याह
अहं मनुष्य इति देहेन्द्रियादिष्वित्यादिनात्र विचारकर्त्तव्यताविषयप्रयोज-
नाध्यासानामुत्तरोत्तरेण ** पूर्व्वपूर्व्वस्य साध्यत्वस्य सूत्रेणैव सूचितत्वादध्या-
ससाधनद्वारेण विषयप्रयोजने साधयित्वा विचारकर्त्तव्यता साधनीयेति क्रम-
नियमं विवक्षन्नाह उच्यत इत्यारभ्य वक्ष्यति चैतदित्यतः प्राक्तनेन ग्रन्थेन । २ ११
ननु †† ब्रह्मज्ञानप्रयोजनां विचारकर्त्तव्यतां ‡‡ सूचयता सूत्रेण कथं बन्धनि-
वृत्तिर्विचारविज्ञानयोः प्रयोजनत्वेन सूचितेति । तत्राह । ब्रह्मज्ञानं हि
सूचितमनर्थहेतुनिबर्हणमिति । विचारसाध्यज्ञानस्य प्रयोजनमाकाङ्क्षन्विचार-
विधिरधिकारिविशेषणं मोक्षं प्रयोजनत्वेन प्रमिमीते इत्यर्थः । नन्वनर्थो
नरकपातादिलक्षणो ऽन्य एव शरीरादिप्रतिभासस्य च मिथ्यात्वं साध्यत
इति किं केन सङ्गतमिति नेत्याह अनर्थश्च प्रमातृताप्रमुखं कर्तृत्वभोक्तृत्व- १ २२

---

* विनिर्णयायेति २ पु॰ । † न्यायसूत्रमिति २ पु॰ ।
‡ अधिकारिणः–इति २ पु॰ । § ब्रह्मात्मज्ञानायेति २ पु॰ ।
‖ उपादानायेति १,३ पु॰ ।
¶ विषयप्रयोजने ऽन्यथेति १,२ पुस्तके सत्यपि विषयप्रयोजने अन्यथेति ३ पुस्तकपाठो युक्तः । ** पूर्वपूर्वसाध्यत्वस्येति २ पु ।
†† ब्रह्मज्ञानप्रयोजनमिति १,२ पु॰ । ‡‡ सूत्रयता–इति २ पु॰ ।

मिति । निवर्त्ततां तर्हि ज्ञानेन वस्तुभूतमेव प्रमातृत्वकर्तृत्वभोक्तृत्वमिति
२ १ नेत्याह तद्यदि वस्तुकृतमिति । तथाहि । चित्रावयविनि नीलविशिष्टद्रव्यज्ञानं
स्वविषयं वा स्वविषयसमवेतं वा रसादिकं विरोधिनं वा पीतिमादिगुणं न
निवर्तयति स्वविषयानवबोध एव केवलस्तेन निवर्त्यते । स्वाश्रयगतं वस्तु
ज्ञानेन निवर्त्तत इति चेन्न घटादिज्ञानेनात्मगतधर्माधर्मादिगुणानिवृत्तेः । न
चाश्रयविषयोभयसम्बन्धि वस्तु ज्ञानेन निवर्त्तते आत्मनः शरीरविषयज्ञानेन
देहात्मसम्बन्धाद्यनिवृत्तेरिति । ननु न दृष्टसामर्थ्यात् ज्ञानाद्बन्धनिवृत्तिर्येना-
विद्यात्मत्वं वर्ण्येत किन्त्वागम एव ज्ञानाद्बन्धनिवृत्तिं श्रावयति । ननु श्रुतो-
पपत्त्यर्थमेव बन्धस्यावि * द्यात्मत्वं वर्णनीयमेव । यथाग्नेयादीनां † षण्णां या-
गानामधिकारापूर्व्वविषयतया ऽपूर्व्वकरणभावे श्रुतेपि कालान्तरभाविप्रधाना-
पूर्व्वसाधनत्वोपपत्त्यर्थं क्रमभावियागकर्म्मजन्यानि मध्यवर्त्तीन्यवान्तरापू-
र्व्वाणि कल्प्यन्ते । यथा वा श्रुतस्यैव स्वर्गसाधनत्वस्योपपत्तये ऽपूर्व्वं
कल्प्यते तद्वत् । ननु तत्र क्षणिकानां कर्मणां कालान्तरवर्त्तिफलसाधनत्वा-
भावव्याप्तिनियमाल्लोके वेदेपि स्वर्गापूर्वसि ‡ द्धौ मध्ये § ऽपूर्वाणि कल्प्यन्ते
श्रुतोपपत्तय इति । तर्हीहापि व्याप्तिनियतिरस्तीत्याह यतो ज्ञानमज्ञा-
स्यैव निवर्त्तकमिति । अतः सूत्रस्यैव बन्धस्याविद्यात्मकत्वे व्यापारा-
त्सूत्रार्थविचारकर्तव्यतोपपत्त्यर्थप्रयोजनसाधनायाध्यासो वर्णनीय इत्याह
तद्यदीत्यादिना सूत्रार्थोपपत्त्युपयोगितयेत्यन्तेन ग्रन्थेन । ननु सूत्रेण प्रथमप्र-
तिपन्नं प्रतिपाद्यमर्थमुल्लङ्घ्य किमिति चरमप्रतिपन्नमार्थिकार्थमेव भाष्यकारः
प्रथमं वर्णयतीति तत्राह सकलतन्त्रोपोद्घात इति प्रतिपाद्यमर्थं बुद्धौ
संगृह्य प्रागेव तदर्थमर्थान्तरवर्णनमुपोद्घातः प्रतिपाद्यं बहिरेव प्रतिज्ञाय
पश्चात्तत्सिद्धिहेतूपवर्णनं प्रतिपादनमिति विभागः तन्त्रमिति तन्त्रार्थो
ब्रह्मात्मैकत्वमुच्यते । ननु भवतु प्रयोजनसिद्धिहेतुरध्यासः कथं तन्त्रार्थ-
सिद्धिहेतुरित्याशङ्क्य तत्कथनाय तन्त्रार्थं प्रथमं कथयति तथाचास्य शास्त्र-
" ५ स्येति ऐदम्पर्यं प्रतिपादितमित्युत्तरेण सम्बन्धः । तदेवैदम्पर्यं दर्शयति सुखैक-

* अविद्यात्मकत्वमिति २,३ पु ।
† आग्नेयादिषण्णामिति प्रायः सर्वत्र ।
‡ सिद्धाविति २ पु ।
§ अपूर्वान्तराणीति २ पु० ।

तानेत्यादिना । अयमर्थः । ब्रह्मात्मैकत्वे वेदान्ताः पर्यवस्यन्तीति यदिदं वेदा- २ ५
न्तशास्त्रस्यैदंपर्यं तत् सूत्रभाष्याभ्यां प्रतिपादितमिति । तन्त्रार्थं प्रदर्श्य तस्या-
ध्याससिद्ध्यधीनतया ऽध्यासस्य प्रथमवर्णनीयतां दर्शयति तच्चाहं कर्ता
सुखी दुःखीति । ननु शास्त्रमेव प्रत्यक्षाभिमतमपि बन्धमाभासीकृत्य ब्रह्मा-
त्मैकत्वं प्रतिपादयिष्यति किं पृथगध्यासवर्णनेनेति । तथाह तावज्जरद्गवादि-
वाक्यवदिति । ननु शास्त्रार्थसिद्धिरध्यासपराधीना चेत्स एव तर्ह्यध्यासः
सूत्रकारेण मुखतो वर्णनीयः तस्य प्राधान्यादन्यथा तथातात्पर्यप्रसङ्गादिति ।
तथाह वक्ष्यति चैतदिति । तर्ह्युपोद्घातत्वात्प्रथममेवाध्यासविषयं सू
प्रणेतव्यमिति चोदति । यद्येवमिति । अर्थनिर्णयप्रधानत्वाद्वादकथालक्ष-
णायां *प्रतिपादनप्रक्रियायां प्रवृत्तः सूत्रकारो नोपोद्घातप्रक्रियायामिति परि-
हरति नैवमर्थविशेषोपपत्तेरिति । तर्हि भाष्यकारेणापि यथासूत्रक्रममेव
प्रवर्तितव्यं नतु सूत्रक्रममतिलङ्घ्येति । तथाह भाष्यकारस्त्विति ।
सुखप्रतिपत्त्यर्थं प्रवृत्त्यङ्गभावायेत्यर्थः । एवमपि न व्याख्येयमिदं भाष्यं
शास्त्रादौ मङ्गलाचरणाभावात् । विघ्नोपसंसृष्टतया शास्त्रार्थे ऽप्रतिपत्त्य-
न्यथाप्रतिपत्तिविप्रतिपत्तिसम्भवात् शिष्टाचारपरिपालनहीनतया चानाप्तप्र-
णीतत्वप्रसङ्गादिति चोदयति ननु ग्रन्थकरणादिकार्यारम्भ इति ।
ननु शिष्टानां निष्ठीवनादिप्रवृत्तिः किमन्येनानुसरणीयेति नेत्याह
शिष्टाचारश्च नः प्रमाणमिति· आचारो धर्म इत्येवानुष्ठीयमानं कर्म
प्रमाणं कर्तव्यमित्यर्थः । ननु प्रयोजनाभावात् किं मङ्गलाचरणेनेति नेत्याह
प्रसिद्धं च मङ्गलाचरण †स्येति । नन्वत्र विघ्न एव नास्त्यल्पार-
म्भत्वादिति नेत्याह महति चेति । ननु सम्भावनामात्रान्न प्रवृत्तिर्वि-
घ्नशान्तये किन्तु निश्चयादित्यत्राह प्रसिद्धं चेति । ननु लोकप्रसिद्धि-
र्निर्मूला न विघ्ननिश्चयहेतुरित्यत आह विज्ञायते चेति । उपसंहरति
तत्कथमिति । सर्वदा सर्वकार्येषु नास्ति तेषाममङ्गलम् । येषां हृदिस्थो
भगवान्मङ्गलायतनं हरिरितिस्मृतेः शिष्टाचारप्रतिपालनाय विघ्नोपशान्तये
च विशिष्टदेवतातत्त्वानुस्मरणलक्षणं मङ्गलाचरणं कृतमित्याहाचार्येत्यत इति । ३ १

---

* समासो ऽस्ति २ पु॰ ।

† मङ्गलाचरणत्वस्येति १ पु॰ ।

३ १ किं तत्र प्रमाणमित्यत आह युष्मदस्मदित्यादीति इत्यन्तमेवभाष्यं प्रमाणमित्यर्थः मङ्गलाचरणमिति वा । कथमिदं विशिष्टदेवतानुस्मरणं गमयतीति । तत्राहास्य चायमर्थ इति । ननु नेह विशुद्धात्मतत्त्वदेवतानुस्मर्यते किन्त्वध्यासाभावो वर्ण्यत इति । सत्यम् । तादर्थ्येन तत्त्वमप्यनुस्मर्यत इत्याह तत्कथंचनेति । नन्वन्यपरत्वाद्देवतानुस्मृतिरविवक्षिता न कार्यकरीति । नेत्याह । तदन्यपरादेवेति । अन्यार्थमपि देवतानुस्मरणं स्वभावादेव विघ्नोपप्लवं धक्ष्यति धूमार्थं इव वह्निस्तृणादिकमित्यभिप्रायः । व्याख्येयत्वं प्रतिपादितमुपसंहरति तस्मादिति । अन्यार्थप्रवृत्तेन युष्मदस्मदित्यादिपदद्वयमर्थाद्व्याख्यातम् उत्तरपदं व्याख्यातुं भाष्यमा * ददाति विषयविषयिणोरित्यादिना तत्र द्विविधो विरोधो द्विविधा चेतरेतरभावानुपपत्तिः । कथम् । द्वयोः पदार्थयोरेकदेशकालावस्थानसामर्थ्याभावः पदार्थधर्मो विरोधः । तन्निमित्तो ऽवस्थानलक्षणकार्याभाव इतरेतरभावानुपपत्तिरित्येकस्कन्धः । अपरस्तु पदार्थयोरितरेतरात्मतासामर्थ्याभावः पदार्थधर्म्मो विरोधः । तन्निमित्त इतरेतरात्मतालक्षण † कार्याभावानुपपत्तिरित्यतो द्वैविध्यात्पृच्छति कोयं विरोध इत्यादिना । तत्र प्रथमं पक्षं दूषयति ‡ तावदित्यादिना सहावस्थान § मुक्तमित्यन्तेन ग्रन्थेन । तत्र तमःप्रकाशशब्दाभ्यां छायातपशीतोष्णग्रहणमङ्गीकृत्य तत्रापि सहावस्थान ‖ मुक्तं वेदितव्यम् । इदानीं

,, १४ द्वितीयं पक्षमवलम्बते उच्यते परस्परात्मतालक्षणो विरोध इत्यादिना । ननु तमो नामा ऽऽलोकाभावमात्रमिति केचिद्रूपदर्शनाभावमात्रमित्यन्ये तत्कथं दृग्दृश्ययोर्भावरूपयोरिदं दृष्टान्तत्वेना ¶ द्रियत इति । उच्यते । उपचयापचयाद्यवस्थाभेदविशेषविशिष्टं रूपवत्तया चोपलभ्यमानं तमः कथं द्वयीमभावविधामासीदेत् । बहलालोकवितते पि देशे निमीलितनयनस्य गोलकान्तरवर्त्तितमोदर्शनमन्धकारोपलब्धिः पिहितकर्णपुटस्यान्तरशब्दोपलब्धिवन्न विरुध्यते । आलोकविनाशितस्य च तमसः पुनर्मूलकारणादेव झटिति महाविद्युदादिजन्मवज्जन्म सिद्ध्यति । ननु रूपवतो द्रव्यस्य स्पर्शवत्त्वनियमा-

---

* सर्वेष्वेव पुस्तकेषु आददातीति पाठः, भाष्यं व्याख्यातु प्रतीकग्रहणमास्यविहरणं विनाऽनुपपन्नमित्यास्यविहरणस्य विवक्षितत्वाच्चात्मनेपदमिति द्रष्टव्यमिति भावप्रकाशिका च ।

† कार्याभावो ऽनुपपत्तिरिति २ पु॰ ।

‡ यदि तावदिति २,३ पु॰ ।   § उक्तं वेदितव्यमित्यन्तेनेति २ पु ।

‖ उक्तमिति द्रष्टव्यम् इति २ पु॰ ।   ¶ उपादीयत इति २ पु॰ ।

न्तद्रहितं तमः कथं रूपवद् द्रव्यम * वगम्येत। नैष दोषः। वायोरन्यत्र स्पर्शवद्द्रव्यस्य रूपवत्त्वनियमेपि रूपरहितस्य स्पर्शवतो वायोरभ्युपगमात्तद्दर्शननियमादेव स्पर्शहीनस्य रूपवत्तमसः सिद्धेः। धूमस्य च रूपवतश्चक्षुःप्रदेशादन्यत्र स्पर्शानुपलब्धिः तद्व † त्सर्व्वस्पर्शहीनं तमः किं न स्यात्। सवितृकिरण ‡ वितते पि देशे प्रदीपालोकजन्मविनाशयोः प्रागभावप्रध्वंसाभावेतरेतराभावेषु तमोबुद्ध्यदर्शनान्नालोकाभावमात्रं तमः। सर्व्वालोकाभावश्चेत्सर्वालोकासन्निधाने तर्हि न निवर्त्तेत। बहलान्धकारसंवृतापवरकान्तरवस्थितस्यापि बहीरूपदर्शनेन सहापवरकान्तस्तमोदर्शनान्न रूपदर्शनाभावमात्रं तम इत्यलमतिप्रसङ्गेन।

ननु दृग्दृश्ययोरितरेतराभावानुपपत्तिस्तयोर्विभ्रमनिमित्तं तादात्म्यावभासं न निरुणद्धि। शुक्तिकारजतयोरपि हि तादात्म्यहीनयोरेव विभ्रमनिमित्तमैकाधिकरण्यमवभासते तद्वदिहापि स्यादिति चोदयति कथमिति। सत्यमिदमंशमात्रस्याधिष्ठानस्य § रजतस्य चाध्यस्यमानस्य क्वचित्तादात्म्यमस्त्येव। ततश्चाधिष्ठानसामान्यांशस्याध्यस्यमानविशेषांशस्य च क्वचित्सामान्यविशेषभावेन वा गुणगुणिभावेन वा समानाधिकृतस्यान्यत्रान्यतरांशवतः पदार्थस्य दर्शनादन्यतरांशाद्भासो विभ्रमो दृष्टः तद्वदिहाधिष्ठानस्य चितोध्यस्यमानस्य चानात्मनो नास्तीत्याह स्वतस्तावद्विषयिणश्चिदेकरसत्वान्न युष्मदंशसम्भव इत्यादिना। अयमाशयः। द्रष्टुरचिदंशः स्वाभाविको वा स्यादागन्तुको वेति। न स्वाभाविक इत्याह स्वत इति। चेत्यं हि जडं चैतन्यस्य कर्मकारकतयावभासते। तत्कथमेकस्यां क्रियायां कर्त्तुर्विपरीतस्यानगतं कर्मकारकमात्मा स्यादित्यभिप्रायः। आगन्तुकश्चेत्सहेतुरहेतुर्वा। निर्हेतुश्चेत्तत्राह अपरिणामित्वादिति। नहि निरवयवं वस्तु स्वतः सावयवाकारेण परिणममानं दृष्टमित्यभिप्रायः। न सहेतुरित्याह निरञ्जनत्वादिति। नहि निरवयवमाकाशं हेतूपरागात्परिणममानं दृष्टमित्यर्थः। तर्ह्यनात्मैवाधिष्ठानमात्मांशात्मकं क्वचिद्दृष्टमिति। नेत्याह विषयस्यापीति। समत्वादित्ययमर्थः। यथा द्रष्टुर्द्रष्ट्रन्तरं न प्रत्यक्षगोचरो ऽनुमेयमेव तत् एवं विषयो ऽपि स्यादिति। परतोपि

३ १६

,, १८

* अवगम्यते—इति १, ३ पु०। † सर्वं स्पर्शहीनमिति १ पु०।
‡ संवृतेऽपीति २ पु०। § रजतस्याध्यस्यमानस्य चेति २ पु०।

नानात्मनश्चिदाकारपरिणामो जडोपादानस्यापि कार्यस्य जडत्वात्। तर्ह्यात्मचैतन्यमेवानात्मा स्वांशत्वेन स्वीकरोतीति चेत् तत्राह चितेरप्रतिसंक्रमत्वादिति। तस्मात्क्वचिदपि तादात्म्यादर्शनादन्यत्रान्यतरांशदर्शने नान्यतरांशाध्यासो नो * पपद्यत इति। तद्धर्म्माणाम † पि सुतरामित्यात्म्याभाव एवाध्यासस्य युक्त इत्यतः प्राक्तनो ग्रन्थः स्पष्टार्थः।

नन्वहङ्कारादिषु शरीरान्तेष्वहमित्येव प्रत्ययो नत्विदमिति कथमेषां युष्मत्प्रत्ययगोचरत्वमिति तत्राह तद्बलनि ‡ र्भासिततयेति। तस्यात्मप्रत्ययगोचरस्य चैतन्यस्य बलेन निर्भास्यत्वादहङ्कारादेः प्रतिभासतो युष्मदर्थत्वाभावेप्यपरोक्षतयावभास्यत्वेन लक्षणेन युष्मदर्थभावो युज्यत इत्यर्थः। अपृ-

४ ४ थक्त्वेपि चैतन्यात्पृथगिवावभासन्त इति। अन्तःकरणवृत्त्युपाधौ नानेवावभासन्त इत्यर्थः।

भूयोवयवसामान्यसादृश्याभावादात्मनि कर्तृत्वादेरहङ्काराद्युपाधिनिमित्तभ्रमत्वेपि शरीराद्यध्यासस्य सोपाधिकभ्रमत्वाभावाद द्रष्टर्यहङ्कारादिशरीरान्तपदार्थाध्यासस्या ऽसम्भवं प्राप्तमङ्गीकरोति यद्यप्येवमिति। निरुपाधिकभ्रमकार्यदर्शनमेव गुणावयवसामान्याभावेपि केतकीगन्धसदृशः सर्पगन्ध इतिवत्सादृश्यं वा शङ्खपीतिमादाविव कारणान्तरं वा कल्पयतीत्याह तथापीत्यादिना एवमध्यासस्यापीत्यभिप्राय इत्यन्तेन § ग्रन्थेन। नैसर्गिकशब्दार्थमाह प्रत्यक्चैत्यन्यसत्तामात्रानुबन्धीति। कथम्। आत्मनि कर्तृत्वभोक्तृत्वदोषसंयोग एवाध्यासः। तत्रभोक्तृत्वाध्यासः कर्तृत्वाध्यासमपेक्षते अकर्तुर्भोगाभावात् कर्तृत्वं च रागद्वेषसंयोगाध्यासमपेक्षते तद्रहितस्य कर्तृत्वाभावात् दोषसंयोगश्च भोक्तृत्वमपेक्षते अनुपभुक्ते ऽतज्जातीये वा रागाद्यनुपपत्तेः। एवं बीजाङ्कुरवद्धेतुपरम्परया ऽनादित्वादध्यासस्य नैसर्गिकत्वमिति। लोकव्यवहारशब्दोध्यासाभिधायीति दर्शयति लोक इति मनुष्योह-

,, ११ मित्यादिना। व्यवहारोभिज्ञाभिवदनमुपादानमर्थक्रियेति चतुर्विधः अतो मनुष्योहमिति ज्ञानाभिधाने व्यवहारशब्दमर्हत इति भावः।

अन्यस्यान्यात्मतावभासो ऽविद्येत्युक्ते शुक्लः पट इत्यादिप्रत्ययाना-

---

* नैवोपपद्यते—इति २ पु॰। † अपिकारो नास्ति २ पु।
‡ निर्भासितयेति १ पु॰। § ग्रन्थेनेति नास्ति २ पु॰।

मविद्यात्वप्रसङ्गो मा भूदिति सत्यस्य वस्तुनो मिथ्यावस्तुसम्भेदावभासो ऽवि-
द्येति स्वसिद्धान्तमङ्गीकृत्य सत्यानृते मिथुनीकृत्येत्युक्तं तद्व्याचष्टे सत्यमनिदं-   ४ १३
चैतन्यमित्यादिना । ननु क्त्वाप्रत्ययोपादानादर्थतः क्रियाभेदः * पूर्व्वापरभाव-
श्चाङ्गीकर्तव्यः । तत्कथमध्यासमिथुनीकरणलोकव्यवहाराणामेकार्थत्वमिति ।
नेत्याह अध्यस्य मिथुनीकृत्येत्यादिना । ननु किमिति स्वरूपमात्रपर्य्यवसानम् ।
क्रियाभेद एव क्त्वाप्रत्ययसामर्थ्यादुपादीयतामिति नेत्याह उपसंहारे चेति ।
नहि पदमात्रवैयर्थ्यभयाद्वाक्यार्थौ नैसर्गिकत्वगुणविशिष्टौ विशेष्यपदार्थोध्यास
उपक्रमोपसंहारयोर्भेत्तु युक्त इत्यभिप्रायः । किं तर्हि क्त्वाप्रत्ययावलम्बनमिति ।
प्रतिपत्तितः क्रियाभेदपूर्व्वापरीभावावित्याह अतश्चैतन्यं पुरुषस्य स्वरूपमिति ।
तद्व्यपदेशमात्रमुपचारमात्रमित्यर्थः । कथमेकोप्यध्यासोन्योन्यात्मता सत्या-
नृते अ † हमिदं ममेदमिति च विशेषणभेदाद्विशिष्टो ऽध्यासः परोपाधौ भि-
द्यते वि ‡ शिष्टाश्च प्रत्ययाः क्रमेण वक्तुर्भवन्तीति प्रतिपत्तितः पूर्वापरीभावं
विशेषणभेदाच्च विशिष्टक्रियाभेदं चाङ्गीकृत्य क्त्वाप्रत्यय इति । तत्राज्ञानमित्युक्ते
ज्ञानाभावमात्रमुक्तं स्यात् मिथ्येत्युक्ते भ्रान्तिज्ञानमिति स्यात् तदुभयव्यावृत्त्यर्थं
निरुच्य पदार्थौ दर्शयति । मिथ्या च तदज्ञानं चेत्यादिना ।   ,, १९

ननु कथं मिथ्याज्ञानमध्यासस्योपादानम् । तस्मिन्सत्यध्यासस्योदया-
दसति चानुदयादिति ब्रूमः । नन्वध्यासस्य प्रतिबन्धकं तत्त्वज्ञानं तदभावश्चा-
ज्ञानमिति प्रतिबन्धकाभावविषयतया ऽज्ञानस्याध्यासेनान्वयव्यतिरेकावन्यथा-
सिद्धौ । नैतत्सारम् । पुष्कलकारणे हि सति कार्य्योत्पादविरोधि प्रतिबन्धकम् ।
नचाध्यासपुष्कलकारणे सति तत्त्वज्ञानं कार्य्यप्रतिबन्धकतया ज्ञायते किंत्वसत्ये-
वाध्यासकारणे तत्त्वज्ञानोदयः । तस्मान्नाज्ञानान्वयव्यतिरेकौ प्रतिबन्धकाभाव-
विषयौ । तथापि विरोधिसंसर्गाभाव इति चेन्न । कार्य्यस्य कारणापेक्षा हि प्रथममुत्प-
द्यते न विरोधिसंसर्गाभावापेक्षा । तस्मात्प्रथमापेक्षितकारणक्लृप्तिमेवान्वयव्यति-
रेकौ न्यायसहितौ कुर्व्वाते । ननु क्लृप्तं विषयेन्द्रियादिदोषः कारणमिति । सत्यम् ।
निमित्तं तु तत् उपादानापेक्षायामज्ञानमनुप्रविशति । सर्वं च कार्य्यं सोपादानं §

* पूर्वापरीभाव इति २ पु० ।   † सत्यानृतेऽहमिदमित्येवं पुस्तकत्रये ऽपि पाठः ।
‡ विशिष्टार्थप्रत्ययाश्च क्रमेणेति २ पु० ।   § भावेतिनास्ति १ पु० ।

भावकार्यत्वात् घटादिवत् इत्यनुमानात् । क्रियागुणादेरपि साश्रयस्यैवोत्पत्तेरु-त्पद्यमानाश्रयस्यैवोपादानत्वात् । नन्वात्मान्तःकरणं वा भ्रान्तिज्ञानोपादानं भविष्यति न । आत्मनो ऽपरिणामित्वात् अन्तःकरणस्य चेन्द्रियसंयोगादिसापेक्षत्वात् मिथ्यार्थे च प्रत्ययमात्रविपरिवर्तिनि तदयोगात् अधिष्ठानज्ञानेनान्यथासिद्धत्वाच्च तदन्वयव्यतिरेकयोरन्तःकरणस्य जडत्वादज्ञातृत्वात् आत्मनो ऽभ्रान्तत्वप्रसङ्गाच्च । तस्मान्मिथ्यार्थतज्ज्ञानात्मकं मिथ्याभूतमध्यासमुपादान-कारणसापेक्षं प्रत्यनाश्रयस्थानतया काचादिनिमित्तकारणेषु भिद्यमानेषु मिथ्याभूतस्यैव सर्वकार्यस्वभावानुकूलस्य सर्वत्रानुगमादज्ञानस्यात्माश्रयतया भ्रान्तिज्ञानाश्रयकोटिनिक्षिप्तत्वाच्च मिथ्याज्ञानमेवाध्यासोपादानं नात्मान्तःकरणकाचादिदोषा इति सूक्तम् । आत्माश्रयाध्यासस्य शुक्तिकासंसर्गो विभ्रम इति वक्ष्यते । एकस्यैवाध्यासस्य नैसर्गिकत्वं नैमित्तिकत्वं च विरुद्धमिति चोदयति

४ २२ कथं पुनरिति ।

तत्र प्रथमं तावदध्यासप्रवाहजन्मनोपादानकारणरूपेण नैसर्गिकत्वं कार्यव्यक्तिरूपेण नैमित्तिकत्वमित्यविरोधं दर्शयितुमात्मनि भावरूपमज्ञानं

,, २३ साधयति अवश्यमेषा ऽविद्या शक्तिरिति । अवश्यमिति एषेति च प्रमाण-द्वयवत्तामाह । प्रत्यक्षं तावदहमज्ञो मामन्यं च न जानामीत्यपरोक्षावभासदर्शनात् । ननु ज्ञानाभावविषयो ऽयमवभासः । न । अपरोक्षावभासत्वादहं सुखीतिवत् अभावस्य च षष्ठप्रमाणगोचरत्वात् । प्रत्यक्षाभाववादिनोपि नात्मनि विज्ञानाभावावगमः सम्भवति । मयि ज्ञानं नास्तीतिप्रतिपत्तावात्मनि धर्मिणि प्रतियोगिनि चार्थेवगते तत्र ज्ञानसद्भावात् ज्ञानाभावप्रतिपत्त्ययोगादनवगते ऽपि धर्म्यादौ सुतरामभावानवगमात्षष्ठप्रमाणगोचरे फललिङ्गाभावानुमेयेपि ज्ञानाभावे आत्मादाववगते ऽनवगते ऽप्यात्मनि ज्ञानाभावप्रतिपत्त्ययोगात् । इह च त्वदुक्तमर्थं संख्यां वा शास्त्रार्थं वा न जानामीति विषयव्यावृत्तमज्ञानमनुभूय तच्छ्रवणादौ प्रवर्त्तते । भावरूपाज्ञानप्रत्यक्षवादे तु सत्यप्याश्रयप्रतियोगिज्ञाने ज्ञानाभावस्येव भावान्तरस्यापि नानुपपत्तिर्नियन्तुं शक्यते । न-चाश्रयप्रतियोगिज्ञानभूतमपि साक्षिचैतन्यं भावान्तरस्याज्ञानस्य निवर्त्तकं तस्य ज्ञानविषयप्रतिभासत्वात् । नहि स्वज्ञानेनैव स्वयं निवर्त्तते । नन्वज्ञानस्य व्यावर्त्तको विषयः कथं साक्षिचैतन्येनावभास्यते प्रमाणायत्तत्वा-

द्विषयसिद्धेरिति । उच्यते । सर्वं वस्तु ज्ञाततया वाऽज्ञाततया वा साक्षिचैतन्यस्य विषय एव । तत्र ज्ञाततया विषयः प्रमाणव्यवधानमपेक्षते अन्यस्तु सामान्याकारेण विशेषाकारेण वा ऽज्ञानव्यावर्त्तकतया सदा भासत इत्युपपत्तिसहितमज्ञानप्रत्यक्षं भावरूपमेवात्मन्यज्ञानं गमयतीति सिद्धम् । अनुमानमपि विवादगोचरापन्नं प्रमाणज्ञानं स्वप्रागभावव्यतिरिक्तस्वविषयावरणस्वनिवर्त्यस्वदेशगतवस्त्वन्तरपूर्वकं भवितुमर्हत्य ऽप्रकाशितार्थप्रकाशकत्वादन्धकारे प्रथमोत्पन्नप्रदीपप्रभावदिति । ततश्च ज्ञानेन समानाश्रयविषयं भावरूपमज्ञानं सिद्धम् । शक्तिरित्यात्मपरतन्त्रतया ऽऽत्मनः सर्वकार्योपादानत्वस्य नि * र्वोढृत्वमाह । तत्स्वरूपमात्मतत्त्वं तत्सत्तामात्रानुबन्धिनीत्यर्थः । किंच । अर्थापत्तिरपि भावरूपाज्ञानसद्भावे प्रमाणमित्याह अन्यथामिथ्यार्थावभासानुपपत्तेरिति । विशुद्धब्रह्मात्मनि शुक्तिकायां चाहङ्काररजताध्यासस्यार्थज्ञानात्मकस्य मिथ्याभूतस्य मिथ्याभूतमेव किंचिदुपादानमन्वेषणीयम् । सत्योपादानत्वे कार्यस्य कारणस्वभावतया ऽध्यासस्यापि सत्यत्वप्रसङ्गात् । तस्यापि मिथ्योपादानस्य सादित्वे तथाविधोपादानान्तरकल्पनाप्रसङ्गादनाद्येव तन्मिथ्योपादानमिति कल्पनीयम् । यज्ञानादि स्वयंमिथ्या मिथ्योपादानमात्मसम्बन्धि च तदज्ञानमिति मिथ्याध्यास एव तथाविधाज्ञानोपादानं कारणमन्तरेणानुपपद्यमानस्तत्कल्पयतीत्युक्तम् ।

४ २३

,, २४

ननु येन तस्यातिशय उत्पद्यते स तस्य विषयः । नचाज्ञानेनात्मन्यावरणातिशयजन्म प्रमाणाभावादर्थानुपपत्तेश्च । न तावदवगते नीलार्थे तत्रावरणकृत्यमवगन्तुं शक्यते अनवगते तु † नतराम् । नन्ववगते सति पूर्व्वमा ‡ वृतमित्यवगम्यताम् । न । धारावाहिकविज्ञानगम्येर्थे पूर्वमवगतस्यापि पश्चादवगमदर्शनात् । नन्विदानीमेवावगतत्वं पूर्वमनवगतिं साधयति । न । पूर्व्वानवगतिमविज्ञायेदानीमेवावगतमित्यवधारणायोगात् । ननु पूर्व्वापरप्रत्यभिज्ञायां मध्ये ऽनवगतिरवगम्यत इति । न प्रत्यभिज्ञानुपपत्तिर्मध्ये ऽनवगतिं साधयति । धारावाहिकेप्यात्मनि सदावगते

---

* निर्वोढृत्वमाहेति प्रथमपुस्तके ऽस्ति, निर्बोद्धृत्वमाहेति २ पु॰ तल्लेखकाज्ञानजन्यम् ।

† न सुतरामिति १,३ पु । ‡ आवृत्तमिति १ पु॰ द्वयेऽपि ।

तद्दर्शनात् । मध्ये ज्ञानस्मृत्यभावादनवगतिरवगम्यते इति चेन्न । अवगतेपि स्मृतिनियमाभावात् । तथापि विषयानवगतिः प्रतीयत इति चेत्सत्यं विषयैः सह साक्षिचैतन्ये अज्ञानाध्यासात्प्रतिभासः । नचाध्यस्तस्यावरणमस्ति क्वचिद्रा-द्विवत्प्रमाणगम्यत्वाभावात् । तस्मान्नास्त्यनात्मन्यावरणे प्रमाणम् । नच स्वय-मेव प्रकाशहीनस्य जडस्यावरणार्थोपि सम्भवति । तस्मादतिशयाभावान्नाज्ञान-विषयो ऽनात्मेति । तचाह सा च न जडेषु वस्तुषु तत्स्वरूपावभासं प्रतिब-

४ २४ ध्नातीति । किंत्वन्यदेवानात्मन्यतिशयकार्यं कृत्वा तद्विषयमज्ञानमिति वक्ष्यत इत्यभिप्रायः । तत्र हेतुः प्रमाणवैकल्यादेवेति । अथवा चैतन्यप्रकाशेन जडानां नित्यवदन्वयान्नित्यवत्प्रकाशे प्राप्ते सम्भवत्येवानात्मस्वावरणकृत्य-मित्याशङ्क्याह प्रमाणवैकल्यादेवेति । अनात्मप्रमाणस्य चैतन्यस्य वैकल्या-दावरणादेव विषयानवगतिसिद्धेर्न विषये पृथगावरणं कल्पनीयमित्यर्थः । इतश्च ना ऽनात्मन्यावरणमित्याह रजतप्रतिभासादिति । यद्यात्माश्रयमज्ञान-मनात्मावरणं स्यात्तदावरणविनाशमन्तरेण विषयावभासायोगाद्विषयज्ञाने-नात्मज्ञानं निवर्त्तेत । अतः सत्यामेवात्मन्यऽविद्यायां त्रिष्वपि कालेषु विषय-स्वरूपप्रतिभासदर्शनान्नाऽनात्मावरणमज्ञानमिति भावः ।

ननु शुक्तिकाविषयमज्ञानमन्यदेव तज्ज्ञानात्तन्निवर्त्तते ऽन्यच्चात्मविषय-मज्ञानमात्मनि दृश्यमानमिति । तन्न । आत्माश्रयमात्मविषयं चाज्ञानमन्तरे-णानात्मसु प्रतिविषयं भावरूपाज्ञानसद्भावे प्रमाणाभावाद्विषयाग्रहणस्य प्रमाणवै-कल्यादप्युपपत्तेः । * किञ्च तर्ह्यतिशयमज्ञानजन्यमाश्रित्य बाह्याध्यात्मिकेषु

५ १ वस्तुष्वित्यनात्मविषयमज्ञानं दर्शितमिति तदाह अतस्तत्र रूपान्तरावभासहे-तुरेव † केवलम् । नन्वत्राप्यनुपपत्तिः समाना । कथम् । शुक्तिकाज्ञानं हि रूपा-न्तरावभासं निवर्त्तयत्तदुपादानमज्ञानमपि निवर्त्तयतीति ते मतम् । तत्र कथं शुक्तिकाज्ञानात्सहाज्ञानेनाध्यासे निवर्त्यमाने पुनरात्मन्यज्ञानं दृश्येत । अतः प्रतिविषयमज्ञानभेदो ऽध्यासस्याज्ञानानुपादानत्वं वोपादाननिवृत्तिमन्तरेणा ‡ ध्यासनिवर्त्तिर्वा समाश्रयणीयेति । उच्यते । अस्मिन्पक्षे शुक्तिकादिज्ञाने रज-ताद्यध्यासानां स्वकारणे प्रविलयमात्रं § क्रियते ‖ मुसलप्रहारेणेव घटस्य ।

---

* किञ्चेति १, २ पु॰ । † हेतुरेवेतीति ३ पु॰ केवलमिति तु नास्ति । ‡ निवर्त्यन्त इति २, ३ पु॰ ।
§ उपादेयनिवृत्तिर्वेति अधिकं ३ पु॰ । ‖ मुशलेति १ पु॰ । मुषलेति ३ पु॰ ।

अथवा । मूलाज्ञानस्यैवावस्थाभेदाः रजताद्युपादानानि शुक्तिकादिज्ञानैस्सहाध्यासेन निवर्तन्त इति कल्प्यताम् । कथं पुनर्लोके सहाज्ञानेनाध्यासस्य तत्त्वज्ञानान्निवृत्तेरप्रतिपत्तौ ब्रह्मज्ञानात्सहाज्ञानेनाध्यासस्य निवृत्तिर्दृष्टद्वारेण कल्प्यत इति । नैष दोषः । तत्त्वावभासविरोधिनो ऽग्रहणमिथ्याज्ञानादेस्तत्त्वज्ञानेन निवृत्तिदर्शनादिहापि तत्त्वावभासविरोधितयैव भावरूपाज्ञानादेः कल्प्यमानत्वात्तस्य ब्रह्मज्ञानान्निवृत्तेरुपपत्तेः । नचावरणपक्षोक्तदोषप्रसङ्गः । विषयव्यावृत्तरूपान्तरस्य भ्रान्तिज्ञानेनावगमात् । नन्वेवमात्मन्यपि अज्ञाननिमित्तमावरणकृत्यं नास्ति । कथम् । न तावदावरणं प्रकाशविलोपः स्वरूपस्यानपायात् । नापि सत एव प्रकाशस्य कार्यप्रतिबन्धः । ज्ञानस्य विषयावभासात्मनोदितस्य स्वकार्ये प्रतिबन्धप्रतीत्ययोरभावात् । तस्मान्नैवात्मन्यपि भावरूपमज्ञानमनुपयोगादिति तत्राह प्रत्यगात्मनि तु चितिस्वभावत्वात्स्वयंप्रकाशमान इत्यादिना तस्यानवभास इत्यन्तेन ग्रन्थेन । अयमर्थः । अस्ति प्रकाशत इत्याद्यभिज्ञादिव्यवहारपुष्कलकारणे सति नास्ति न प्रकाशते चेति योऽयमात्मतत्त्वालम्बनो व्यवहारः *स भावरूपेण केन चिदात्मन्यावरणमन्तरेण नोपपद्यते सति पुष्कलकारणे ऽसति चावरणे सन्निहिते घटे प्रकाशत इत्यादिव्यवहारदर्शनात् । अतो नास्ति ब्रह्म न प्रकाशते चेति व्यवहारो ऽन्यथानुपपत्त्या भावरूपमज्ञानं गमयतीत्यर्थापत्तिरनुमानं वा समुदायार्थः । तत्सिद्ध्यर्थमात्मनि प्रकाशत इत्यादिव्यवहारं प्रति पुष्कलकारणतां दर्शयति चितिस्वभावत्वादिति । किं तर्ह्यावरणमिति तत्राह ब्रह्मस्वरूपानवभासस्येति । नास्ति न प्रकाशत इति व्यवहारालम्बनयोग्यत्वस्य व्यवहारकार्यदर्शनादेव कल्प्यमानस्येत्यर्थः । नचाधिष्ठानप्रतिबन्धमन्तरेण तत्र विपर्ययकार्यमुपपद्यते ऽविद्यासम्बन्धादेवावरणस्यानिरूपिताकारता च युक्तेति भावः । ननु प्रमाणवैकल्यादेवाचाप्यग्रहणमिति । नेत्याह अनन्यनिमित्तत्वादिति । अतो ऽनवभासात्पुष्कलकारणे सति परिशेषादिदमायातमित्याह तद्गतनैसर्गिकसिद्धाऽविद्याशक्तिप्रतिबन्धादेव तस्यानवभास इति । मूर्त्तद्रव्यान्तरस्यासम्भवादिति भावः । अतः कार्यदर्शनोन्नेयमावरण-

५ २

,, ३

---

* स्वभावरूपेणेति १ पु॰ ।

कृत्यं विपर्ययं चात्मनि कुर्वाणमज्ञानं भावरूपमेवोभयकारणत्वान्यथानुपपत्त्या

५ ४ कल्प्यत इत्याह । अतः सा प्रत्यक्चितीति ।

नन्वग्रहणमिथ्याज्ञानतत्संस्कारेभ्यो ऽन्यदज्ञानं नाम न पश्यामः । त एव च जीवस्य स्वयंप्रकाशमानमपि ब्रह्मस्वरूपावभासं प्रतिबध्नन्तीति ।

,, ५ नेत्याह सुषुप्तादौ चेति । तत्राप्यविद्याशक्तिः संस्कारशेषं तिष्ठति न संस्कारादय एवाज्ञानमित्यर्थः । कथम् । न तावत्सुषुप्तादौ स्वयम्प्रकाशब्रह्मस्वरूपानवभासः पुरुषान्तरसंवेदनवद् द्रष्टुर्भिन्नत्वादिति शक्यं वक्तुम् एकत्वश्रुतेः । नापि मिथ्याज्ञानप्रतिबन्धात् तत्र तस्याभावात् । नापि तत्संस्कारप्रतिबन्धाद्भ्रान्तिः संस्काराणां तत्त्वावभासप्रतिबन्धकत्वाभावात् सत्स्वपि रजतभ्रमसंस्कारेषु शुक्तिकावबोधदर्शनान्नाप्यग्रहणप्रतिबन्धात् । स्वरूपग्रहणस्य नित्यत्वात्स्वयंप्रकाशमाने संवेदने तद्विषयकादाचित्काग्रहणस्याप्रतिबन्धकत्वात् । नापि कर्म्मणा स्वरूपावभासविरोधिता सर्वदाऽणुमात्रस्यापि चैतन्यस्यानवभासप्रसङ्गात् । अज्ञानेपि तुल्यमिति चेन्न । तस्य स्वविषयचैतन्यावभासं प्रत्यप्रतिबन्धकत्वात् । नचाज्ञानस्येव कर्म्मणां नित्यवत्साक्षिचैतन्येनावभास्यता येन तदवभासकतया साक्षिचैतन्यमप्रतिबद्धं प्रकाशेत । नच कर्म्माणि स्वाश्रयावभासविरोधीनीति प्रमाणमस्ति । संस्कारत्वाच्च कर्म्मणां भ्रान्तिसंस्कारवदप्रतिबन्धकता । तस्मात्सुषुप्तादौ स्वरूपानवभासव्यवहारो ऽग्रहणमिथ्याज्ञानतत्संस्कारकर्म्मभ्यो ऽन्यदेव किंचित्प्रतिबन्धकमज्ञानं कल्पयतीत्यर्थः । ननु द्रव्यान्तरमेव प्रतिबन्धकं कल्प्यतां किमज्ञानकल्पनयेति नैतत् । ब्रह्मज्ञानात्प्रतिबन्धनिवृत्तिमन्तरेण स्वविषयावभासायोगात् ज्ञाननिवर्त्यस्य चाज्ञानत्वात् ।

अत्र कश्चिद्भेदाभेदाभ्यां सर्वसंकरवादी वेदान्तार्थगहनसम्प्रदायहीनो दुर्ज्जनरमणीयां वाचं जल्पति । न किलाग्रहणमिथ्याज्ञानतत्संस्कारेभ्यो ऽन्यत् सकलसंसारबीजभूतमवस्थात्रयेप्यनपाय्याऽऽसंसारविमोक्षात्प्रखण्डायमानमज्ञानं नामास्ति किंतु भ्रान्तिज्ञानमग्रहणं चाज्ञानमिति । अयं प्रष्टव्यः केयं भ्रान्तिरिति । अहंकारादिशरीरपर्यन्ते ऽनात्मनि आत्मबुद्धिरिति चेत् । अहो विस्मरणशीलता सर्वत्रसङ्कीर्णचेतसः । खण्डो गौरित्यादिभेदाभेदप्रत्ययं प्रमाणमुपपयादयन्नाहं मनुष्य इतिप्रत्ययं भेदाभेदविषयं

किमित्युपेक्षसे। नाहं मनुष्यो ब्रह्मास्मीतिप्रत्ययसामर्थ्यादिति चेत्। तन्न। नायं खण्डो गौः किं तु मुण्डो गौरितिप्रत्ययेपि खण्डमुण्डाभ्यां गोत्वस्याऽभेदवत् शरीरब्रह्मभ्यां जीवस्याभेदप्रत्ययस्यापि प्रामाण्योपपत्तेः। इदंरजतवद् भ्रान्तिरिति चेत् न। खण्डो गौरित्यत्रापि तथात्वप्रसङ्गात्। नायं खण्डो गौः किंतु मुण्ड इति व्यक्त्यन्तरे खण्डस्य गोत्वोपाधौ निषेधप्रत्ययसामर्थ्यात्तत्र व्यवहारानुच्छेदात् प्रामाण्यमिति चेत्। तदहं मनुष्य इत्यत्रापि तुल्यम् मोक्षावस्थायामपि सर्वात्मत्वात्तत्र सर्वशरीरेन्द्रियाद्यभिमानव्यवहारानुच्छेदात्। जातिव्यक्तिगुणगुणिकार्यकारणविशिष्टस्वरूपांशांशिसबन्धा यत्र विद्यन्ते तत्र भेदाभेदौ न शरीरात्मनोस्तेषामभावादिति चेत् तर्हि * शरीरशरीरिसम्बन्धोपि गुणगुण्यादिवद्भेदाभेदनिमित्तं किं † न स्यात् अन्यथा सर्वसङ्करवादितया ‡ क्षपणकशिष्यता चिरकालसमुपार्जिता बाध्येत। अस्ति च चेतनस्वरूपशरीरयोः कार्यकारणभावश्चेतनस्वरूपांशस्य ब्रह्मत्वात् अतो न ते भ्रान्तिरस्ति।

किंच। भ्रान्तिज्ञानमन्तःकरणपरिणामश्चेत्तदात्माश्रयाऽविद्या न स्यात्। अन्तःकरणपरिणाम एवात्मनि अध्यस्त इति चेत्तथाप्यन्यथाख्यातिवादिनः संसर्गस्य शून्यत्वादात्माविद्यासम्बन्धो न स्यात्। न चात्मपरिणामो भ्रान्तिः अपरिणामित्वात्। न चाऽज्ञानगुणस्य द्रव्यस्य पुनर्ज्ञानगुणान्तराकारेण परिणामः सम्भवति अवान्तरजातीयस्यैकस्मिन् द्रव्ये गुणद्वयस्य युगपत्समवायायोगात्। नहि पटे शौक्ल्यं युगपत्समवैति। तस्मादनादिसि § द्धमिथ्याज्ञानानभ्युपगमे न काचित्सर्वसङ्करवादिनो ऽविद्यासम्भवति अनादिमिथ्याज्ञानसम्बन्धोऽप्यात्मनि अज्ञानवत्काल्पनिकत्वादाकाशकार्ष्ण्यवदात्मनः कूटस्थतां न विहन्तीत्यलमतिविस्तरेण। अत्र च प्रत्यक्षानुमानार्थापत्तयो ऽनादिभावरूपाज्ञाने प्रमाणत्वेनोपन्यस्ताः। तत्रैवंभूतेन कारणरूपेण कार्यरूपेण च नैमित्तिकत्वनैसर्गिकत्वे न विरुद्धे इत्युपसंहरति। अतो नैसर्गिकोप्यहङ्कार इति अन्योन्यधर्म्मांश्चेत्यादिरध्यासस्वरूपं दर्शयतीत्यन्तो ग्रन्थः स्पष्टार्थः। ५ ६

निष्कलङ्कचैतन्यैकताने निरंशानन्दैकरसे ऽज्ञानादिसाक्षिण्यनादिसिद्धेप्यज्ञानाध्यासे कादाचित्कमध्यासमाश्रित्याह अहमिति तावत्प्रथमोध्यास इति। ,, १२

---

* शरीरिसम्बन्धोऽपीति ३ पु०। † किंनेति २, ३ पु नास्ति।
‡ क्षपणकेति २ पु०। § सिद्धेति २ पु० नास्ति।

नन्विदं रजतमितिवदध्यासे द्वैरूप्यमहमित्यत्रापि वक्तव्यम् अहमिति चैकरूपे-
५ १३ णावभासते अतो नाध्यास इति चोदयति नन्वहमिति निरंशचैतन्यमात्रमिति ।
यथा द्वैरूप्येणाध्याससम्भवस्तथा वक्ष्यत इत्याह यथाध्यस्तांशान्तर्भाव इति ।
नन्वन्तःकरणेन्द्रियाणामात्मनः पृथक्सत्त्वोपलब्ध्यभावादध्यस्ततयैव सिद्धेरा-
त्मतत्त्वावबोधेन च स्वरूपतो विलयश्रवणात्स्वरूपेण संसृष्टरूपेण चात्मन्य-
ध्यस्ततया सिद्धिरस्तु शरीरं पुनरिन्द्रियैरिदंबुद्धिगृहीतत्वात्केवलसाक्षिवेद्यत्वा-
भावादुत्क्रान्तेप्यात्मनि पृथगुपलब्धेर्भूतेषु लयश्रवणाच्च नाध्यस्ततया सिद्धमिति
चोदयति नन्विदमित्यहंकर्तुरिति । शरीरव्यतिरिक्तं ममबुद्धिगृहीतं सुतरामन-
ध्यस्तमित्याह ममेदमिति चेति । शरीरादिपदार्थस्वरूपस्य मिथ्याकल्पितकर्तृ-
भोक्तृप्रमातृदोषसंयुक्तात्मार्थतयैव कार्यतया भोग्यतया प्रमेयतया द्वेष्यतया च
तादर्थ्येनैव सृष्टत्वात्स्वरूपेणापि मिथ्यात्वं स्वप्नदृष्टान्तेनानुमातुं शक्यत
इत्याह उच्यते यदैवाहंकर्त्तेत्यादिना । दार्ष्टान्तिकं दर्शयति । एवमहंकर्तृत्व-
प्रमुख इति ।

द्रष्टरि दृश्यावभासस्याविद्याध्यासत्वे शास्त्रीयविषयप्रयोजनसिद्धिः
फलिष्यतीत्याह अतस्तादृग्ब्रह्मात्मानुभवपर्यन्तादिति । तादृग्ब्रह्मात्मानु-
भवो बन्धनिवृत्तिश्चोपपद्यत इत्यर्थः । विषयप्रयोजनसिद्धौ किमायातमिति
शास्त्रारम्भकर्त्तव्यता सिद्धेत्याह तदर्थविषयवेदान्तमीमांसारम्भ इति । ते
एव ब्रह्मात्मानुभवबन्धनिवृत्ती अर्थः प्रयोजनं विषयश्च यस्य वेदान्तमीमांसा-
रम्भस्येति विग्रहः । सर्वलोकप्रत्यक्ष इत्यन्तस्योत्तरभाष्यस्य तात्पर्यमाह ।
आह कोयमिति । इदानीं विभज्यावान्तरतात्पर्यं कथयति तत्रापीति ।

६ १ लक्षणसम्भावना * परभाष्यमाक्षिपति । यद्येवमिति । किमिति लक्षण-
सम्भावने नापेक्ष्येते † इति तत्राह नह्यनिर्ज्ञातरूपमिति । प्रमाणमेवहि प्रमेयम-
न्यस्यान्यात्मनावभासमध्यासं व्यवस्थापयत् स्वदेशकालोपाधौ सम्भावितंरूपं
सर्वतोव्यावृत्तासाधारणरूपञ्च व्यवस्थापयति किं पृथग्लक्षणसम्भावनोपन्यासेने-
त्यर्थः । नन्वनुमानादिप्रमाणनिर्ज्ञातेषु वस्तुमात्रेषु विशेषलक्षणसम्भावने पृथग-
,, ३ पेक्ष्येते इत्यत आह दुःसंपादमिति । विशेषत ‡ इत्यसाधारणाकारेण व्यावृत्त-

---

* [illegible] २ पु० ।   † नापेक्ष्यते-इति १ पु० ।
‡ असाधारणाकारव्यावृत्तमर्थेति १ पु० ।

तयेत्यर्थः । तत्र द्रष्टुरन्यस्य दृश्येनान्यात्मनावभासो विद्यत इत्येतावति प्रमाणं वक्ष्यते न तस्याविद्याभ्रान्त्यध्यासमिथ्यात्वे अतस्तत्प्रमाणेन न सिध्यतीति परिहरति उच्यते न देहेन्द्रियादिष्वित्यादिना । ६ ३

* नन्वन्यस्यान्यात्मनावभासप्रमाणेनैव तन्मिथ्यात्वमपि सिध्यति प्रमेयैक्यादिति चोदयति तत्कस्य हेतोरिति । नानुभवादेवेति परिहरति लोक इति । ननु प्रमाणे सति किमित्यनुभवाभावः प्रमाणभेदादित्याह बाधे सतीति । बाधानुपपत्तिर्मिथ्यात्वे प्रमाणं प्रत्यक्षानुमानव्यवहारानुपपत्त्यागमा आत्मन्यनात्मावभासे प्रमाणमिति भावः । नन्विहापि बाधनिमित्तमितरेतरविवेकमन्तरेणान्यस्यान्यात्मतावभासोयमित्यवगन्तुं न शक्यते अन्यथा स्वस्यैव स्वेनात्मनावभासः किं न स्यादिति नेत्याह नेह स विद्यत इति । यौक्तिकज्ञानादिना परोक्षविवेकमाश्रित्य परस्परात्मतावभासनिश्चयो ऽपरोक्षबाधस्य भ्रान्तिप्रतिभासोच्छेदिनोऽभावान्न स्पष्टो मिथ्यात्वाध्यवसाय इति भावः । अतो ऽविद्यात्वस्पष्टीकरणाय लक्षणमेव वक्तव्यमित्याह तस्मादध्यासस्येति । तर्हि लक्षणप्रमाणाभ्यामेव वस्तुनिर्णयसिद्धेः प्रमाणेनैवासम्भावनानिराकरणात्सम्भावना पृथङ्न वक्तव्येति चोदयति नन्वेवमपीति । सत्यपि प्रमाणसामर्थ्ये प्रत्यक्षावभासमपि असम्भाव्यमानतया निराकृतमनुभूयत इत्यनुभवमेवावलम्ब्य परिहरति सत्यमेवमिति । औत्पत्तिक इति अदृष्टव्यतिरिक्तकारणशून्य इत्यर्थः ।

ननु प्रमाणेनैव क्वचिदसम्भावना तिरस्क्रियते यथाकाशगमने पक्षिणां क्वचिदसम्भावनया प्रतिभासो ऽपरोक्षोपि निरस्यते यथा सवितृशुष्यादौ तत्रात्मन्यात्मावभासः कं पक्षमवलम्बतामित्यसम्भावनापक्षमेवेति विशेषं दर्शयति एवमन्निषयेऽसङ्ग इति । अधिष्ठानस्याध्यस्यमानेन सहैकज्ञानविषयत्वं वक्तव्यम् तदभावान्नाध्याससम्भव इत्याह अविषय इति । द्रष्टुर्व्यतिरिक्तस्य कृत्स्नस्य कार्यकारणसंघातस्याध्यासात्मकत्वेन द्रष्टुरेव काचादिवद्दोषानुषङ्गो वक्तव्यः तदभावान्नाध्याससम्भव इत्याह † असङ्ग इति । अधिष्ठानस्याध्यस्यमानेन गुणावयवसादृश्यं वक्तव्यम् तदभावान्ना- " १४

---

* नन्वन्यस्यात्मतावभासेति २ पु॰ । † असङ्गत इति १. पु॰ ।

६ १४ ध्याससम्भव इत्याह केनचिदपि गुणादिनेति । अधिष्ठानयाथात्म्याव-
भासो ऽध्यासविरोधी तद्भावाच्च ना * ध्याससम्भव इत्याह निष्कलङ्कचैतन्य-
तयेति ।

नन्वात्मन्यविषयादिरूपे ऽनवगते नासम्भावनाबुद्धिः अवगते तु नाध्यास एव तिष्ठति कुतो ऽसम्भवनाबुद्धिरिति । नैतत्सारम् । आत्मन्यविषयादिरूपे परोक्षावभासो ऽसम्भावनाबुद्धिहेतुः अपरोक्षावभासोध्यासस्य निवर्त्तक इत्युक्तत्वात् । उपसंहरति तन्मा शङ्कीति । तदुच्यते । तत् त्रितयं लक्षणं सम्भावना प्रमाणं क्रमेणोच्यत इत्यर्थः । अनन्तरभाष्यस्य तात्पर्यमाह आह कोयमिति । तन्त्रेणेति । युगपदर्थद्वयविवक्षयेत्यर्थः । उभयस्य चेह सम्भवादिति । लक्षणप्रश्नस्य सम्भावनाक्षेपस्य च स † म्भवादित्यर्थः । उभयमक्षेव विवक्षितं चेत्सम्भावनैव प्रथमं किन्न प्रदर्श्यत इत्यत्राह तत्रापीति । स्वरूपमाख्यायेति प्राथम्ये हेतुः ।

नन्वाहेति परोक्तिकथनं किमर्थमिति । अर्थनिर्णयप्रधानत्वाद्वादकथाशास्त्रम् तच्च प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वाद इति । वादिप्रतिवादिभ्यां गुरुशिष्याभ्यां वा पक्षप्रतिपक्षपरिग्रहेण क्रियमाणार्थनिर्णयावसाना वादकथाच प्रवृत्तेति दर्शयितुं परोक्तिकथनमित्याह तत्रैवम्भूते विषय इत्यादिना । तेनाक्षिप्रमाक्षेपरूपमप्यभिप्रायमनेन पृष्टमेवेति मत्वा प्रत्युक्तं पुनरसावाक्षेपरूपेण विवृणोतीत्याक्षेपमवतारयति व्याख्येयम् । ननु शास्त्रेषु जल्पवितण्डाभिप्रायेणापि परोक्तिरस्तीति नेत्याह सर्वत्रैवंविध इति ।

ननु लक्षणवाक्ये लक्ष्याभिधायिनः पदस्याभावात्साकाङ्क्षं वचनमनर्थकमित्याशङ्क्य वाक्यं पूरयति प्रश्नवाक्यस्थितमिति । ननु परस्य परात्मना ऽवभासोध्यास इति वक्ष्यति तत्र कथमेकेनैव परशब्देन लक्षणं पूर्यत इत्यत्राह तत्र परत्रेत्युक्त इति । उत्तरो ग्रन्थः स्पष्टार्थः । ननु घञादीनां भावे
,, २६ विधानात्कथं कर्मपरतया स्मृतिशब्दो व्युत्पाद्यत इति ‡ तत्राह असंज्ञायाम-

* संभवशब्दो नास्ति ३ पु० । † सम्भावादिति १ पु० ।

‡ तत्राह सज्ज्ञायामपीति । कर्तृव्यतिरिक्तकारकेषु संज्ञायामपि प्रयोगो भवतीति १ पु० शोधकेन पश्चात्कल्पितम् ।

पीति । कर्तृव्यतिरिक्तकारकेषु * संज्ञायामिवाऽसञ्ज्ञायामपि प्रयोगो भवत्य-कर्त्तरि च कारके संज्ञायामितिसूत्रादित्यर्थः ।

ननु स्मर्यते चेद्रूपशब्दः किं † मर्थमस्मर्यमाणे वस्तुन्युपमासमासार्थ इत्याह स्मर्यमाणरूपमिवेति । ननु किमुपमासमासेन स्मर्यत एवेदं रजतमिति नेत्याह न पुनः स्मर्यत एवेति । ननु चक्षुरादिप्रमाणाभावात्परिशेषात्स्मृतिरिति नेत्याह स्पष्टं पुरोवस्थितत्वावभासनादिति । यथान्यत्रेदं रजतमऽयं घट इत्यादावितरेतरसंसृष्टौ सामान्यविशेषावपरोक्षाववभासेते तथेहापि प्रतिभासः । नहि परमार्थेदंरजतसंवेदनाकारावभासन्यूनतामन्तरेण संसर्गसंविदंशाभावः शक्यते वक्तुम् । ७ १

अर्थाभावे कथमपरोक्षा संविदिति चेत् न । यथासंविदवभासाधीनत्वादर्थसत्तानिश्चयस्य । नह्यर्थसत्तानिश्चयाधीनः संवित्सत्तानिश्चयः अर्थसत्तानिश्चयस्यापि निश्चयान्तराधीनत्वप्रसङ्गात् । ननु नेदं रजतमित्युत्तरसंवेदनादर्थाभावोपि निश्चितः । न । तत्रापि पूर्वसंवेदनेन सद्भावविषयेण विरोधात् । इदंरजताभावसंवेदनानामविवेककल्पनयोत्तरज्ञानेपिसंसर्ग ‡ संविदभावः किं न स्यात् व्यवहारसंवादज्ञानादुत्तरज्ञाने संसर्गसंवित्सद्भावश्चेत् न अर्थक्रियासंवादज्ञानादर्थसंवित्सद्भावनिश्चय इति वदतः संवित्प्रत्यक्षत्व- § वादहानात् । अर्थक्रियासंविदोपि संविदन्तराधीनसद्भावनिश्चयप्रसङ्गात् ।

ननु सम्प्रतिपन्नोर्थाभावः । न । यथाप्रतिभासमेव मिथ्यारजतस्योत्तरज्ञानेन निरसनयोग्यस्योपगमात् लौकिकपरमार्थदृष्टरजतप्रतियोगिकाभावविषयत्वाद्रजते त्रैकाल्याभावज्ञानस्येति संविद्द्वयानुरोधेन व्यवस्थासिद्धेरन्यतरसंविदपह्नवायोगात् तथाचोभयसंविद्विषयानुभवो नास्त्यत्र रजतं मिथ्यैव रजतमभादिति । नन्वपरोक्षशुक्तिकाज्ञानाविवेकाद्रजतमपरोक्षतया प्रतिभासत इति नेत्याह स्पष्टमिति । केयं स्पष्टता नाम । विवेकज्ञानसमयेप्येतावन्तं कालमिदं रजतमिति अभादिति संसृष्टावभासत्वेन प्रत्यभिज्ञायोग्यता । अन्यथा तद्रजतमेतावन्तं कालमितो ऽविविक्तमिति प्रतीयात् अथ वा तज्ज्ञानात्तत्र प्रवृत्ति- ,, २

---

* सञ्ज्ञायामिवासञ्ज्ञायामपीति ३ पुस्तके शोधनेन कृतम् ।

† किमर्थ इत्यस्मर्यमाणे—इति २ पु॰ ।

‡ सम्वेदनाभाव इति २ पु॰ । § त्वप्रत्ययेनास्ति २ पु॰ ।

रिति पदार्थांशज्ञानतत्प्रवृत्त्योर्नियमात् इहापिसंसर्गप्रवृत्तिनिमित्ततासंसर्गज्ञानस्य स्पष्टतेति पूर्वदृष्टावभास इति स्पष्टार्थः ।

यदा ज्ञानविशिष्टोऽर्थ एवाध्यासस्तदा स्मर्यमाणसदृशोन्यात्मनावभा-
९ ३ स्यमानो ऽन्यो ऽर्थो ऽध्यास इत्येवंलक्षणपरतया वाक्यं योजितम् । यदा पुनरर्थविशिष्टं ज्ञानमेवाध्यासः तदा स्मृतिसमानोन्यस्यान्यात्मनावभासोऽध्यास इत्येवंलक्षणपरतयापि तदेव वाक्यं योजयितुं शक्यत इत्याह यतोऽर्थादिति । अर्थाद्वाक्यसामर्थ्यादित्यर्थः । कथमित्यादिः स्पष्टार्थः । ननु न स्मृतिश्चेद् भ्रान्तिः प्रत्यक्षज्ञानवत् न पूर्वानुभवजन्यत्वमित्याशङ्क्य सम्प्रयोगमात्रजन्यज्ञानादन्येषां सर्वेषामविशिष्टं पूर्वप्रमाणजन्यत्वमन्वयव्यतिरेकसामर्थ्यादित्याह नह्यसम्प्रयुक्तावभासिन इति ।

ननु संस्कारजन्यत्वमुपगतं चेदन्यसम्प्रयुक्ते चक्षुषि यदनन्तरमन्यविषयं ज्ञानमुत्पद्यते सा स्मृतिरेव तद्व्यवधानेन तु यज्ज्ञानमुत्पद्यते तदनुमानादि प्रमाणमिति प्रमाणस्मृतिद्वैराश्यमेव विज्ञानस्य न तृतीयं मिथ्याज्ञानं नामास्तीति अख्यातिवादी प्रत्यवतिष्ठत * इत्याह † अपर आहेत्यादिना । ननु स्मृतिश्चेद्गवादिस्मृतिवत्स्वार्थं गृह्यमाणाद्विविच्य स्मरामीति दर्शयेदित्यत आह प्रमोषस्त्विति । ननु शुक्तिकासम्प्रयोगे सादृश्याद्रजतं किमिति स्मर्यते अतिसादृश्याच्छुक्तिकान्तरमेव स्मर्यतामिति नेत्याह इन्द्रियादीनामिति । ननु मा भूत् स्मृतेः प्रमोषात्स्वार्थविवेकता ग्रहणं तु स्वार्थं स्मर्यमाणाद्विवेचयेदिति नेत्याह सम्प्रयुक्तस्य चेति । ननु स्मृतिग्रहणयोर्यौगपद्याभावात्क्रमवर्त्तित्वे पूर्वज्ञानं व्यवधानान्न प्रवृत्तिहेतुः । नच सामान्यमात्रज्ञानाद्विशेषमात्रज्ञानाद्वा प्रवृत्तिरित्यत आह तेन दर्शनस्मरणयोर्निरन्तरोत्पन्नयोरिति । निरन्तरोत्पत्तिरेव प्रवृत्तिहेतुरित्यर्थः । नन्विदं रजतमित्यभादिति संसर्गप्रत्ययः प्रत्यभिज्ञायत इति नेत्याह अनुत्पन्न एवैकत्वावभास इति ।

जन्मान्तरानुभूतं न स्मर्यत इतिभाष्यवचनादस्मर्यमाणत्वाच्च बालस्य
" १४ तिक्तस्मृतिः कथमिति चोदयति नन्वनास्वादिततिक्तरसस्येति । ‡ जन्मान्त-

* इत्याहेत्येतावन्मात्र नास्ति २,३ पु· । † अपरमाहेत्यादिनेतीति ३ पु· ।
‡ जन्मान्तरानुभूते–इति २ पु· ।

रानुभूततिक्तस्मृतिः कल्प्यत इत्याह उच्यत इति । जन्मान्तरानुभवस्याप 1 15
कारितामाह अन्यथा * ननुभूतत्व एवेति । किमिति तर्हि जन्मातरानुभूतं
किञ्चिदेव स्मर्यते न सर्वमिति दोषबलादित्याह तस्मात् पित्तमेवेति ।
किमिति तर्हि दोष एव जन्मान्तरानुभूतं सर्वं न स्मारयतीत्यत आह कार्य-
गम्यत्वादिति । नन्वतत्त्वे तत्त्वज्ञानमिति शास्त्रकारेणैव दर्शितः संसर्गभ्रम
इति नेत्याह एतेनान्यसम्प्रयोग इति । वक्तव्ये च पूर्ववादिनाप्यविवेके संस- ,, 18
र्गज्ञानकल्पनागौरवादऽख्यातिरेव युक्तेति भावः ।

उच्यते । केयमख्यातिरिति । न तावत् ख्यात्यभावमात्रं अनभ्युप-
गमादतिप्रसङ्गाच्च । अन्यार्थिनो ऽन्यत्र प्रवृत्तिहेतुर्ज्ञानमिति चेत् । यत्र तर्हि
न प्रवृत्तिर्झटिति बाधश्च तत्र कथं भ्रान्तिः । अथाविविक्तानेकपदार्थज्ञानम्
तर्हीदमिति रजतमिति चापुनरुक्तशब्दद्वयस्मृतिहेतुतया विविक्तावभासनान्न
तस्य सामान्यविशेषयोरविवेकभ्रमः सम्भवति । नच भेदावमर्शेनैकत्वज्ञान-
मनभ्युपगच्छतः सामान्यविशेषयोरविवेकः सम्भवति विविक्ताकारद्वयावभास-
नात् । इतरेतराभावभेदद्वित्वादिसङ्ख्याविशिष्टज्ञानं विवेक इति चेत् गामानय
दण्डेनेति गोदण्डयोस्तत्कारकत्वयोश्चाविवेकभ्रमः स्यात् । तचाप्यानुषङ्गिक-
भेदादिज्ञानमस्तीति चेत् इदमिति रजतमिति चेहाप्यपुनरुक्तशब्दानुषक्ता-
कारद्वयावभासे द्वित्वाद्यवभासो विद्यत एव अन्यथा सामान्याकाराद्विशेषा-
कारस्य विवेकानवभासादिदमित्येव स्यात् † रजतमित्येव स्यात् नेदं रजत-
मिति । किञ्च । प्रतीयमानाकारयोर्नाविवेको ऽपुनरुक्तप्रतिभासादप्रतीयमाना-
काराविवेको न भ्रमो ऽतिप्रसङ्गात् । तस्मान्नाविवेको भ्रमः ।

किञ्च । खण्डो गौरित्यादिप्रत्ययाश्चाविविक्तानेकपदार्थविषया विभ्रमाः
प्रसज्येरन् । नच ग्रहणस्मरणाविवेक एव भ्रमः अहं मनुष्य इति गृह्यमाणा-
विवेकस्य भ्रमत्वात् । सामान्यविशेषादौ ससर्गज्ञानमेवास्तीति चेत् । तथाप्य-
विविक्तानेकपदार्थज्ञानाद् भ्रमत्वमपि स्यात् । नच तत्र संसर्गप्रत्ययोपि
ऐक्यस्य तदालम्बनस्याभावात् । गुणगुण्यादिसम्बन्ध एवालम्बनमिति चेत्
न । प्रत्यभिज्ञाया ऐक्यालम्बनत्वात् । इहापि सादृश्यसम्बन्ध एवेदं रजत-

* अननुभूतत्वेति–इति २ पु॰ । † रजतमिति वास्यादिति २, ३ पु॰ ।

मितिसंसर्गप्रत्ययालम्बनं स्यात् । अस्ति च सामान्यविशेषादीनामिदंरजतयोरिव विवेकप्रत्ययो घटस्य शौक्ल्यमितिविवेकाभ्युपगमात् । किञ्च । ग्रहणमेव स्मर्यमाणात्स्वार्थं किं न विविञ्च्यात् । विशेषदर्शनाभावादिति चेत् । यदि गृहीतमात्रस्य रजताद्भेदोऽस्ति तदा भेदोपाधिता विशेषो धर्म्याकारः प्रतियोग्याकारो वा नान्य इति गृहीत एव भेदाकारो विविक्तः प्रतीयेत । अथ धर्मिप्रतियोग्याकारे गृहीते ऽपीतरेतरापेक्षया तृतीयमेव ज्ञानं भेदं ग्राहयतीति । तर्हि सर्वपदार्थज्ञानानां भेदग्रहणात्प्रागविवक्तत्वाद् भ्रमत्वप्रसङ्गः । अथ न गृहीतमात्रस्य रजताद्भेदः । तर्ह्यैक्यमेवेति संसर्गज्ञानस्य सालम्बनतासिद्धिः ।

किञ्च । स्मृतिर्वा गवयादिस्मृतिवद्गृह्यमाणात्स्वार्थं किमिति न विविञ्-
१ २० च्यात् । स्मरणाभिमानप्रमोषादिति चेत्तत्राह कोऽयं स्मरणाभिमान इति । न तावत् स्मृतिरेव । तस्याः प्रमोषे ज्ञानस्यैवाभावप्रसङ्गात् । स्मृतेरन्यश्चेत् कथमन्यस्य प्रमोषे परिपूर्णमुत्पन्नं ज्ञानं स्वकार्यमर्थविवेकं न कुर्यात् । न चान्यः स्मरणाभिमानो दृश्यत इति भावः । ननु पूर्वानुभवतद्देशकालानामन्यतमेन स इत्याकारेण वा स्मर्यमाणस्य सम्भेदः स्मरणाभिमान इति नेत्याह न तावज्ज्ञानानुविद्धतया ग्रहणमिति । सोऽयमिति प्रत्यभिज्ञाभ्रमे हि सर्वेषामेवैषां स इत्याकारस्य पूर्वानुभवदेशकालानां च स्मरामीतिपर्यन्तानां सम्भेदावगमेऽपि गृह्यमाणेनाविवेकदर्शनादिति भावः । नच पूर्वानुभवसम्भेदः
, २१ स्मर्यमाणे सम्भवतीत्याह नह्यतिवृत्तस्येति । अर्थस्मृतिसंस्कारस्य जनकं यत्पूर्वविज्ञानं तत्स्वयंग्राह्यविशेषणतया स्वेनैव न विषयीक्रियते अर्थमात्रविषयत्वात्पूर्वज्ञानस्य । नहि पूर्वज्ञानेनाविषयीकृते विषये तत्संस्कारजन्या स्मृतिः समुत्पद्यते । तस्मादर्थमात्रविषयज्ञानजन्या स्मृतिरर्थमात्रमेव विषयीकरोति न पूर्वज्ञानेनाविषयीकृतं ज्ञानमपि अन्यथा नीलज्ञानात्पीतेऽपि स्मृतिः स्यात् ।

ननु स्मर्यमाणे पूर्वानुभवसम्भेदः स्वानुभवसिद्धः । सत्यम् । यत्पूर्वानुभवसमयेऽर्थावभासलिङ्गजन्यमर्थज्ञानसद्भावविषयमनुमानज्ञानमुत्पन्नं तदनुमानज्ञानसंस्कार * जनिता स्मृतिः अनुभवसम्भिन्नमर्थं गमयति मूलज्ञानेना-

* जनितस्मृतिरिति ३ पु० ।

प्यर्थज्ञानविषयेण विशिष्टार्थविषयीकरणात् । यस्मादर्थस्मृतिसमनन्तरमनुभव-
विशिष्टार्थस्मृत्यन्तरजननादर्थस्मृतिरेवानुभवसम्भिन्नेति विभ्रमः तस्माच्छुद्धमे-
वार्थमित्युपसंहरति शुद्धमिति । पूर्वज्ञानेन यावन्मात्रं वस्तुमात्रं वा ज्ञानसम्भिन्नं १ २१
वा व * स्तु विषयीकृतं तावन्मात्रमेवावभासयति न स्वमूलज्ञानसम्भिन्नमि-
त्यर्थः ।

नन्वर्थस्मृतिर्वा † ज्ञानसम्भिन्नविषयं स्मृत्यन्तरं वेत्यत्र को विवेक
इति तत्रोदाहरणमाह तथाच पदात्पदार्थस्मृताविति । वाक्यार्थप्रत्ययवि- ,, २२
वक्षया यावदन्त्यपदोच्चारणपरिसमाप्तिस्तावत् क्रमेणोच्चार्यमाणेषु पदेष्वेकैकस्मा-
त्पदादेकैकार्थविषयाणि ज्ञानान्युत्पद्यन्ते ताश्च सम्बन्धिशब्ददर्शनात्सम्बन्ध्य-
न्तरार्थविषयाः स्मृतय इत्यभिहितान्वयवादिनामन्विताभिधान ‡ वादिनां च
संमतम् । ननु को ऽसौ § शब्दस्यार्थेन सम्बन्धो यतः शब्दस्य दर्शनादर्थे
स्मृतिरुत्पद्येत । ‖ अर्थबुद्धिजननसामर्थ्यलक्षण इति चेत् । किं स्मृतिजन-
नसामर्थ्यलक्षणो ऽन्यो वा । ¶ नचान्यः । पदानां पदार्थांशेषु स्मृतिव्यतिरि-
क्तकार्यान्तराभावात् । न च स्मृतिजननसामर्थ्यसम्बन्धादेव स्मृतिजन्म अन्यत्र
सादृश्यादिसम्बन्धान्तरे सत्यन्यतर * दर्शने ऽन्यतरस्मिन् स्मृतिदर्शनात् ।
तस्मान्न शब्दादर्थे स्मृतिरिति । † उच्यते । सम्बन्धज्ञानसंस्कारः शब्ददर्श-
नं चात्र स्मृतिहेतुः नार्थेन सम्बन्धविशिष्टशब्दज्ञानम् येन विशिष्टे स्मृतिसा-
मर्थ्यव्यवस्थापनाद्विशेषणीभूतं सम्बन्धान्तरमिष्येत सम्बन्धविशिष्टान्यतर-
दर्शनाच्चान्यतरस्मृतौ सम्बन्धविशेषणत्वेनान्यतरस्यापि स्मृतिविषयस्य प्रागेव
बुद्धता स्यात् । सादृश्यादिमूलसम्बन्धानां बुद्धिसामर्थ्यलक्षणत्वाभावात् ।
सामर्थ्यसम्बन्धादर्थान्तरत्वं न विरुध्यते । बुद्धिसामर्थ्यसम्बन्धाद् बुद्धि-

---

* वस्तुमात्रं चेति ३ पु॰ ।   † ज्ञानसम्भिन्नविषयेति २ पु॰ ।

‡ वादिनामपीति ३ पु॰ ।   § अर्थेन शब्दस्य सम्बन्धइति ३ पु॰ ।

‖ अज्ञातसम्बन्धाच्छब्दात्स्मृत्युत्पत्तावव्युत्पन्नस्यापि ततो ऽर्थस्मरणप्रसङ्गः, शक्तिज्ञानं च स्मृतिरूपकार्यज्ञानाधीनमित्यन्योन्याश्रयः–इति भाव॰ ।

¶ पदस्य स्मारकत्वं भवतां संमतं चेति चशब्दार्थ इति तत्त्व॰ ।

* तरप्रत्ययो नास्ति ३ पु॰ ।

† शब्दस्य शक्तिरेवार्थे सम्बन्धः, तस्यां च संगतिग्रहणकाले ज्ञातायां समयान्तरे शब्ददर्श-नात्तस्यार्थे शक्तिरूपसंस्कारोद्बोधे सति ततोर्थे स्मृतिर्भवतीति नोक्तान्योन्याश्रय इति परिहरति उच्यत इत्यादिनेति भाव॰ ।

नोत्पद्यत इति च स्ववचनविरोधः । तस्मात्पदेभ्यः पदार्थमात्रेषु बुद्धि-
सामर्थ्यसम्बन्धात् स्मृतय इति सिद्धम् । कुतः पुनस्तत्र ज्ञानसम्भेदाभाव
७ २३ इति तत्राह ज्ञानस्यापीति । शब्दसामर्थ्यविषयतया सम्बन्धित्वेन
स्मृतिविषयत्वे ज्ञानस्यापि शब्दार्थत्वप्रसङ्गादिति । तथेष्टभूभागविषयेत्यादिः
स्पष्टार्थः । ननु स्मृतिज्ञानस्य त्रिकोणत्वादिवत्स्वगतः कश्चिद्विशेषो दृश्यते
८ १ स स्मरणाभिमान इति नेत्याह नापि स्वगतो ज्ञानस्येति । ननु नित्या-
नुमेयेऽपि * लिङ्गविशेषाद्धेतुविशेषानुमानं युक्तमिति । कोऽसौ लिङ्गविशेषः † ।
न तावद्ग्राह्यविशेष इत्याह नापि ग्राह्यविशेषनिमित्त इति । अस्तु तर्हि फल-
विशेषो लिङ्गविशेष इति नेत्याह नापि फलविशेषनिमित्त इति । ननु स्मरा-
मीत्यनुभवः स्मरणाभिमान इत्यत आह यः पुनः क्वचित्कदाचिदिति ।
यदि स्मृतिस्मार्यस्मर्तृविषयशब्दत्रयानुषक्तो ऽनुभवविशेषस्तत् स्मरामीति
यदि वा त्रितयविषयमनुमानज्ञानान्तरमेतत् उभयथापि ग्रहणादित्रितयात्
स्मरणादित्रितयस्य ‡ प्रागेव भेदावगममन्तरेण ग्रहणादित्रितयशब्दव्यतिरिक्त-
स्मरणादिशब्दानुस्मरणं ग्रहणानुमानव्यतिरेकेण स्मरणानुमानं च न सम्भ-
वति विशिष्टाभिधेयावगमनिमित्तत्वाद् विशिष्टशब्दानुस्मरणस्य विशिष्टा-
वगमानुमानस्य चेति प्रागेव स्मरामीत्यनुभवाद्ग्रहणस्मरणयोर्भेदो वक्तव्य
इति भावः । ननु स्मृत्यनुभवयोरर्थमात्रविषयत्वे को भेद इत्यत आह ।
तस्मादिति । कारणविशेषादेवेत्यर्थः ।

कथं वा तव स्मृतेर्ज्ञानानुमानस्य चार्थविशिष्टज्ञानविषयत्वे समाने
विभागावगमः । कारणभेदादिति चेदिहापि तत्समानम् । स इत्याकारेण
स्मृतिर्ज्ञानानुमानाद्भिद्यत इति चेत्कोऽयं स इत्याकारः । परोक्षदेशकाल-
विशिष्टतेति चेदनुमानादिष्वपि प्रसङ्गः । पूर्वानुभवसंभिन्नतेति चेत् । ज्ञाना-
नुमाने § पौरुषेयवाक्यजन्यज्ञाने च प्रसङ्गः । तस्मात्संस्कारजन्यत्वं स इत्या-
,, ११ कार इति । अस्तु तर्हीहापि तथाविधैव स्मृतिरिति नेत्याह ‖ नचेहेति ।

---

* सुरभिधूमविशेषस्याऽगरुजदहनानुमापकत्ववद्ग्राप्यविशेषस्य व्यापकविशेषानुमापकत्व-
मित्यर्थ इति तत्त्व० । † विशेषइतीति ३ पु० ।

‡ प्रागेवेत्यत्र स्मरामीत्यनुभवादितिशेषः–तत्त्व० ।

§ नद्यास्तीरे प्रसूनानि सन्तीत्यादिवाक्यान्नदीतीरप्रसूनविषयज्ञानसत्ता बोध्यते ततश्च
स्वजनकज्ञानसंभिन्नविषयत्वस्य तत्रापि भावान्न भेद इत्यर्थः–इति तत्त्व० । ‖ न चेतीति २ पु० ।

नच स्वप्ने ऽह नीलमिति गृह्यमाणाविवेकः । स्मर्यमाणानामऽन्योन्याविवेके परोक्षमेव सर्वमवभासते । अतो न प्रमाणस्मृतिद्वैराश्यमेव * ज्ञानस्य किन्तु तृतीयं भ्रान्तिज्ञानमपीत्युपसंहरति अतो नान्यसंप्रयोग इति । न चेत् स्मृतिः किं तर्हीदं रजतमिति । ८ १२

नन्वन्यथाख्यातिरेषा । तथाहि । शुक्तिकासंप्रयोगे दोषो † पहितमिन्द्रियं देशान्तरादिगतं रजतम ‡ भिगृह्णाति । तच्च स्वदेशाद्यवस्थितं दोषो पहितेन्द्रियेण गृह्यमाणं शुक्तिकात्मना गृह्यते । नन्वननुभूतमपि यत्किञ्चिदपि दोषोपहितमिन्द्रियं किमिति न गृह्णाति । सादृश्यादिदोषसामर्थ्यादिति वदामः । तस्माद्ग्रहणात्मकमन्यथाज्ञानमिति ।

उच्यते । केयमन्यथाख्यातिः । अन्याकारं ज्ञानमन्यालम्बनं वा वस्तुनो वस्त्वन्तरात्मनावभासो वा अन्यथा परिणते वस्तुनि ज्ञानं वा । न तावत्प्रथमः कल्प इत्याह नन्वेवं सति वैपरीत्यमिति । कुतो वैपरीत्यमित्यत आह नैतत्संविदनुसारिणामिति । सर्वत्र यदाकारं संवेदनं तदेवालम्बनमितिनियमे रजताकारसंवेदनविरुद्धं शुक्तिकालम्बनत्वमित्यर्थः । ननु न संविदाकारतालम्बनता सर्वत्र किन्तु संवित्प्रयुक्तव्यवहारविषयेति चोदयति ननु शुक्तेः स्वरूपेणापीति । ,, १६

इदं तावदयुक्तम् । नहि व्याघ्रसर्पादिज्ञानाद्दण्डादिष्वादीयमानेषु व्याघ्रादिज्ञानस्य दण्डाद्यालम्बनम् । नच द्रव्यगुणादिज्ञानप्रयुक्त्या द्रव्यगुणादिष्वादायमानेषु द्रव्यादीनामन्योन्यज्ञानालम्बनत्वं प्रसिद्धम् । तस्मात् तदाकार एवालम्बनमिति नान्याकारं ज्ञानमन्यालम्बनमन्यथाख्यातिरिति बहिरेवोपसंहर्त्तव्यम् । अस्तु तर्हि वस्तुनो वस्त्वन्तरात्मनाऽवभास इति तत्राहाथ तथारूपावभासनमिति । न तावदत्यन्तभेदवादिनां संसर्गः परमार्थः ततश्चानिर्वचनीयानभ्युपगमाच्छून्य एव संसर्गः प्रकाशेत । एवं खण्डो गौरित्यादिसंसर्गप्रत्ययाः सर्वे एव विभ्रमाः प्रसज्येरन्निति बहिरेवैकः पक्षः प्रतिवक्तव्यः ।

---

* विज्ञानस्येति २ पु॰ । † उपहृतमिति २, ३ पु॰ ।

‡ अभिस्थाने अपिः २ पु॰ ।

८ १९ अथ भेदाभेदवादी संसर्गसत्यतां ब्रूयात्तत्राह यदि पारमार्थिकमिति । खण्डो गौरित्यादिवत्सर्वस्य भेदाभेदान्न क्वचिदपि भ्रान्तिबाधौ सर्वत्र वा तौ स्यातामित्यर्थः । अस्तु तर्ह्यन्यथापरिणते वस्तुनि ख्यातिरन्यथाख्याति-रिति तत्राह अथ शुक्तेरेवेति । शुक्तेः परिणामनिराकरणग्रन्थः स्पष्टार्थः ।

९ २ अथ पुनर्दुष्टकारणजन्यायाः प्रतीतेरित्यादिना ऽन्यथाख्यातावेव परिणामप्रकारभेदो निराक्रियते ख्यात्यन्तरानिराकरणं वा । कथम् । अत्राहात्मख्यातिवादी बुद्धेरेव रजताकारो न बहिरिति । कुतः । संप्रयोगव्यतिरेकेणापरोक्षत्वाद् बुद्धिवत् । कथम् । विज्ञानस्य रजताकारः प्राप्तः । संस्कारसामर्थ्यादिति वदामः । तथाहि । यस्यां ज्ञानसन्ततौ यदा कदाचित्पूर्वं रजतज्ञानमुत्पन्नं तदेव संस्कार उच्यते । नच विज्ञानजन्यो ऽन्येषामिव स्थायी क्षणिको वा ऽन्यः कश्चिदस्य संस्कारो विद्यते विज्ञानमात्रवादात् । स चानेकज्ञानव्यहितोपि कदाचित्सजातीयं रजतज्ञानान्तरमुत्पादयति शालिबीजमिवानेकाङ्कुरादिकार्यव्यवधानेन पुनः सजातीयबीजान्तर * निमित्तमिति । अथवा तज्जन्यज्ञानसन्तान एव संस्कारः स च तथाविधज्ञानान्तरादित्यनादिवासनाप्रापितं रजतं बुद्ध्याकारो बहिर्वदवभासत इति ।

† स वक्तव्यः किं तद्रजतं जायते न वेति । ‡ नचेज्जायमानस्वरूपं न स्यादाकाशवत् । जायते चेत् नार्थादर्थान्तराभावात् । अथ ज्ञानादेव दुष्टकारणजन्याद्रजतोत्पाद इति । तदाह अथ पुनर्दुष्टकारणजन्यायाः प्रतीतेरेव रजतोत्पाद इतीति । जनकप्रतीते रजतात्पूर्वकालत्वादतद्विषयत्वात्प्रतीत्यन्तरस्यादुष्टकारणस्य तद्विषयत्वे सर्वप्रतीतिविषयत्वप्रसङ्गात् । दुष्टकारणप्रतीतेश्च रजतजन्यतया तदालम्बनत्वे रजतस्यार्थक्रियावत्तया सत्त्वप्रसङ्गात् । अतज्जन्यत्वे तद्विषयत्वाभावादप्रतीतमेव रजतं स्यादिति भावः । अन्यथाख्यातिं निराकृत्या ऽख्यातिवादी स्वपक्षमुपसंहरति तदेवं पारिशेष्यादिति ।

,, ९ अख्यातिदूषणमप्युक्तमनुस्मारयति ननु स्मृतेरिति ।

ननु न स्मृतिर्नापि ग्रहणं चेदऽलौकिकमिदं ज्ञानं कथमिति चोदयति

---

* बीजान्तरमित्यथवेति २, ३ पु॰ ।

† स च वक्तव्यइति ३ पु॰ ।

‡ नचेज्जायते जायमानज्ञानस्वरूपमिति २ पु॰, नचेज्जायमानज्ञानेति ३ पु॰ ।

*का तर्हि गतिरिति । † किं ‡ सामग्र्यं पृच्छसि किं वा ज्ञानमथ विषयमिति । ९ १०
यदि सामग्र्यं तत्राह नेन्द्रियज्ञानादित्यादिना । नन्विन्द्रियसंस्कारौ चेत्सामग्री सम्यक्ज्ञानमेवेदं स्यात् स्मृतिग्रहणवदिति चोदयति कथमेतदिति । दोषसहकृतत्वात् तृतीयमिदं सामग्र्यमित्याह । उच्यते कारणदोष इति । ननु दोषः प्राप्तकार्यस्य प्रतिबन्धको § नाधिक्ये हेतुरिति तत्राह कार्यगम्यत्वादिति । नचानादेः कार्यानुदयस्य हेतुर्दोषः । कृत्याभावात् । किन्तु व्याध्यादिवद्विपर्ययकार्यहेतुर्दोष इति । ननु दोषः संस्कारोद्बोधकृच्चेन्न ‖ सामग्र्यामन्तर्भवतीति । न तृतीयमिदं सामग्र्यमिति तत्राहातः संस्कारदुष्टकारणसंवलितेति । अथ ज्ञानस्यैक्यं चोद्यते तत्राह सा चैकमेव ज्ञानमिति ।

नन्विदमा संप्रयोगादन्तःकरणपरिणामज्ञानमेकमुत्पद्यते न तद्रजतं तत्ससर्गं वा विषयीकर्त्तुमीष्टे । मिथ्यावस्तुनि देशान्तरादिगते वा संप्रयोगानुपपत्तेश्चक्षुरुन्मीलनान्वयव्यतिरेकयोरधिष्ठानज्ञानोपक्षयादन्यथासिद्धेः । नापि संस्काराद्रजतांशावगमः स्मृत्यनभ्युपगमात् । नापि दोषः स्वयमेव कस्य चिज्ज्ञानस्य हेतुर्दृष्टः ज्ञानकारणानामेव कार्यविशेषनिमित्तत्वात् । अतो न रजततत्सम्भिन्नशुक्तिविषयमेकं ¶ ज्ञानं समस्ति । किं त्वविद्यैव**बाह्यदोषनिमित्तकारणापेक्षया रजताकारेण साक्षिचैतन्यस्य रजतावच्छेदज्ञानाभासाकारेण च परिणममाना स्वकार्येण सह साक्षिचैतन्यस्य विषयभावं प्रतिपद्यत इति ते मतम् । तच्च कथमेकज्ञानत्वमिति तत्राह । एकफलमिति । विषयावच्छिन्नं हि फलमवभासते न ज्ञानावच्छिन्नम् । विषयश्च सत्यमिथ्यावस्तुनोरन्योन्यात्मतयैकतामापन्नस्तेनैकविषयावच्छिन्नफलैकत्वोपाधौ सत्यमिथ्याज्ञानद्वयमप्येकमित्युपचर्यत इति भावः । अथ विषयः कथमिति तदाह तस्य चेति । कुतो रजतस्य †† मिथ्यात्वमित्यत आह तेन मिथ्यालम्बन- ,, १७

---

* का पुनर्गतिरिति २ पु॰ ।

† किं करणव्युत्पत्त्या सामग्री पृच्छ्यते उत भावव्युत्पत्त्या ज्ञानमाहो कर्मव्युत्पत्त्या विषय इति विकल्पार्थः—इति तत्त्व॰ ।

‡ सामग्रीमिति ३ पु॰ ।

§ नाधिकहेतुरिति १ पु॰ । ‖ उद्बोधकृच्चेति ३ पु॰ ।

¶ दुष्टलोचनपुरोवर्त्तिद्रव्यसंयोगादिदं मात्रविषयं ज्ञानमुत्पद्यते तदा चेदमाकारावच्छिन्नाविद्याक्षोभः संजायते सा च चक्षुषा सदृशसंदर्शनरागसमुद्बुद्धसंस्कारसध्रीचीना रूप्याकारेण परिणमतइत्यर्थ इति तत्त्व॰ । ** एकज्ञानमिति १ पु॰ ।

†† मिथ्याज्ञानत्वमिति १ पु॰ ।

मिति । भावाभावज्ञानयोर्मिथ्यात्वप्रसिद्ध्यभावादिदं ज्ञानसमवायिमिथ्यात्वम-
निर्वचनीयार्थतामेव गमयतीत्यर्थः ।

संप्रयुक्तेऽर्थे संप्रयोगो निरपेक्षो ज्ञानकारणं संस्कारश्च पूर्वानुभूतस्मृतौ
निरपेक्षः ततश्च निरपेक्षकारणद्वयजन्यत्वात् * ज्ञानद्वयमेव निरन्तरोत्पन्नमि-
६ १८ त्यख्यातिवादी चोदयति भिन्नजातीयज्ञान इति । ज्ञानभेदे हि निरन्तरोत्प-
त्तावपि न प्रवृत्तिकार्योदयः सम्भवति तत्र यथा वर्णज्ञानेषु क्रमवर्तिषु ज्ञानका-
र्योदयान्यथानुपपत्त्या पूर्वपूर्ववर्णसंस्कारसहितमन्त्यवर्णज्ञानमेव हेतुत्वेन
कल्प्यते कारणयौगपद्याय तथा प्रवृत्तिकार्यानुपपत्तिरेव ज्ञानैक्यं कल्पयति किं
कारणभेदेनेति परिहरति नैष † दोष इति । ननु कारणभेदात्कार्यभेदोऽप्यनु-
मीयत इति नेत्युदाहरणमाह दृश्यते हीति । ननु तत्रापि कारणभेदात्
ज्ञानभेद इति नेत्याह उभयत्रापीति । ननु लिङ्गदर्शनं व्याप्तिस्मृतिश्च लिङ्ग-
ज्ञानकारणं न संस्कार इति नेत्याह । संस्कारानुद्बोध इति । ज्ञानद्वययौग-
पद्याभावादित्यर्थः । तस्मादित्युपसंहरति ॥ ननु प्रत्यभिज्ञायां संप्रयोगः
पूर्वानुभूतस्मृतिश्च कारणं ज्ञानद्वययौगपद्यप्रसङ्गाभावान्न संस्कार इति तत्राहा-
१० १ यमेव न्याय इति । ज्ञानाज्ज्ञानोत्तरोत्पत्तौ व्याप्त्याद्यभावात्संस्कार एव कार-
णमित्यर्थः । ननु प्रमाणान्तरेष्वयं निरपेक्षकारणसमाहारः नाभिज्ञाप्रत्यक्षे
अभिज्ञाप्रत्यक्षं ‡ च रजतज्ञानमिति तत्राह तथा भिन्नजातीयज्ञानहेतुभ्य इति ।
ननु यत्र संस्कारः प्रमाणकारणेन संबध्यते तत्र स्मृतिगर्भप्रमाणज्ञानमेव दृष्टं
न तथेदं रजतज्ञानमिति तत्राह तत्र लैङ्गिकज्ञान इत्यादिना ।

किञ्च । ज्ञानद्वयपक्षेऽख्यातावपरोक्षावभासिनः स्मर्यमाणत्वे सर्वत्र प्रति-
पन्नोपाधौ विषयसत्त्वाभावेन्यथाख्यातौ प्रतिपन्नस्य संसर्गस्य शून्यत्वे पुरोदे-
शाप्रतिपन्नस्य रजतस्य § देशान्तरसत्त्वे चात्मख्यातौ बहिरवभासस्यान्तरत्वे-
,, ४ चानुभवविरोधः स्यान्न तथास्मत्पक्ष इत्याहैवं च सति नानुभवविरोध इति ।
ननु तवाप्यस्तीति प्रतिपन्नस्यानिर्वचनीयत्वे ऽनुभवविरोधः समानः । तन्न ।
इदन्तासंसर्गवद्रजतस्य शुक्तिकासत्तासंसर्गोऽयमवभासते न रजतस्यापरसत्त्वम् ।

---

* ज्ञानद्वयमेतन्निरन्तरेति २ पु॰ ।
† नैषेतीति २ पु॰ ।
‡ चेदं रजतमिति ज्ञानमितीति ३ पु॰ ।
§ देशान्तरत्वे चेति २ पु॰ ।

अथवा त्रिविधं सत्त्वं परमार्थसत्त्वं ब्रह्मणः अर्थक्रियासामर्थ्यसत्त्वं मायोपाधिकमाकाशादेः अविद्योपाधिकसत्त्वं रजतादेरिति परमार्थसत्त्वापेक्षया ऽनिर्वचनीयमिति नानुभवविरोधः यथानुभवमर्थसत्त्वाभ्युपगमात् ।

यस्मात् भ्रान्तित्वव्यवहारः सदसज्ज्ञानयोरनुपपन्नो यतश्च पक्षान्तरेष्वनुभवविरोधो यतश्च ज्ञानद्वय * पारोक्ष्यस्मृतित्वस्मरणाभिमानप्रमोषतद्धेत्वविवेकतन्निमित्तप्रवृत्तयो जन्मान्तरानुभूतस्मृतिश्चेत्यप्रतिपन्नमपूर्वं बहु † कल्पनीयमख्यातावन्यथाख्यातौ चा ‡ न्यत्र प्रतिपन्नस्यान्यत्र सत्त्वमिन्द्रियस्य च जन्मान्तरानुभूतदेशकालव्यवहितार्थग्राहित्वं दोषस्य च तथाविधादृष्टसामर्थ्यं § संसर्गस्य च शून्यस्य प्रत्यक्षतेति प्रमाणविरुद्धं बहु कल्पनीयं अतः सर्वदोषपरिहाराय यथाप्रतिपन्नस्य मिथ्यात्वं नामैकः स्वभावो नास्ति रजतं मिथ्यैव रजतमभादित्यनुभवसिद्धः समाश्रयणीयो ऽविद्योपादानकल्पनायाश्चान्वयव्यतिरेकसिद्धत्वादित्याहातो मायामयमिति । सत्यस्य वस्तुनो मिथ्यावस्तुसंभेदोवभासमानो मायामिथ्याऽनिर्वचनीयख्यातिरध्यास एवायमित्यर्थः । १० ५

अत्र केचिदाहुः । अतो ऽविद्यामयमिति वक्तव्यं न मायामयमिति । विभ्रमाणां तत्त्वज्ञाननिराकार्यतया ऽविद्यात्मकत्वान्मायाविद्ययोर्भेदात् । तथाहि मायास्वाश्रयमव्यामोहयन्ती कर्त्तुरिच्छामनुवर्त्तते न तथा ऽविद्या । प्रसिद्धश्च मायाऽविद्ययोर्भेदो लौकिकानां नहि मायाविनिर्मितहस्त्यश्वरथादावविद्याशब्दं प्रयुञ्जत इति ।

उच्यते । लक्षणभेदाल्लोकव्यवहारसामर्थ्याद्वा ‖ तयोर्भेदः कथ्यते । न तावल्लक्षणभेदादनिर्वचनीयतया तत्त्वावभासप्रतिबन्धविपर्ययावभासलक्षणस्याविशेषात् । ननु मन्त्रौषधादिसत्यवस्त्वेव माया नानिर्वचनीया । न । परिदृश्यमानमिथ्यावस्तुन्येव मायाशब्दप्रयोगात् । पार्श्वस्थस्य मन्त्रौषधाद्यपरिज्ञानात्तत्र मायाशब्दप्रयोगाभावाच्च मन्त्रादेश्च काचादिवन्निमित्तकारणत्वादध्यासोपादानाविद्याकॢप्तिवत्कादाचित्कमायोपादानानिर्वचनीयानादिवस्तुकल्पना ¶ । तत्र च

---

* परोक्षेति ३ पु॰ ।
† कल्प्यमिति २ पु॰ ।
‡ अत्र प्रतिपन्नस्येति २ पु॰ ।
§ संसर्गस्य शून्यस्य च प्रत्यक्षतेति १, २ पु॰
‖ अनयोरिति २ पु॰ ।
¶ कल्पनादिति २ पु॰ ।

*मायां तु प्रकृतिमिति श्रुतौ प्रकृतौ मायाशब्दप्रयोगात् प्रकृतिभूतयोर्मायाविद्ययोस्त†द्विकारयोश्चाध्यासमाययोर्लक्षणाभेदादेकत्वमवगम्यते ।

ननु स्वाश्रयव्यामोहाव्यामोहहेतुत्वाभ्यां लक्षणभेदो दर्शितः । यद्याश्रयो द्रष्टा व्यामुह्यत्येव पार्श्वस्थो मायां पश्यन् । अथ कर्त्ता न तस्य मायावित्वाद्व्यामोहाभावः । किन्तु बाधनिश्चयप्रतिकारज्ञानाभ्याम् । अन्यथा पार्श्वस्थवत्कर्त्तापि व्यामुह्येदेव । अथेच्छया कर्तुं शक्यते माया न तथा ऽविद्येति । न तदपि मन्त्रौषधादौ निमित्तकारणे कर्तुः स्वातन्त्र्यान्न मायायां अविद्यायामपि अङ्गुल्यवष्टम्भादिना द्विचन्द्रकेशोण्डुकादिभ्रमा मन्त्रौषधादिनिषेवणात्स्वप्नभ्रमास्तत्त्वज्ञानेप्यनुवृत्तप्रतिभासाश्च कर्तुरिच्छया निष्पाद्यन्ते ।

नच शास्त्रव्यवहारान्मायाविद्याभेदः । तस्याभिध्यानाद्योजनात्तत्त्वभावाद्भूयश्चान्ते विश्वमायानिवृत्तिरित्यादिश्रुतौ सम्यक्ज्ञाननिवर्त्याविद्यायां मायाशब्दप्रयोगात् । तरत्यविद्यां विततां हृदि यस्मिन् निवेशिते । योगी मायाममेयाय तस्मै विद्यात्मने नम इत्यादिस्मृतौ मायाविद्ययोः सामानाधिकरण्येन तत्त्वज्ञानेन तर्त्तव्यत्वाभिधानात् । मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वादितिसूत्रे सूत्रकारेण स्वप्ने मायाशब्दप्रयोगात् । भाष्यकारेण चाविद्या माया ऽविद्यात्मिका मायाशक्तिरिति तत्र तत्र निर्देशात् । टीकाकारेण चाविद्यामायाऽक्षरम् इत्युक्तत्वात् । ब्रह्मसिद्धिकारेण चैवमेवेयमविद्या माया मिथ्याप्रत्यय इत्युक्तत्वात् । तस्माल्लक्षणैक्याद्वृद्धव्यवहारे चैकत्वावगमादेकस्मिन्नपि वस्तुनि विक्षेपप्राधान्येन मायाऽऽच्छादनप्राधान्येनाविद्येति व्यवहारभेदः । इच्छाधीनत्वतद्वैपरीत्येन वा व्यवहारभेद इति युक्तं मायामयमिति ॥

अस्तु तर्हि प्रतिपन्नोपाधावेव यथाप्रतिपत्ति परमार्थसत्त्वम् कल्पनागौर-

१० ६ वादिदोषपरिहारादिति नेत्याह अथ पुनरिति । ननु ‡कारणदोषवतामेव तद्दृश्यमिति नेत्याह यतो नहीति । तदभावे न तत्रेति § सर्वत्र परमार्थरजत

,, ८ इत्यर्थः । आत्माश्रयाविद्यात्मकत्वेपि सर्वैरेव गृह्येतेति नेत्याह मायामात्रत्वे इति । प्रसिद्धमायावदिति भावः । इदमाकारावच्छिन्नसाक्षिचैतन्यसमाश्रितस्य

---

* मायान्तु प्रकृतिं विद्यान्मायिनं तु महेश्वरमिति श्रुताविति ३ पु० ।

† तदितिपदं नास्ति २ पु॰ ।

‡ करणेति ३ पु० ।

§ सर्वपरमार्थेति १, २ पु० ।

रजतस्य शुक्तिकासंभेदोप्यविद्यात्मक इति सुखादिवदनन्यवेद्यत्वमिति भावः । ज्ञानस्यैव भ्रान्तित्वप्रसिद्ध्यनुपपत्तिः कल्पनालाघवानुभवाभ्यामनुगृहीता मिथ्यार्थज्ञानतां गमयतीत्युक्तम् इदानीं बाधकप्रत्यक्षं स्वयमेव रजतस्य मिथ्यात्वं प्रतिपादयतीत्याह किञ्च नेदं रजतमिति । १० ९

ननु प्रतिपन्नोपाधौ रजतादेरभावं बाधो बोधयति न तस्य मिथ्यात्वमिति चोदयति कथमिति । प्रतिपन्नोपाधावभावप्रतियोगित्वमेव मिथ्यात्वं नाम तच्च बाधकज्ञाने रजतं प्रतिपन्नोपाधावभावप्रतियोगितयावभासत इति प्रत्यक्षमित्याह तेन हि तस्येति । बाधकज्ञानसिद्धस्य प्रतिपन्नोपाधावभावप्रतियोगित्वलक्षणस्य मिथ्यात्वस्य पुनः स्वशब्देन परामर्शाच्च बाधविषयो मिथ्यात्वमित्याह नेदं रजतं मिथ्यैवेति । ननु देशकालान्तरबुद्धिषु सत्त्वादपि रजतस्यैवं बाधः संपत्स्यत इति नेत्याह नच तत्केन चिद्रूपेणेति । ,, १२ नेदं रजतं किन्तु तद्रजतं बुद्धिर्वेति स्यात्परामर्शो न मिथ्यैवेति स्मृतिग्रहणाविवेकत्त्वाद्द्वयादाविवेत्यभिप्रायः ।

ननु कोयं बाधो नाम । * अन्यार्थिनो ऽन्यत्र प्रवृत्तिनिरोधः तर्हि यत्र रजतादौ परिव्राजकादेः प्रवृत्तेरेवानुदयः तत्र बाधप्रसिद्धिर्न स्यात् प्रसिद्धश्च तत्रापि बाधः । न प्रवृत्तिविच्छेदो बाधः किन्तु प्रवृत्तियोग्यताविच्छेदश्चेत् न । पुनरपि तत्रैव रजताविवेकादन्यदाप्रवृत्तिदर्शनात् योग्यताऽविच्छेदात् उदकज्ञानाच्च प्रवर्त्तमानस्य सर्पचोरादिदर्शनेन प्रवृत्तिनिरोधे सर्पादिज्ञानादुदकज्ञानस्य बाधप्रसिद्धिः स्यात् । अविविक्ततया प्रतिपन्नस्य विवेको बाध इति चेत् न । सर्वपदार्थेषु प्रथममविविक्ततया प्रतिपन्नेषु पश्चादितरेतरापेक्षया भेदज्ञानं सर्वत्र बाधः स्यात् । नच पदार्थज्ञानमेव भेदज्ञानम् गृहीतमात्रस्य सति भेदे ऽविवेकाभावप्रसङ्गादित्युक्तम् । अन्यात्मना प्रतिपन्नस्येतरेतराभावप्रतिपत्तिबाध इति चेत् । शुक्लो घट इति प्रतिपद्य घटस्य शौक्ल्यं न द्रव्यं गुण इति ज्ञानं सर्वत्र बाधः स्यात् न तथा प्रसिद्धिरस्ति । समानौ च सर्वत्र भेदाभेदाविलेक्यं प्रतिपद्य भेदप्रतिपत्तिः सर्वत्र बाधः स्यात् । न च ज्ञानस्य प्रध्वंसो बाधः स्वयं क्षणिकत्वात् अर्थस्य च संविद्विषयस्यान्यस्य वा ज्ञानेन प्रध्वंसायोगात् बाधस्य च लोकप्रसिद्धत्वात् । तस्मान्न बाधं पश्यामः ।

---

* यत्रान्येति २ पु॰ ।

उच्यते । अज्ञानस्य स्वकार्येण वर्त्तमानेन प्रविलीनेन वा सह ज्ञानेन निवृत्तिर्बाधः तथाविधानवबोधनिवृत्तौ बाधप्रसिद्धेरिति ॥ स्मृतिरूपशब्देन कारणत्रितयजन्यत्वमुक्तम् । तत्र कारणत्रितयजन्यो ऽन्यस्यान्यात्मतावभासो * लक्षणं तदिदं लक्ष्यं न व्याप्नोतीति चोदयति ननु न व्यापकमिति । कथं लक्षणांशस्याभाव इति तत्राह न हि स्वप्नशोकादाविति । संप्रयोगस्य कारणांशस्याधिष्ठानांशस्य † चाऽभावादित्यर्थः । कस्तर्हि स्वप्न इति तदाहात एवेति । तत्र वासनाजन्यस्मृतिमात्रत्वे भ्रान्तिप्रसिद्धिर्गवयादिस्मृतिवन्न स्यादिति परिहरति न तावत्स्मृतित्वमिति । ननु कारणत्रितयाभावान्न ज्ञानान्तरमपीत्याह ननु स्मृतिरूपत्वमपि नेति ।

(१० १३)

कारणत्रितयजन्यत्वमन्यस्यान्यात्मनावभासं च सम्पादयामीत्याह अत्रोच्यत इति । सम्प्रयोगाभावादपरोक्षावभासित्वाद् ग्रहणस्मृतिमात्रत्वे प्रत्युक्ते तृतीयमिदं विज्ञानं स्वयमेवोक्ताध्यासलक्षणं गमयितुं समर्थमिति वदितुं प्रकारान्तरं पर्युदस्यति उक्तमेतदिति । स्वप्नप्रपञ्चविपरीतप्रमात्रादिविज्ञानसाधनस्यान्तःकरणस्य निद्रादिदोषपूर्वानुभवसंस्कारसहितस्य संप्रतिपन्नकारणत्रितयत्वाद्युक्तं स्मृतिरूपं भ्रान्तिज्ञानमित्याह तदिह निद्रादिदोषोपप्लुतमिति ।

(,, १८)

कथं परत्रपरावभास इति तदाह तस्य चेति । निद्रादिदोषसंस्कारोपप्लुतेनान्तःकरणेन मिथ्याध्यासनिमित्तकारणेनावच्छिन्नचैतन्यस्याऽविद्याशक्तिः पुष्कलनिमित्तकारणसंसर्गादध्यासं प्रति पुष्कलकारणता ‡ मापद्यमाना मिथ्यार्थालम्बनाकारेण विवर्त्तत इति चैतन्यमेव स्वाविद्यया विवर्त्तते अतः सत्यस्य वस्तुनो मिथ्यावस्तुसंभेदावभासलक्षणः परत्रपरावभासो विद्यत इति भावः । तथा जागरणेपि बाह्याधिष्ठानांशसंसृष्टान्तःकरणावच्छिन्नतया बाह्याधिष्ठानसंसृष्टचैत्यन्यस्याविद्याशक्तिर्बाह्याधिष्ठानसंसृष्टरजताद्याकारेण विवर्त्तत इति शुक्तिकाद्यवच्छिन्नं चैतन्यं रजताद्यालम्बनमिति बाह्यालम्बनं रजतादि कथ्यते । सर्वत्र तु चैतन्यमेव साक्षाद्वान्यावच्छिन्नतया वा विभ्रमालम्बनमिति युक्तः परत्रपरावभास इत्यर्थः ।

---

* आत्मानावभास इति २ पु॰ । † चस्थाने वाकारः १ पु॰ ।
‡ आपद्यमानमिथ्यार्थेति १ पु० ।

आकाशवत्सर्वविषयोपरक्ततया सर्वत्रावभासमानमात्मानमनादृत्याहमित्येवावच्छिन्नमात्मानमुपादाय चोदयति नन्वेवं सत्यन्तरेवेति । आत्मैवा- १० २० धिष्ठानं चेदिदं रजतमितिवदहं नीलमित्येव स्वप्नप्रपञ्चो भायादित्यर्थः । * निष्कृष्टाहङ्कारं चैतन्यमात्रमात्मानमादाय † चेत्यस्य च चित्सामानाधिकरण्यावभासं सर्वत्राङ्गीकृत्य परिहरति को वा ब्रूत इति । पुनरप्यहङ्कारावच्छिन्नमात्मनमादाय चोदयति ननु विच्छिन्नदेश इति । इदमिति पृथक्तये-त्यर्थः । पृथक्त्वावभासोऽप्यन्तरेवेत्याह ननु देशोऽपीति । अनवच्छिन्नचैतन्यसंसृष्टतयैव ‡ भेदावभासोपीति भावः । अहङ्कारावच्छिन्नमादायाहं भेद इत्यपि प्रतीयादित्याह अयमपीति । निगूढाभिसन्धिरेव पूर्वमुत्तरमुक्त्वेदानीं सर्वतो § विप्रसृतचैतन्यं सर्वात्मना प्रकाशमानमात्मानं स्पष्टीकुर्वन्नाह नैष दोषो जागरणेपीति । प्रातिभासिकभेदमन्तरेण प्रमाणतो न भिद्यत इत्यर्थः । नन्वहमवच्छिन्नचैतन्यादन्यान्येव विषयगतचैतन्यानि किं न स्युरित्यत आह अन्यथा जडस्येति । स्वयं चैतन्यहीना विषया आत्मावगतिप्रकाशेनापि न ११ ३ संसृज्यन्ते चेन्मयावगता इति सम्बन्धावभासो न स्यादित्यर्थः ।

सर्वत्र चैतन्यावगुण्ठनेपि अहमिदमिति चात्मानात्मानौ विभक्ताविति प्रतिभासः कथमिति तत्राह यः पुनरिति । ननु चैतन्यमेव सर्वत्रान्तर्बहिर्भेदादिरूपेणावभासते चेत्कथन्तस्याखण्डाद्वितीयतेति । चेत्यभेदोपरागनिमित्तभेदमन्तरेण स्वरूपभेदानवगमादित्याह तस्य च निरंशस्येति । निरंशद्रव्यस्याणुत्वमनन्तत्वं वा स्यान्मध्यमपरिणामं चेदं चैतन्यं सर्वत्रावभासते नच निरंशं मध्यमपरिमाणमिति । परोपाधिपरिमाणं चैतन्यमित्यर्थः । जागरणेप्येवं किमुक्तव्यं स्वप्नस्य चैतन्याधिष्ठानत्वमित्यर्थः ।

केवलस्य मनसो बहिःप्रत्यक्षसाधनत्वाभावादथवेत्यङ्गीकरणवादः । ‖ अव्याप्तिः परिहृता इदानीं मिथ्याध्यासभ्रान्त्यविद्याप्रसिद्ध्यभावेप्यन्यस्यान्यावभासो विद्यत इतिलक्षणस्यातिव्याप्तिमाह कथं तर्हि नामादिष्विति । ,, ८

---

* निष्कृष्टः पृथक्कृतः अहङ्कारो यस्मात्तत्तथोक्तम् इति तत्त्व० ।

† अनवच्छिन्नात्मगततयाऽपि प्रतिभासाभावमाशङ्क्य घटः स्फुरति पटः स्फुरतीति चित्समानाधिकततया प्रतीतिरस्तीत्याह चेत्यस्येतीति तत्त्व० ।

‡ भेदावभासोप्यहङ्कारेति १ पु० । § विप्रसृतमिति २, ३ पु० ।

‖ अव्याप्ति परिहृत्येदानीमिति २ पु० ।

अन्यस्यान्या*त्मताज्ञानम†ध्यासलक्षणमियं त्वन्यस्यान्यत्र मानसी क्रियेत्य-
११ ९ तिव्याप्तिं परिहरति सत्यमत एव चोदनावशादिति । ननु ज्ञानमेव तत्र विधीयत इति नेत्याह नहि ज्ञानमिति । विधिजन्यपुरुषेच्छाप्रयत्ननिरपेक्ष-मेव सर्वत्र ज्ञानस्य पुष्कलकारणम् अनिच्छतोप्यनिष्टज्ञानदर्शनात् अतो विधानान्मानसी क्रियेति भावः ।

ननु स्मृतिज्ञानमित्यारभ्य तं केचिदित्यतः प्राक्तनो ग्रन्थः स्पष्टार्थः । नन्वध्यासे वादिविप्रतिपत्तिदर्शनान्नैकरूपेण लक्षणं व्यवस्थापयितुं शक्यत इत्याशङ्क्याधिष्ठानाध्यस्यमानयोः स्वरूपतत्त्वदेशकाल‡विशिष्टेष्वेव वादिनां विप्रतिपत्तिरन्यस्यान्यात्मतावभासमात्रे§लक्षणे न विप्रतिपत्तिः । तन्नु लक्षणं लौकिकसामान्यविशेषादिसंसर्गप्रत्ययानां भ्रमत्वप्राप्तिपरिहाराय । सत्यस्य मिथ्यावस्तुसम्भेदावभास इति बलादापततीत्यङ्गीकृत्य मतान्तराण्युपन्यस्यति तं केचिदित्यादिना । प्रथमस्त्वात्मख्यात्यन्यथाख्यातिविशेषयोः द्वितीयस्त्व-ख्यातेः तृतीयस्तु शुक्तेः स्वाभावरजतात्मना ख्यातिरिति शून्यख्यात्यन्य-थाख्यातिविशेषयोरुपन्यासः । कल्पनामित्यस्य व्याख्या अविद्यमानस्यैवावभा-समानतामिति । यल्लक्षणमवादिष्मेति पूर्वलक्षणशब्देन यच्छब्दस्य सम्बन्धः । अख्यातिवादिनापि मानसं संसर्गज्ञानं संसर्गाभिमानो वा वक्तव्य इत्यभि-
१२ ५ प्रायः । ननु स्मृतिरूपतया कारणत्रितयजन्यत्वमुपेक्षितमिति नेत्याह पूर्व-दृष्टत्वेति ।

नन्वविद्यादिदोषपूर्वभ्रमसंस्काराभ्यामेव पदार्थमात्रज्ञानानि जायमा-नानि‖विभ्रमाः । न सत्यं वस्तु तत्संप्रयोगादि प्रमाणकारणं¶चापेक्षते विभ्रम इति परत्रेतिपदमविवक्षितमिति शून्यवादी मन्यते तत्राह स्मृतिरूपः पूर्वदृष्टावभास इति । न पदार्थमात्रज्ञानं विभ्रमः शून्यज्ञानस्यापि तथात्व-प्रसङ्गात् किन्त्वन्यत्रान्यज्ञानम् ततश्चाविभ्रमेपि पदार्थज्ञाने लक्षणव्याप्तेर्नि-
,, ८ रुपपत्तिकत्वमिति । कथं निरुपपत्तिकोयमित्यादिग्रन्थः स्पष्टार्थः । ननु

---

* आत्मना ज्ञानमिति २ पु॰ । † अध्यासस्येति २ पु॰ ।
‡ विशिष्टेष्वेवेति १ पु० । § लक्षणे इति नास्ति १, ३ पु०,
‖ विभ्रम इति १, पु० । २ पु० विभ्रमा इति पश्चाच्छोधितम् ।
¶ वापेक्षते इति २ पु० ।

संविद्रजतयोरितरेतराधिष्ठानत्वेन साधिष्ठाने भ्रमे सम्भवति न तृतीयस्य सत्यवस्तुनो ऽधिष्ठानत्वकल्पना युक्तेति चोदयति ननु रजते संविदिति । १२ ११
नन्वध्यस्यमानव्यतिरेकेणाधिष्ठानस्य सिद्धिर्वक्तव्या तच्चेतरेतराधिष्ठानत्वे सतीतरेतरापेक्षसिद्धित्वादसमञ्जसं स्यादिति तत्राह बीजाङ्कुरादिवदिति । न बीजाङ्कुरादिष्वितरेतराश्रयता किन्तु कारणपरम्परया ऽनवस्थेति परिहरति । नैतत्सारमिति । नन्विहापि कारणपरम्परेति नेत्याह * इह पुनर्यस्यामिति । नन्विहापि तर्हि रजते संवित् रजतं पूर्वस्यां संविदि सा च स्वविषये स च † पूर्वसंविदीति परम्परामेव कल्पयामीति चेत् । यदि तावत्पूर्वपूर्वमुत्तरोत्तरस्यान्वितत्वेनाधिष्ठानं स्यात्ततः पूर्वस्य पूर्वस्योत्तरस्मिन्नुत्तरस्मिन्नध्यासे युगपदवस्थानात् क्षणिकत्वहानिः । ननु बीजाङ्कुरादावन्योन्योपादानत्वेपि न युगपदवस्थानं दृश्यत इति तत्राह बीजाङ्कुरादिष्वपीति । अभिमतवस्तुसिद्धिः अन्वयिकारणत्वसिद्धिरित्यर्थः । अनन्वितेषु बीजादिष्वन्वयिकारणाकाङ्क्षाया अनिवृत्तत्वादित्यर्थः । अतो ऽन्वयिद्रव्यमेव तत्राप्युपादानं बीजादेरन्योन्यनिनिमित्ततेति भावः । इहापि तर्हि पूर्वस्योत्तरं प्रत्यनन्वितत्वेनैवाध्यासनिमित्तता बीजादिवदिति नेत्याह कुत इदमेवमिति पर्यनुयोगे दृष्टत्वादेवमिति । अयं भावः । बीजाङ्कुरयोः कार्यकारणभावस्य दृष्टत्वाददृष्टेपि तयोरेव कार्यकारणपरम्परा दृष्टपरम्परात्वान्नानवस्थादोषमावहति संविद्रजतयोरधिष्ठानाधिष्ठेयतया निमित्तनैमित्तकभावस्य प्रथममेव कल्प्यत्वात्तयोरेव पूर्वपूर्वनिमित्तनैमित्तिकभावकल्पना त्वन्धपरम्परैव स्यादिति । दृष्टपरम्परामेव दर्शयति दृष्टत्वादेवमिति । तच्चैव दूरं वेति नानवस्थादोषमतिवर्त्तत इत्यन्धपरम्परामेवेत्यर्थः ।

ज्ञाकारावभासत्वात्सर्वभ्रमाणां परत्र परावभास एव भ्रम इत्युक्तं भ्रान्तिज्ञानप्रतिपन्नविषयेर्थे ‡ भ्रान्त्यंशाभावविशिष्टांशान्तरज्ञानस्य बाधकत्वाच्च साधिष्ठानो भ्रम इत्याहापि च न क्वचिदिति । नन्वनुमानाप्रवचनाभ्यां सर्पाभावमात्रमपि कदाचिद्गम्यते न तदभावविशिष्टमंशान्तरमिति तत्राह यत्राप्य- ,, १८

* इहेति नास्ति २ पु॰ ।
† पूर्वस्यां संविदीति २ पु॰ ।
‡ भ्रान्त्यंशान्तराभावेति २ पु॰ ।

नुमानादिति। तत्र प्यभावविशिष्टं वस्तुमात्रं गृह्यते विशेषाकाङ्क्षादर्शनादिति भावः। ननु प्रधानं नास्तीत्यादौ न तदभावविशिष्टं वस्त्वन्तरं गृह्यते तेषा-
१२ २० मन्यत्रानध्यस्तत्वादिति तत्राह प्रधानादिष्वपीति। अथवा * सर्वभ्रमावभासेषु च साक्षिचैतन्यस्यालम्बनस्य विद्यमानत्वाच्छङ्क्यमाननिरधिष्ठाननिरवधिकभ्रम-बाधेपि साक्ष्येवाधिष्ठानमवधिश्च विद्यत इत्याह अथवा सर्वलोकसाक्षिकमिति।

नन्वर्थबाधया ज्ञानस्यापि बाधात् भ्रमबाधे तदवभासिसाक्षिचैतन्य-मपि बाध्येतेति तत्राह तद्बाधे तदनुषङ्ग एवेति। अधिष्ठानत्वेनापि परिशे-षादिति भावः। अत इत्युपसंहारः। तदेव प्रपञ्चयति तेन तन्मात्रस्येति। साधिष्ठानभ्रमसाधनप्रसङ्गेनाध्यस्तस्यापि शून्यतां निराचष्टे नाप्यध्यस्तमप्य-सदिति। प्रत्यक्षतो रजतमिति विशेषप्रतिभासायोगप्रसङ्गादिति भावः। प्रतिभासमात्रनिराकरणे शून्यं न भासत इतिवाक्यस्याबोधकत्वप्रसङ्गात्।
१३ १ ननु अध्यस्तं सर्वं शून्यमेवेति तेपि मतमिति चोदयति नन्विति। शून्याद्व्या-वृत्तिरपि भ्रमस्य कथितैवेत्याह क एवमाहेति। सद्व्यावृत्तिमात्रं भ्रमस्यासत्त्वं नाम न शून्यत्वम् निषेधप्रतियोगित्वादिति भावः। ननु भ्रमस्य स्वकाले ऽनिर्वचनीयत्वेपि बाधादूर्ध्वं शून्यत्वमविशिष्टमिति शङ्कते अथ पुनरिति। सर्ववादिनां सर्वं वस्तु स्वकाले वर्त्तमानमपि विनाशादूर्ध्वं शून्यमेवेति सम्म-तमतो न दोष इत्याह काममिति।

ननु भवतु नाम सर्वस्य वस्तुनो विनाशादूर्ध्वं शून्यता न विभ्रम-गृहीतं वस्तु बाधादूर्ध्वं शून्यं भवति किन्तु देशान्तरादिगतमिति चेत् तत्र किं बाधकज्ञानमेव रजतादेर्देशान्तरे सत्त्वं गमयति † किंवेह बाधानुप-पत्तिरिति न तावद्बाधकज्ञानमित्याह तथाच बाधकज्ञानमिति। नेदं रजतं किन्तु देशकालान्तरे बुद्धौ वेत्यनवगमादिति भावः। यावदभिधानसामर्थ्यं हि वाक्यमर्थं प्रतिपादयति देशान्तरवर्त्तित्वं ‡ त्वनभिहितं न वाक्यार्थ इत्यर्थः।

एवं सति प्रतिपन्नस्य वस्तुनो ऽत्राभावो ऽन्यत्र सत्त्वमन्तरेणानुप-
,, ७ पन्न इत्यर्थापत्त्या वाक्यं गमयिष्यतीति नेत्याह नार्थापत्त्येति। अन्यथाख्यातौ

---

* सर्वधर्मावभासेष्विति २ पु०।
† किंवेहे ति २ पु०।
‡ तुशब्दो नास्ति २ पु।

निषिद्धस्य संसर्गस्यात्मख्यातौ बहिष्ठस्य वान्यत्र सत्त्वमन्तरेण निषेधदर्शना-दख्यातावपि ऋत्विग्विच्छेदे सर्वस्वदानकर्त्तव्यताबुद्धावृत्विग्विच्छेदान्तरनिमि-त्ता * ऽदक्षिणयागसमाप्तिविज्ञानबाधितायां न सर्वस्वदानकर्त्तव्यता तत्र प्रतिपन्नान्यत्र सतीति कल्प्यते। प्रवृत्तिरेव तत्र निरुध्यत इति चेन्न। प्रवृत्तिनिरोधो न बाध इत्युक्तत्वात्। यागादिषु च प्रवर्त्तमानस्य राजचोरादिप्रतिबन्धनिश्च-यात्प्रवृत्तिनिरोधेपि यागादिबुद्धौ बाधप्रसिद्ध्यभावात्सत्यां चाबाधितकर्त्तव्यता-बुद्धौ यदाकदाचित्प्रवृत्तिसिद्धेः ।

किञ्च । लोकेपि प्रतिपन्नोपाधावेव यस्य निषेधस्तस्य निषेधोपाधिस-जातीयोपाध्यन्तरे सत्त्वं न कल्प्यत इत्याह इह भग्नघटाभाववदिति । यथा १३ ७ प्रतिपन्नदेशे निषिद्धस्य घटस्य न देशान्तरे सत्त्वमेवं प्रतिपन्नदेशकालवस्तुस-र्वोपाधौ निषिद्धस्य न प्रतियोगित्वेनाप्रतिपन्नसर्वोपाधौ सत्त्वसिद्धिरित्यर्थः । ननु कथं सर्वत्र शून्यस्य प्रतिपत्तिरिति तत्राह तन्मात्रेणापि तत्सिद्धिरिति । अत्रैवानिर्वचनीयमिथ्यावस्तुसद्भावमात्रेणापि तस्याः प्रतीतेः सिद्धिरित्यर्थः ।

ननु तर्हि पूर्वं रजतमभूदिदानीं नेति घटवत्कालभेदेन निषेधः स्यात्। न लौकिकपरमार्थरजतस्यात्रकालत्रयेपि शून्यत्वात्तदपेक्षया निरुपाधिक-निषेधसिद्धेः । निरुपाधिकनिषेधसामर्थ्याच्च प्रतिपन्नं मिथ्यारजतमिति बाधा-नन्तरं परामृश्यते मिथ्यैव रजतमभादिति । अन्यथा कालभेदे सत्यरजत-मेव स्यान्नायं सर्प्प इत्यभावमात्रविषया हि प्रत्यक्षप्रतिपत्तिर्न देशान्तरे सर्प्प-सत्वं गमयति किमु वक्तव्यं रज्जुरियमित्यधिष्ठाने पर्यवसिता प्रतीतिर्न्न कल्पय-तीति दर्शयति यत्रापि सर्प्पबाधपूर्वक इति । तदेवमित्याद्युपसंहारः । यद्येवं परत्रेत्यादिः स्पष्टार्थः ।

सत्यं विस्पष्टार्थमित्यस्यायमर्थः । स्मृतिरूपशब्देन किं संस्कारज- ,, १६ न्यत्वं पूर्वानुभवसम्भेदो वा स्मृत्या सादृश्यं भ्रान्तेरभिधीयते इति विशये संस्कारजन्यत्वमेवेति स्पष्टीकरणार्थं पूर्वदृष्टस्यावभासो न दर्शनस्येत्युक्तमिति । पूर्वदृष्टसजातीयस्येत्यर्थो निर्वचनीयरजताभ्युपगमाद्भ्रान्तिश्चेत्सत्यस्य वस्तुनो मिथ्यावस्तुसम्भेदावभासो ऽन्यथातिप्रसङ्गादित्याद्या या युक्तिरभिहिता लोकानु-

---

* अदक्षिणायागेति १, ३ पु॰ ।

१३ १६ भवसिद्धत्वादध्यासस्य तथापि युक्त्या न प्रयोजनमित्याह तथाच लोके ऽनुभव इत्यादिना ।

ननु शुक्तिका रजतवदिति च वचनं न भ्रान्त्यपेक्षयोपपद्यते इदं रजतमित्येवावभासनात् । नच बाधापेक्षा तत्र तत्कारणाभावादिति चोदयति ननु न शुक्तिकेति । बाधकज्ञानापेक्षया शुक्तिका रजतमवभासत इति लक्षणप्रदर्शनं बाधकज्ञानविषयतया वा तत्सामर्थ्येन वा सिद्धस्याध्यासस्य मिथ्यात्वस्य लक्ष्यस्य वच्छब्देन अभिधानमिति लक्ष्यलक्षणसङ्गतिरनेन वाक्येन तत्र प्रदर्श्यत इत्याह उच्यते शुक्तिकाग्रहणमिति । ननु मिथ्या रजतमिति विशेषणादन्यत्र सत्यरजतं वक्तव्यमिति नेत्याह मिथ्यात्वमपि रजतस्येति । स्वरूपपरं विशेषणं नान्यव्यावृत्तिपरमित्यर्थः । ननु रजतस्य मिथ्यात्वे तद्धर्मत्वादिदन्ताया अपि मिथ्यात्वात्सर्वमिथ्यात्वेन निरधिष्ठानताप्रसङ्ग इति नेत्याह तत्रासंप्रयुक्तत्वादिति । कथं तस्यासम्प्रयुक्तस्य रजतस्य परोक्षतेत्यत आहा-

१४ १ ऽपरोक्षावभासस्त्विति ।

उदाहरणद्वयस्य तात्पर्यमाह तत्र शुक्तिकोदाहरणेनेत्यादिना अस्मदर्थे अहमिति प्रतिभास इत्यर्थः । प्रतिभासता युष्मदर्थत्वाभावेपि चिदवभास्यत्वं नाम युष्मदर्थलक्षणमस्तीत्याह तदवभास्यत्वेनेति अद्वितीयचैतन्यप्रकाशात्मनि द्रष्टर्यहङ्कारादिसङ्घातस्याध्यस्तत्वादध्यस्यमानव्यतिरिक्तमधिष्ठानमध्यासाधिष्ठानयाथात्म्यविषयप्रमाणज्ञानं द्रष्टा चेति चितयमात्मेति वक्तव्यं ततश्चाधिष्ठानगतो दोषो * द्रष्टृदोषः प्रमाकरणदोषो † वा सर्वं दोषजातमात्मन्येवेति वक्तव्यं तदभावाच्चैतन्यस्याध्यासविषयज्ञानस्याजन्यत्वात्कारणत्रितयजन्यविज्ञानस्यात्मन्यनात्माध्यासे सम्भवात् अगृहीतविशेषस्य सामान्यग्रहणस्याधिष्ठानत्वनिमित्तस्यात्मन्यसम्भवाच्च परचेत्ययोगान्नाध्यासलक्षणं बहिरुक्तमप्यात्मनि सम्भवतीति चोदयति ननु बहिरर्थे इत्यादिनोच्यत इत्यतः प्राक्तनेन ग्रन्थेन । नन्विहापि बहिरर्थवदगृहीतविशेषत्वमर्थत्वसामान्यादनुमीयतामिति नेत्याह नत्विह कारणान्तरायत्तेति । ननु स्वभावावभासेपि

,, १० संवेदनवदगृहीतविशेषांशोपि स्यादिति नेत्याह निरंशस्येति । मध्यमपरिमाणनिराकरणादणुरनन्तो वात्मा निरंश इति ।

---

* द्रष्टृदोष इति २ पु० । † करणगतदोषोवेति २ पु० ।

ननु निरंशोप्याकाशादिवन्न कार्त्स्न्येनावभासत इति तत्राह स्वयंज्यो- १४ १०
तिष इति । यावत्सत्त्वमवभासभावादित्यर्थः । कुतः । अत्रायं पुरुषः स्वयंज्योति-
रात्मैवास्य ज्योतिरित्यादिश्रुतेः । ननु ज्योतिरिति प्रकाशगुणमात्रं नाभिधीयते
आत्मनो गुणत्वप्रसङ्गात् अतः प्रकाशगुणवद् द्रव्यं ज्योतिरिति जन्यज्ञाने-
नापि प्रकाशेनात्मा प्रकाशगुण इति ज्योतिरात्मेति न विरुध्यते । नैतत्सा-
रम् । सर्वभावानामन्यनिमित्तप्रकाशसंसर्गित्वादात्मन्यपि तत्प्रसङ्गनिराकर-
णाय स्वयंज्योतिरितिविशेषणोपपत्तेः आत्मैवास्य ज्योतिरिति चैवकारात् ।
ननु कारकान्तरानपेक्षतया स्वयमेव स्वात्मनि ज्ञानं जनयतीति स्वयमिति
विशेषणं किं न स्यात् । न । ज्योतिष्ट्वस्यैव * विशेष्यत्वात्कारकत्वस्य विशे-
ष्यतया ऽप्रतिभासात् ।

किञ्च । ज्ञानजन्मप्रयुक्तत्वात् कारकापेक्षायास्तदभावे ऽपेक्षैव नास्ती-
ति । ननु ज्ञानप्रयुक्तं जन्मापि विद्यते । न । प्रकाशगुणत्वप्रयुक्तमेव द्रव्यजन्म
व्यतिरेके ह्यद्रव्योपाधौ जन्माभावस्य प्रदीपादौ दृष्टत्वादत्रापि ज्योतिःशब्दा-
दात्मनि प्रकाशगुणस्य जन्माभावनिश्चयात् । न चान्तःकरणेपि प्रकाशगुणोदयो
ज्ञानपरिणामः स्वभावत एव प्रकाशगुणवद्द्रव्यस्यान्तःकरणस्यैव विशेषपरि-
णामस्य ज्ञानत्वाभ्युगमात् । नच ज्ञानमपि क्वचिज्जन्मवद्दृष्टम् । दृष्टमन्तःकरण
इति चेन्न ज्ञातुरर्थप्रकाशस्य ज्ञानत्वात्तस्य चात्माश्रयत्वादन्तःकरणपरिणामे
ज्ञानत्वोपचारात् । नच ज्ञानमात्माश्रयं द्रव्यमिति युक्तम् तस्यैव प्रकाशगुण-
त्वेना † ऽऽत्मनो ज्योतिष्ट्वहानात् । जडप्रकाशगुणो न जन्यश्चित्प्रकाशगुणो जन्य
इति चेत् न । प्रकाशत्वप्रयुक्तत्वात्स्वद्रव्योपाधौ जन्माभावस्य दर्पणादौ विद्य-
मानप्रकाशस्यैव तिरोधाननिराकरणं क्रियते प्रदीपादिषु तु द्रव्यमेव जायते
न प्रकाशगुणः । प्रज्ञानघनशब्दाच्च चैतन्यज्योतिरात्मा न जडज्योतिरिति
गम्यते विज्ञानमानन्दं प्रज्ञानमानन्दं ‡ ब्रह्मेत्यादिवचनाच्च ज्ञानमिति ज्ञातृ-
त्वमुच्यते न भावार्थ इति चेन्न । § भावार्थे प्रसिद्धविरोधात् शब्दस्य । किञ्च ।
प्रतिक्षणं प्रकाशगुणकल्पनाद्वरमेकस्यैव गुणस्य स्थायित्वकल्पनम् । आत्मनि
प्रकाशगुणव्यतिरेकाभावाच्च नागन्तुकत्वे प्रमाणमिति ।

---

* विशेष्यत्वात्तत्र कारकत्वस्येति २ पु० । † आत्मनः स्वयज्योतिष्ट्वेति ३ पु० ।
‡ आनन्दमिति पुनर्नास्ति २ पु० । § भावार्थे इति १ पु० ।

१४ १० नन्वाऽऽत्मन्यगृह्यमाणविशेषत्वमनुभवसिद्धमिति चोदयति ननु ब्रह्म स्वरूपमिति । तर्हि शुक्तिकायामिव ब्रह्मण्येवानवभासविपर्ययौ स्यातां न जीव इत्याह न तदनवभासनादिति । ननु कार्यकारणभावहीनयोर्द्रव्ययोः सामानाधिकरण्यमेकद्रव्यनिष्ठं सोऽयं देवदत्त इतिवदऽतो द्रव्यैकत्वाज् जीवगतावेवानवभासविपर्ययाविति * चोदयति ननु न ब्रह्मणोऽन्य इति। तर्हि ज्ञानप्रकाशविरोधादाश्रयविषयभेदाभावाच्च नाज्ञानता ब्रह्मण इत्याह एवं तर्हीति । तथाद्वितीयाधिष्ठानब्रह्मात्मनि प्रमाणस्य चैतन्यस्याविद्याकारणदोषसंसर्गे प्रथमं दर्शयति उच्यते विद्यत एवेति । प्रत्यक्षानुमानार्थापत्ति † प्रदर्शिताऽज्ञानस्य

,, १९ श्रुतितदर्थापत्तिभ्यां प्रदर्शनं क्रियते श्रुतिस्तावदिति। सुषुप्ते मिथ्याज्ञानाभाव.तत्संस्कारस्य ‡ चाऽप्रतिबन्धकत्वात् कादाचित्कग्रहणाभावस्य च स्वतःसिद्धग्रहणविरोधित्वाभावात्स्वरूपचैतन्येनैव ब्रह्मस्वरूपावभासे प्राप्ते तदवभासप्रतिबन्धनिमित्तमनृतं दर्शयति अनृतेन हि प्रत्यूढाः त इमे सत्याः कामा अनृतापिधाना इति । ततश्च मिथ्याज्ञानतत्संस्कारग्रहणकर्म्मभ्यो व्यतिरिक्तमनवभासनिमित्तमनृतं मिथ्यावस्तु सिद्धम् । अनीशया शोचति मुह्यमान इति स्वभावसिद्धेश्वरस्यानीश्वरत्वं तद्भावाप्रतिपत्तिरेव वस्तुनो ऽनपायात्ततश्चेश्वरभावाप्रतिपत्तेः शोकस्य च निमित्तं मोहं दर्शयति । आदिशब्दान्न तं विदाथ य इमा जजानान्यत् § युष्माकमन्तरं बभूव । नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरन्तीति । नीहारं तमोऽज्ञानमित्यनर्थान्तरम् तेन प्रावृतत्वमेव जीवानां ब्रह्मापरिज्ञाने जल्प्यत्वाद्यध्यासे च निमित्तं दर्शयति। तथा ऽविद्यायामन्तरे वर्त्तमाना नान्यच्छ्रेयो ॥ वेदयन्त इति श्रेयोरूपब्रह्मापरिज्ञाने क्रियाकारकाद्यध्यासे च निमित्तभूतामविद्यां दर्शयन्तीत्याद्याः । अज्ञानेनावृतं ज्ञानं तेन मुह्यन्तीत्याद्याः स्मृतयोऽपि द्रष्टव्याः ।

अर्थापत्तिरपि ब्रह्मज्ञानाद्बन्धनिवृत्तिः श्रूयमाणा ब्रह्मणि प्रागनवबोधोऽध्याससम्बन्धहेतुरस्तीति कल्पयतीति फलश्रुत्यनुपपत्तिरथवा द्रष्टव्य इत्यादिदर्शनविधानानुपपत्तिर्वा प्रागनवगममन्तरेणेति जीवस्य ब्रह्मस्वरूपानवभा-

---

* मोदयतीति १ पु० ।

† प्रदर्शितस्याज्ञानस्येति २ पु० ।

‡ वाप्रतिबन्धकत्वादिति १, २ पु० ।

§ युष्माकमनन्तरं बभूवेति ३ पु० ।

॥ वेदयन्ते प्रमूढा इतीति २ पु० उपकल्पितम् ।

सनिमित्तं जीवाश्रयाध्याससम्बन्धहेतुरज्ञानदोषो विद्यत इत्युक्तम् । अथ च साक्षिवेद्यस्याज्ञानस्य प्रमाणैरभावव्यावृत्तिः प्रदर्श्यत इति न तस्य प्रमाणवेद्यत्वप्रसङ्ग इति । तत्र चोदयति ननु न जीवो ब्रह्मणोऽन्य इति । किमत्र जीवब्रह्मणोरेकत्वात्पर्यनुयुज्यते । किमेकत्वादाश्रयविषयभेदानुपपत्तिः किं वा चित्स्वभावस्याविद्याश्रयत्वविरोधो ब्रह्मणो वा सर्वज्ञत्वादिहानिरिति । न तावदज्ञानमाश्रयविषयभेदापेक्षं किन्त्वेकस्मिन्नेव वस्तुन्याश्रयत्वमावरणञ्चेति कृत्यद्वयं सम्पादयति स्वाश्रयापवरकप्रदेशे कृत्यद्वयसम्पादितमोवदक्रियात्मकत्वादावरणत्वाच्च । नहि तमो वस्तुद्वयापेक्षमवभासते अज्ञानमिति च द्वयापेक्षज्ञानपर्युदासेनाभिधानात् द्वयसापेक्षवदवभासते । यथास्थितिरगमनशब्देनाभिधीयमाना कस्य किंविषयमगमनमिति कर्म्मसापेक्षवद्भाति तद्वत्तमोवच्च स्वाश्रयावरणमज्ञानं स्वाश्रयैकत्वेन न विरुध्यते । नापि स्वाश्रयचित्प्रकाशेन विरुध्यतेऽज्ञानम् स्वावभासकेन संवेदनेन चित्प्रकाशेनाज्ञानस्याविरुद्धत्वात् । साक्षिचैतन्यस्य चाज्ञानावभासकत्वादतो न चिदाश्रयत्वविरोधः ।

१४ २१

किञ्च । जन्यज्ञानेनात्मन्यवस्थाचयेऽवभासमान एव स्वपरविषयज्ञानाश्रयत्वं *सर्वैरेवोपगन्तव्यमिति नावभासमाने अज्ञानाश्रयत्वविरोधः । नच प्रकाशमात्रमज्ञानविरोधि स्वज्ञानेऽभावात् । नच स्वयम्प्रकाशमाने ज्ञानसंसर्गविरोधः क्वचिद्दृष्टः विषयाणां परप्रकाश्यानामेव तत्संसर्गविरोधात् । संवेदनस्यात्मस्वरूपत्वादेव तदाश्रयाज्ञानोपगमान्न तदुदाहरणम् । अथ ब्रह्मणः †सर्वज्ञत्वविरोधादैक्ये सति नाज्ञानमुपपद्यत इति न जीवाश्रयत्वोपगमात् । नन्वैक्यमुक्तम् । सत्यम् । सत्यप्यैक्ये प्रतिबिम्बात्मन्यध्यस्तश्यामत्वादेर्बिम्बेऽदर्शनात् अवदाततायाश्चाविरोधदर्शनादेवं सर्वज्ञत्वाविद्याश्रयत्वयोः सत्यप्यैक्ये विरोधात् । तस्मान्नैक्यमविद्याश्रयत्वेन विरुध्यते किन्त्वविद्यामेवोपपादयतीत्याह बाढमत एवार्थादिति । ऐक्ये स्वयंप्रकाशत्वे सर्वज्ञत्वे च सत्येवानवभासदर्शनादाच्छादिका विद्या कल्प्यते अन्यथा भेदजाड्यकिंचिज्ज्ञत्वे ग्रहणाभावमात्रमेव स्यात् ततश्च तमोनृतनीहाराज्ञानावृतत्वादिशब्दा अनवभासाध्यासनिमित्तभावरूपाज्ञानप्रतिपादका बाध्येरन्निति ।

---

* सर्वैरेवोपगन्तव्यमिति १ पु० । † सर्वज्ञत्वविरोधादैक्ये इति १ पु० ॥

नन्वेकद्रव्यत्वे सति जीवब्रह्मविभागः किंनिबन्धनो यतः सर्वज्ञत्वाविद्याश्रयत्वे व्यवस्थाप्येते इत्यन्तःकरणावच्छेदात्कश्चिद्भेदं वक्ति अन्यस्त्वतिरेकात् अपरस्तु स्वभावादेवांशांशिभावात् । तत् सर्वं व्यावर्त्तयति अतो

१५ १ ऽनादिसिद्धाविद्यावच्छिन्नेति । आत्मावरणमात्माज्ञानमेव जीवब्रह्मविभागाद्यध्यासोपादानं यतोऽतो जीवावच्छेदनिमित्तमज्ञानमित्यवच्छेदस्यापि प्रातिभासिकाध्यासस्य तदुपादानत्वात् सत्यतोनिरवयवस्य द्वैधीभावायोगात्कर्तृत्वभोक्तृत्वदोषसंयोगानां बीजाङ्कुरवदनादिप्रवाहस्य दर्शितत्वात्तदुपादानमप्यज्ञानमनादीत्याह अनादिसिद्धेति । अनादिजीवविभागाध्यासप्रवाहस्यानाद्यऽविद्यैव कारणं नान्तःकरणादीत्याह अविद्यावच्छिन्नेति ।

नचान्तःकरणमवच्छेदकमर्थतो विदारणाभावादवच्छेदस्य विभ्रममात्रत्वादज्ञानस्यैव तदुपादानत्वादन्तःकरणस्य च सम्यग्ज्ञाननि * रस्यतयाऽविद्याध्यासत्वात् स्वकारणावच्छिन्नस्यैवावच्छेदकत्वसंभवात् । सत्यत्वेपि सादेरनाद्यवच्छेदोपाधित्वाभावात्सुषुप्रादौ चान्तःकरणाभावादनवच्छेदप्रसङ्गात् । तदापि सूक्ष्मावस्थमन्तःकरणमवच्छेदकमिति चेत् । किं तावन्निरवयवत्वापत्तिः सूक्ष्मता सावयवस्यावयवाभावे स्वरूपनाशात् । अथा † वयवापचयमात्रं सूक्ष्मता । न । अवस्थितावयविनो अकार्यत्वप्रसङ्गात् । कारणात्मना स्थितिरिति चेत् । किं कारणमेव ‡ स्थितमित्यर्थः कार्यमपीति वा । पूर्वस्मिन्नन्तःकरणाभावात् । उत्तरस्मिन् स्थित्यवस्थातो न विशेषः । तस्मात्कार्यसंस्कारविशिष्टशक्तिमत्कारणावस्थानमेव सूक्ष्मतापत्तिः अतो नान्तःकरणमवच्छेदकमस्ति । तस्मात् क्लृप्ताविद्यासामर्थ्यादेव जीवब्रह्मविभागसिद्धौ नातिरेककल्पनावकाशः । जीवस्य ब्रह्मण्यविद्येत्यविद्यापूर्वमेव विभागमपेक्षत इति चेत् । न । कस्य कस्मादतिरेक इत्यतिरेकस्यापि विभागपुरःसरत्वप्रतीतेः । यथा भेदाधीनोपि धर्म्मिप्रतियोगिभावो भेदेनोपरज्यते । कस्य कस्माद्भेद इत्येवमतिरेकाधीनोपि जीवब्रह्मभावस्तस्मिन्नुपरज्यते । जीवाद् ब्रह्मणोतिरेक इति चेदऽविद्यायामपि तुल्यमेतत् निरंशत्वान्नांशांशिभावेन भेदः संभवति । तस्मादऽविद्यैव भेदाध्यासनिमित्तमिति ।

---

* निरस्यतयेति पाठस्य सर्वत्र सत्त्वेऽपि निरास्यतयेति तु युक्तं मन्यामहे ।

† अवयवापायमात्रमिति २, ३ पु० । ‡ अवशब्दोऽधिकः ३ पु० ।

नन्वविद्या किंसंबन्धिनी भेदनिमित्तम् । ननु दर्पणादिद्रव्यं वा किंसंबन्धि विम्बभेदनिमित्तम् । मुखमात्रसंबन्धीति चेत् इहापि चेत्स्वरूपमात्रसंबन्ध्यऽज्ञानं तत्र जीवब्रह्मव्यवहारभेदं प्रवर्त्तयति । कथं पुनः स्वरूपमात्रसंबन्धिनोऽज्ञानस्य ब्रह्मस्वरूपं परिहृत्य जीवविभागैकपक्षपातिता दर्पणघटादेर्मुखाकाशभेदे हेतुतया मुखादिसंसर्गिणोपि विम्बाकाशौ परिहृत्य प्रतिविम्बघटाकाशादिपक्षपातित्ववदिति वदामः ।

ननु किमाश्रयेयमविद्या । न तावदन्तःकरणविशिष्टस्वरूपाश्रया प्रमाणाभावात् । नन्वहमज्ञ इति प्रतिभास एव विशिष्टाश्रयत्वे प्रमाणम् नाहमनुभवामीत्यनुभवस्यापि चैतन्यप्रकाशस्य विशिष्टाश्रयत्वप्रसङ्गात् । ननु यथा अयो दहतीति दग्धृत्वायसोरेकाग्निसंबन्धात्परस्परसंबन्धावभासः तथानुभवान्तःकरणयोरेकात्मसंबन्धात्तथावभासो नान्तःकरणस्यानुभवाश्रयत्वादिति चेत् एवमज्ञानान्तःकरणयोरेकात्मसंबन्धादहमज्ञ इत्यवभासो नान्तःकरणस्याज्ञानसंबन्धादिति तुल्यम् । प्रतीतिरन्यथासिद्धौ परस्परसंबन्धकल्पनायोगादात्मनि अविद्यासंबन्धस्य सुषुप्तेपि संप्रतिपन्नत्वाच्च । अथ स्वरूपमात्राश्रयत्वानुपपत्तेर्विशिष्टाश्रयत्वं कल्प्यत इति चेत् । न । विशिष्टेपि स्वरूपसंबन्धस्य विद्यमानत्वाज्जडस्य चाज्ञानाश्रयत्वे भ्रान्तिसम्यग्ज्ञानयोरपि तदाश्रयत्वप्रसङ्गात् । ननु स्वरूपेपि ब्रह्मण्यनुपपत्तिस्तुल्या । सत्यम् । अनुपपन्नद्वयाश्रयत्वकल्पनाद्वरं संप्रतिपन्नस्वरूपाश्रयत्वोपादानम् मोक्षावस्थासंबन्धिन एव संबन्धाश्रयत्वात् ।

अत्र कश्चिदन्तःकरणस्यैवाज्ञानमिति जल्पति । स वक्तव्यः कि*मात्मा सर्वज्ञः किंचिज्ज्ञो वेति । किंचिज्ज्ञत्वे कदाचित्किंचिन्न जानातीति विषयानवबोधस्त्वयैवात्मनो दर्शितः । अथाग्रहणमिथ्याज्ञानयोरात्माश्रयत्वेपि भावरूपाज्ञानमन्तःकरणाश्रयमिति । किं तत् । ज्ञानादन्यच्चेदऽज्ञानम् काचकामलादीनामप्यज्ञानत्वान्न विवादः । अथ ज्ञानविरोधीति । न । भिन्नाश्रययोर्ज्ञानाज्ञानयोरेकविषययोरपि विरोधित्वादर्शनात् । करणाश्रयमज्ञानं कर्त्राश्रयज्ञानेन विरुध्यत इति चेत् । न । प्रमाणाभावात् । पुरुषा-

---

* किमात्मा सदा सर्वज्ञ इति १ पु० ।

न्तरसुषुप्तौ च तदीयेनान्तःकरणेन लीयमानेन करणभूतेन तन्निमित्तकर्मानु-
मानेपि तदीयान्तःकरणाज्ञानानिवृत्त्यदर्शनात् भ्रान्तिनिमित्तदोषत्वात्काचा-
दिवत्करणाश्रयमज्ञानमिति चेन्न चक्षुरादावपि प्रसङ्गात् । सादित्वात्तेषाम-
नाद्यज्ञानाश्रयत्वानुपपत्तिरिति चेत् अन्तःकरणेपि तुल्यम् । सत्कार्यवादाश्र-
यणान्न साद्यन्तःकरणमिति चेत् । चक्षुरादावपि तुल्यम् । अतो न तद-
नाद्यज्ञानाश्रयमिति । अनृतनीहारादिशब्दैश्च प्राप्तज्ञानानामग्रहणवतां चेत-
नानामेवावृतत्वाभिधानान्नान्तःकरणाश्रयमज्ञानं किंतु चैतन्याश्रय * मित्यलम-
१५ १ तिविस्तरेण । तदेतदाह अविद्यावच्छिन्नानन्तजीवेति ।

न्यायः प्रदर्शितः । श्रुतिस्तु अन्यद् युष्माकमन्तरं बभूव नीहारेण
प्रावृता इति व्यवधायकमज्ञानं दर्शयति । विभेदजनके ज्ञाने नाशमात्य-
न्तिकं गते । आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यतीति स्मृतिः । ननु
ब्रह्मव्यतिरिक्तमनादिवस्तु नास्तीति तत्राह तथाच स्मृतिरिति । अत
इत्युपसंहारः स्पष्टार्थः ।

स्वयंप्रकाशस्याविद्याश्रयत्वमुपपन्नमित्युक्तमिदानीं प्रकाशमानस्यावि-
द्याविषयभावो नोपपद्यत इत्याक्षिपति ननु प्रमाणविरोध इति । ननु त्वदु-
क्तमर्थं न जानामीति प्रतिभासमानमेवाज्ञानस्य व्यावर्त्तकमवभासते । ननु
तत्र विशेषाकारस्यानवगतस्य व्यावर्त्तकता । न । अनवभासमानस्य व्यावर्त्तक-
तया प्रतिभासानुपपत्तेः । नन्ववभासमानस्यापि तद्व्यावर्त्तकत्वमनुपपन्नमेव ।
न । अज्ञानसंबन्धस्य प्रतिभासमात्रशरीरत्वादनुपपत्तेरलङ्कारत्वात्प्रतिभासस्तु
विद्यत एव तत्र कथं प्रतीयमानस्याविद्याविषयत्वानुपपत्तिरित्याक्षिपति किं
तत्प्रमाणमिति । निरंशस्येति परिहारः । संविदभेदो ऽपरोक्षप्रकाशमानता
नाम । शरीराद्भेदश्च स्वयंज्योतिषात्मप्रकाशेनाभिन्नस्तत्तन्त्रो वापरोक्ष एव
तथापि न प्रकाशत इति † सिद्धान्ती परिहरति ननु भोक्तुरिति । ननु न
भोक्तेत्यादिः स्पष्टार्थः ।

पदार्थज्ञानमेव भेदज्ञानमतोहमित्यात्मपदार्थज्ञानमेव भेदेपि प्रत्य-
क्षमिति मीमांसकमन्यश्चोदयति कथं पुनर्भोक्तेति । संसर्गाध्यासो हि भेदा-
" १३ नवगमनिमित्तमिति सर्वत्र व्याप्तमिति परिहरति मनुष्योहमितीति । पदार्थे-

* इत्यलमतिप्रसङ्गेनेति ३ पु० । † इति परिहरति सिद्धान्तीति ३ पु० ।

प्रत्यक्षेणैव भेदेपि प्रत्यक्षे सामानाधिकरण्यं गौणावभास इति चोदयित्वा परिहरति ननु गौण इत्यादिना । आह गौणवादी नन्विहमिति यदीति । १५।१३।१५ ननु प्रत्यक्षावभासं बाधित्वाऽऽगमानुमानाभ्यामेव व्यतिरेको गृह्यतामिति नेत्याहागमानुमानयोरपीति । ननु मिथ्यात्वात्प्रत्यक्षावभासस्य द्विचन्द्राव-भासस्येव ताभ्यामेव बाध इति चोदयति मिथ्यात्वात्तस्येति । यचावि-चारपुरःसरमेव प्रत्यक्षावभासमप्यनुमानादिना झटिति बाधितमुच्छिन्नव्यहारं भवति तत्र तथा भवतु यत्र पुनर्विचारपदवीमुपारूढयोर्ज्ञानयोर्बलाबलचि-न्तया बाधनिश्चयः तत्र नानुमानादिना प्रत्यक्षस्य मिथ्यात्वसिद्धिरिति मत्वाह कुतस्तर्हीत्यादिना उच्यत इत्यतः प्राक्तनेन ग्रन्थेन । स्पष्टार्थो ग्रन्थः ।

किमर्थतो व्यतिरिक्तात्मविषयोऽहङ्कार उच्यते किं वा प्रतिभासतः । अर्थतश्चेत्तत्राह यद्यपि * देहादिव्यतिरिक्तेति । व्यतिरेकप्रतिभास एव अध्यासविरोधितया सामानाधिकरण्यस्य गौणत्वमावहति नत्वर्थमात्रमिति भावः । ननु सामान्येन गृहीतस्य विशेषाग्रहणादन्यसंसर्गावभासो भवति आत्मा तु विशेषरूपेण गृहीतः कथं तत्राध्यासः तत्राह † दृश्यते हीति । अथ प्रतिभासत एवाहंप्रत्ययो विविक्तात्मविषय इति शङ्कते अथ पुनरेका-न्तत इति । परिहरति ‡ ततस्तद्भाव इति । यौक्तिकज्ञानसहकृतेनाहंप्रत्यये-नात्मनि विविक्ते प्रतिपन्ने पुनः सामानाधिकरण्यं गौणमेव तत्सामान्यात्पूर्व-मपि गौणमेवेत्यभिप्रेत्याह जिज्ञासोत्तरकालं तर्हीति । विचारेणापि नाहं-प्रत्ययस्य व्यतिरिक्तात्मविषयत्वमापादितं किं तु सर्वदा स्वरूपमात्रविषयोऽहं-प्रत्ययो यौक्तिकज्ञानलब्धस्तु व्यतिरेकोऽतस्तस्याननुसंधाने पूर्ववदध्यास एवेति परिहरति न युक्त इति । तत्रापि नाध्यास इति चोद्यम् अनुभववि-रोध इति परिहारः । अकारस्य व्यतिरेकेपि ह्रस्वादेरव्यतिरेकादध्यास इति चोदयति नन्वनुभव इति । अन्यतरव्यतिरेके द्वयोरेकत्वाद्भेदस्येतरेतरव्य-तिरेकः सिद्ध्यतीत्याह तन्नेति । ननु § महदेतदित्यादिचोद्यपरिहारौ स्पष्टौ । १६ १ ,, ८।१०

* देहव्यतिरिक्त इति १ पु० ।
† दृश्यते चेतीति २ पु० मूलसंमतः ।
‡ ततस्तत्सद्भाव इति ३ पु० मूलसंमतः ।
§ ननु महदेतदिन्द्रजालमितीति ३ पु० ।

किं च विवेकानन्तरमध्यासोऽहंप्रत्ययमात्रेण विरुध्यत इत्युच्यते किंवा

१६ १२ यौक्तिकज्ञानेन । न तावदहंप्रत्ययमात्रेणेत्याह तथाह्ययंप्रत्ययस्येत्यादि *-ना । ननु एवंमात्रविषयेऽपि युक्तिज्ञानसन्निधानाद्व्यतिरिक्तविषयोऽहंप्रत्यय इति नेत्याह अतो युक्त्या विषयविवेचनेऽपीति । नहि प्रत्यक्षज्ञानं ज्ञानान्तरसन्निधानात्स्वविषयादधिकविषयं भवतीति भावः । विचारजन्यज्ञानस्याननुसंधानादनुसंधानेऽपि परोक्षत्वान्नापरोक्षाध्यासः प्रागवस्थातो भिद्यत इत्युपसंहरति अतो न्यायत इति ।

ननु प्रत्यक्षे देहात्मैक्याध्यासे किमैक्यप्रत्ययमपबाध्यव्यतिरेके प्रमाणमुक्तमित्युच्यते युक्तिसहितागमानुमानाहंप्रत्ययैर्द्विचन्द्रबाधयैकत्ववद्व्यतिरेकः सिध्यतीत्युक्तं भवति तदेवं स्वयंज्योतिष इति दृष्टान्तानुवादेन दार्ष्टान्तिककथनपरो ग्रन्थः स्पष्टार्थः । स्वयंप्रकाशत्वेऽप्यविद्ययाऽगृह्यमाणविशेषत्वादात्मनोऽधिष्ठानयोग्यत्वकथनेन परत्रपरावभास इति लक्षणांशो दर्शितः । कारणत्रितयेऽप्यद्वितीयात्मावभासिचैतन्यप्रमाणतद्गताविद्याकारणदोषौ लब्धौ संस्कारमिदानीं लम्भयत्यनादित्वाच्चेति । नन्वध्यस्यमानाधिष्ठानविषयं कारणत्रितयजन्यमेकमेव ज्ञानं वक्तव्यं तदभावान्नाध्यास इत्याशङ्क्याह पृथग्भोक्तृविषयानुभवफलाभावादिति । आत्मचैतन्यमेवात्मानात्मसंभेदावभासिस्वरूपेणाजन्यत्वेऽपि विशिष्टविषयोपरक्ताकारेण जन्यते भ्रान्तित्वाच्च विषयविषयिणोरेकस्मिन् प्रत्यये संभेदावभासः संभवतीति कारणत्रितयजन्यमात्मन्यनात्मावभासिज्ञानमध्यासः सिद्ध इति ।

१७ २ कथं पुनरित्यादिभाष्यस्य तात्पर्यमाह कोऽयमध्यासो नामेति । किं वृत्तस्येति † पृष्टमेवानेनाऽऽक्षिप्तमपि मयेत्युभयत्रैवकारापि शब्दौ प्रयोक्तव्यौ । अध्यस्यमानेन समानेन्द्रियविज्ञानविषयत्वमेवाधिष्ठानस्य दृष्टम् इह तदभावान्नाध्याससंभव इत्याक्षेपग्रन्थार्थः । तत्रैकस्मिन्विज्ञाने द्वयोः संभिन्नतयावभास एवावभास एवापेक्ष्यते विषयतयावभास इति विशेषणायोगादिति मन्वानः

---

* ननु महदेतदिन्द्रजालमित्यादिचोद्येति २ पु० ।

† इत्यादीति ३ पु० ।

‡ पृष्टमेवाक्षिप्तमपीति १ पु० ।

परिहरति न तावदयमेकान्तेनाविषय इति । अस्मत्प्रत्ययशब्देनात्मविषयं ज्ञान- १७ ८
मुक्तमिति मन्वानश्चोदयति ननु विषयिणा इति । एकस्यां प्रत्यक्षदर्शनक्रिया-
यामेकस्यैव कर्तृस्थाने तदैव तद्विपरीतकर्मकारकस्थाने चावस्थानमनुपपन्न-
मिति भावः अस्तु तद्द्वैशाभ्यां तद्भाव इति नेत्याह तत्कथमेकस्येति । तत्र
सर्वतो विप्रसृतस्य सवितृप्रकाशस्याकाशे विशेषाभिव्यक्तिनिमित्तदर्पणादिव-
दात्मचैतन्यस्य सविकल्पकतया स्फुटीकरणव्यवहारनिमित्तं भास्वरद्रव्य-
मात्मन्यध्यस्तमन्तःकरणमस्मत्प्रत्यय इत्याह । * स्मत्प्रत्ययाभिमितोहङ्कार
इति । नन्विदं रजतमितिवदध्यस्तत्वे ऽहमिति द्वैरूप्यावभासो वक्तव्य
इत्यत आह स चेदमनिदमिति । अयो दहतीति दग्धृत्वविशिष्टस्याग्नेरय-
सश्च द्वैरूप्यावभासवदहमुपल † भे इत्युपलब्धृत्वविशिष्टस्यात्मनो ऽन्तःकर-
णस्य चास्त्येव द्वैरूप्यावभासो ऽसाधारणक्रियोपरक्तमात्मादिद्रव्यमेव वस्त्व-
न्तरविशिष्टमवभासत इति भावः । दुःखिप्रेमास्पदरूपेण परिणामितदागमा-
पायद्रष्टृरूपेणाहङ्कारविषयादिष्वनुस्यूतचैतन्यरूपेणाहमिति च व्यावृत्तरूपेण च
सर्वलोकसाक्षिकं द्वैरूप्यमित्याह सर्वलोकसाक्षिक इति ।

ननु विषयसंविद आश्रय आत्मा तत्राहं जानामीति संविदाश्रयत्वेना-
वभासमानोहङ्कारः कथमिदमंशः स्यादिति चोदयति ननु किमत्र वदितव्य- ,, १५
मिति । नन्वयो दहतीत्यादावयःपिण्डादिवदऽकर्तृत्वेपि दर्शनक्रियाश्रयको-
टिनिक्षिप्ततया ऽहङ्कारस्यावभासः सम्भवतीति पूर्ववादिनं सिद्धान्ती चोद-
यति कथमिति । अयःपिण्डव्यतिरेकेण वह्नेः ‡ दहनक्रियाश्रयत्वदर्शनवदह-
ङ्कारव्यतिरेकेणात्मनो ज्ञानक्रियाऽदर्शनादहम एवात्मत्वमित्युत्तरेण ग्रन्थेन
प्रतिपादयति ।

तत्र साङ्ख्यास्त्वचिदात्मन्यन्तःकरणे चिदाकारप्रतिविम्बावभासः § त-
थाविधविम्बान्तरपुरःसरः प्रतिविम्बत्वान्मुखप्रतिविम्बवदिति विम्बभूतमा-
त्मानमनुमिमते । नैयायिकवैशेषिकाश्चेच्छादयो गुणाः पृथिव्यादिमहाभूत-
द्रव्यव्यतिरिक्तस्यैव विशेषगुणास्तेष्वदृष्टत्वे सत्येकेन्द्रियग्राह्यतया विशेषगुण-
त्वात् भूतचतुष्टये ऽदृष्टगन्धवद्दिक्कालमनसां विशेषगुणहीनत्वात्परिशेषादि-

---

* अस्मत्प्रत्ययत्वाभिमत इति ३ पु॰ । † उपलम्भे–इति पु॰ त्रयेऽपि पाठः ।
‡ दहनादिक्रियेति ३ पु॰ । § तथाविधविम्बपुरस्सर इति २ पु॰ ।

च्छादिगुणवद् द्रव्यमन्यदेवात्मेत्यनुमिमते । तथा संवेदनेषु विषयाकारप्रति-विम्बावभासः तथाविधविम्बसन्निधानपुरःसरो ऽतस्मिन् तदवभासत्वाद् दर्पणस्फटिकादिगतमुखरक्तत्वादिवदिति नित्यानुमेया विषया इति सौत्रा-

१७ १६ न्तिकाः कल्पयन्ति । तान्प्रत्याह प्रमातृप्रमेयप्रमितयस्तावदपरोक्षा इति ।

यदि साङ्ख्यादयः प्रत्यक्षसिद्धस्यैवात्मनोऽनुमानानि स्पष्टीकरणार्थानीति मन्येरन् तदा न कश्चिद्विरोधः । यदि नित्यानुमेयमात्मानमिच्छेयुः तदा विषयवदहमित्यपरोक्षावभासविरोधः । सौत्रान्तिकस्यापि यदि विषयानुमानज्ञाने साक्षाद्विषया एवावभासेरन् प्रत्यक्षेप्यवभासतां कस्तत्रापराधः इत्यनुमानज्ञाने विषयस्यैवावभासनादनैकान्तिको हेतुः । न चेदनुमानज्ञानेपि विम्बभूतविषयावभासः प्रतिज्ञातार्थस्य विम्बपुरत्वस्याप्रतिभासनात् अनुमानानुदय एव स्यात् अपरोक्षव्यवहारयोग्यविषयावभासविरुद्धं चानुमानमिति ।

अथ विज्ञानवादिनस्तु विज्ञानाभेदनिमित्त एव विषयस्यापरोक्षावभास इत्याहुः । तन्निराकरोति प्रमेयं कर्मत्वेनापरोक्षमिति । इदं पश्यामीत्यनुभवात् । नच विज्ञानाभेदादेषा * परोक्ष्यमवभासते बहिष्ठस्यापि रजतादेरापरोक्ष्यात् । तदपि † विज्ञानमिति चेन्न रजतवद्बाधाभावप्रसङ्गात् । तस्मादव्यवधानेन संविदुपाधिता ऽपरोक्षता विषयस्येति ।

तत्रात्मात्ममनःसंयोगजन्यप्रत्यक्षेणापरोक्ष इति वार्त्तिककारन्यायवैशेषिकानुसारिणः कल्पयन्ति । प्रमितिस्त्वात्मनि संयुक्तसमवायनिमित्तज्ञानान्तरादपरोक्षेति न्यायवैशेषिकौ । प्रमेयगता प्रमितिः संयुक्ततादात्म्याज्ज्ञानान्तरेणापरोक्षेति वार्त्तिककारीयाः । तान्प्रत्याह प्रमातृप्रमिती पुनरपरोक्षे ‡ एव केवलमिति ।

न तावदात्मविषयं § प्रत्यक्षं ज्ञानान्तरं मनोजन्यमिति प्रमाणमस्ति । सति मनसि आत्मदर्शनादसति सुषुप्ते चादर्शनादन्वयव्यतिरेकौ प्रमाणमिति चेत् न । विषयानुभवेनैवान्यथासिद्धत्वात् ‖ विषयानुभवसम्बन्धादेव विषयवदात्मसिद्धावात्मनि ज्ञानान्तरं परिकल्प्य मनसोन्वयव्यतिरेककल्पनायोगात् तस्माद्विषयत्वमन्तरेणात्माऽपरोक्ष एव ।

---

* अपरोक्षमिति २ पु॰ । † विशब्दो नास्ति २ पु॰ । ‡ अपरोक्ष एवेति १ पु॰ ।
§ ज्ञानान्तरं प्रत्यक्षमिति ३ पु॰ । ‖ अन्यथासिद्धित्वादिति १ पु॰ ।

नच संयुक्तसमवायादात्मनि विषये वानुभवस्य ज्ञानान्तरविषयतया परोक्षता । प्रत्यक्षस्य वर्त्तमानविषयापेक्षत्वेन युगपत्फलद्वयावस्थानप्रसङ्गात् । संयुक्तसम्बन्धादनुभवावभासे तद्गतपरिमाण * रसादीनां तेनैव ज्ञानेनापरोक्षताप्रसङ्गात् अनुभवस्य च स्वसत्तायां प्रकाशव्यतिरेकादर्शनाच्च † ज्ञानान्तरागम्यतासिद्धिः । नचान्त्यव्यापाराद्विषयानुभवजन्म सम्भवति सर्वगतस्य कुठारादिवत् परिस्पन्दाभावात् परिणामफलस्य च घटादिवत् क्रियैकाश्रयत्वात्संविदाश्रयत्वे विषयस्यैव चेतनत्वप्रसङ्गात् । नच तज्जननव्यापारवत्त्वादात्मनश्चेतनता मनआदीनामपि प्रसङ्गात् विषयाश्रयत्वे चानुभवस्य मयेदं विदितमिति सम्बन्धावभासः स्वात्मनि ज्ञानक्रियानुमानं च न स्यादनुभवस्यात्मसम्बन्धाभावात् । तस्माद् द्वयोर्न कर्मतया ऽपरोक्षता ।

ननूभयोः स्वयम्प्रकाशत्वकल्पना न युक्ता अन्यतरस्य स्वयम्प्रकाशत्वे आत्मैव स्वयंप्रकाश इति चेन्नेत्याह प्रमितिरनुभव इति । अथवा । हानोपादा- १७ १७ नोपेक्षाः प्रमाणफलमिति केचित्तत्राह प्रमितिरनुभव इति । नहि हानादीनां इतरेतरव्यभिचारिणां मानफलता युक्ता ऽव्यभिचारिण्यनुभवे सतीत्यर्थः ।

ननु संवेदनमेवार्थसारूप्येण प्रमाणं प्रमीयते ऽनेनेति व्युत्पत्तेरर्थोपलब्ध्यात्मना तदेव प्रमाणफलमिति सुगतमतानुसारिणस्तद्व्यावर्त्तयति प्रमाणं त्विति । प्रमाणं तु प्रमातृव्यापारश्चतुष्टयसन्निष्कर्ष एवेति ‡ प्राभाकराः । § नन्वहमिदं जानामीत्यात्मनात्मविषयावनुभवौ भेदेन प्रत्यक्षसिद्धाविति नेत्याह तत्राहमिदं जानामीति ।

ननु यदवभासते तज्ज्ञानकर्मतयैवावभासते इति विषयेषु नियमादात्माप्यवभासते चेत्कर्मतयैव ‖ नाश्रयमात्रतयेति चोदयति ननु नायं विषयानुभवनिमित्त इति । ननु प्रत्यक्षज्ञानस्य विषयजन्यत्वात्कारकतापि विष- ,, २१ यस्य वक्तव्या तत्र कथमेकस्यां क्रियायामेकस्यैव कर्तृत्वेन विरुद्धरूपद्वयान्वयः कर्त्तुश्च गुणभावात्कर्मणश्च प्राधान्यादेकस्य रूपद्वये वैरूप्यप्रसङ्गश्चेति

* रसादीनां च तेनैवेति २ पु ।

† ज्ञानान्तरागम्यतासिद्धेर्नचात्मव्यापाराद्विषयेऽनुभवफलजन्मेति २ पु॰ ।

‡ प्रभाकराः—इति ३ पु॰ ।

§ नन्विदमहं जानामीति ३ पु॰ ।

‖ नाश्रयतया चोदयतीति १ पु॰, नाश्रयतयेति चोदयतीति २ पु॰ ।

१७ २२ तत्राह तस्मिंश्च द्रव्यरूपत्वेनेति । तत्र सामान्यांशस्यात्मानात्मसाधारण्या-दात्मत्वायोगात् । विशेषांशस्य निरंशत्वान्न कर्तृकर्मव्यवस्थेति परिहरति *नचैतद्युक्तमिति । निरवयवस्य युगपत्कार्यद्वयपरिणामायोगाच्चेत्याह अपरि-णामित्वादिति ।

किञ्च । ग्राहकरूपस्यापि विषयतया सिद्धिरस्ति † वा नवा । नचेत्स्वयं-

१८ १ प्रकाशत्वसंविदाश्रयत्वसिद्ध्योरनभ्युपगमादऽसिद्धिप्रसङ्गः । कर्मतया सिद्धि-श्चेत्तत्राह प्रमेयस्य चेति । तस्मात्संविद्बलादेव चितयसिद्धौ संविदाश्रय-पक्षपातितया ऽहमः सिद्धेर्नेदमंशोऽहङ्कार इत्युपसंहरति तस्मान्नीलादिज्ञा-नफलमिति ।

अहङ्कारस्यात्मव्यतिरिक्तत्वं साधयितुमात्मनः स्वयंप्रकाशत्वसाध-नाय विकल्पयति तत्रेदं भवानिति । उत सोपि अनुभवोपीत्यर्थः । तत्रात्मा

,, ५ चित्स्वभावो ऽनुभवो जड़प्रकाश इति पक्षो नोपपद्यते इत्याह तत्र न ताव-दिति । नन्वप्रकाशमानमेव ‡ प्रमाणफलं चक्षुरादिवद्विषयमवभासयेदिति कुतो विश्वस्यानवभासो न विषयप्रकाशजननेन चक्षुषः प्रकाशकत्वात्संविद्वैलक्ष-ण्यात् संवेदनं तु स्वयंप्रकाश एव न प्रकाशान्तरहेतुःअतश्चक्षुरादिवैलक्षण्या-त्प्रदीपवदवभासमान एवानुभवोर्थं प्रकाशयति न च प्रदीपालोकस्यार्थानुभव-जननेनैव चक्षुरादिवदर्थस्य प्रकाशकता किन्तु पृथगेव । तथाहि । ज्ञानप्रका-श्यत्वादज्ञानविरोधिनो ऽन्यदेवालोकप्रकाश्यत्वं तमोविरोधितया प्रसिद्धम् तदव्यवधानेन आलोकेन क्रियते न तदुभयं करोति चक्षुरज्ञानत्वादनालोक-त्वाच्च । तस्मादनुभवः सजातीयप्रकाशान्तरनिरपेक्षः प्रकाशमान एव विषये प्रकाशादिव्यवहारनिमित्तं भवितुमर्हत्यव्यवधानेन विषये प्रकाशादिव्यवहार-निमित्तत्वात्प्रदीपालोकवत् । नच चक्षुषा सजातीयप्रकाशेन प्रदीपस्यालोकेनेव घटस्य प्रकाश्यता स्वयमेव प्रकाशगुणत्वात् । तद्विषयज्ञानप्रकाशं जनयति चक्षु-रिति चेत्तथापि विजातीयज्ञानेनैव प्रदीपस्य प्रकाश्यतेति न सजातीयालोका-पेक्षा । तस्माद्व्यवहितप्रदीपस्येवानुभवस्याप्यप्रकाशमानत्वे प्रदीपप्रकाश्यस्येव विश्वस्यानवभाप्रसङ्ग इति ।

---

* नैतद्युक्तमिति २ पु॰ । † वाशब्दो नास्ति २ पु॰ । ‡ प्रमाणेति नास्ति २ पु॰

ननु प्रमातृचैतन्यमेव जडानुभवबलादात्मानं विषयं चावभासयतीति चोदयति मैवम् प्रमाता चेतन इति । तत्र यदि चैतन्यस्य विषयोपराग- १८ ६ हेतुरनुभवः पराभ्युपगतबुद्धिपरिणामवदिष्यते तदुच्यते चिदात्मप्रकाशस्य तु जडानुभवाधीनता ऽनुपपन्नेत्याह तन्न स्वयंप्रकाशचैतन्यस्वभावोपि सन्निति । चेतयतिक्रियापि पूर्वानुभवफलवज्जडरूपानुभवफलं चेतनस्यापि प्रदीपस्थानीयत्वाच्चेतयतिक्रियानवस्थेति * दूषयति किञ्च प्रमाणफलेनेति । उभयचैतन्यस्वभावपक्षे पुरुषद्वयवन्नान्योन्याधीनसिद्धिता नापि संविदात्मसम्बन्धावगम इत्याह द्वितीयेपि कल्प इति ।

ननु चिद्गुणमपि पुरुषान्तरसंवेदनं न पुरुषान्तरस्य स्वयंप्रकाशम् तथात्मा चैतन्यगुणोपि न स्वयं प्रकाशत इति शङ्कते अथ चैतन्यस्वभावत्वेपीति । परिहरति विशेषे हेतुर्वाच्य इति । अनुभवोपि तर्हि न स्वयंप्रकाशः स्यात्पुरुषान्तरसंवेदनवद्ऽव्यवधानान्नेति चेदात्मन्यपि तत्समानमिति भावः । किञ्चेति स्पष्टार्थः । अस्तु तर्हि जडात्मनः स्वयंप्रकाशानुभवाश्रयतया सिद्धिरिति नेत्याह तृतीयेपीति । अयमर्थः । संवेदनं नाम गुणो द्रव्यं कर्म वा भवति । कर्मत्वे प्रकाशत्वफलत्वयोरनुपपत्तिर्द्रव्यत्वेप्यणुमध्यमानन्तपरिमाणानाम् अणुपरिमाणत्वे विषयेपि तावन्मात्रावभासः स्यान्नहि खद्योतप्रकाशमात्रं † संसृष्टस्य घटस्य सर्वात्मनावभासः । महापरिमाणत्वे तदाश्रयतयात्मनोपि सर्वत्रावभासप्रसङ्गः । मध्यमपरिमाणत्वे सावयवत्वेनावयवपरतन्त्रता न स्यात् । गुणत्वे सति आत्मैव ‡ प्रकाशगुण इति प्रदीपवदात्मा स्वयंप्रकाशः स्यात् । स च गुणः स्वाश्रयोपाधौ न जायते प्रकाशगुणत्वादात्मन्यव्यभिचारादित्यादिप्रकाशगुणवदित्यात्मैव स्वयंप्रकाश इति तदेतदाह अनिच्छतोप्यात्मैव चितिप्रकाश इति । ,, १९

ननु मध्यमपरिमाणमेव स्वावयवाश्रयं फलमस्तु आत्मपरतन्त्रता तु घटस्येव भूतलतन्त्रतेति नेत्याह न तदतिरिक्ततथाविधफलसद्भाव इति । प्रदीपेन प्रकाशितमितिवन्मयावगतमित्यनुभवादात्मैव चित्प्रकाशः । अन्यथा

---

* दर्शयतीति २, ३ पु॰ । † संस्पृष्टस्येति १ पु॰, मात्रसंस्पृष्टस्येति २ पु॰ ।

‡ प्रकाशेति नास्ति २ पु॰ ।

काष्ठेन प्रकाशितमितिवदुपचारप्रसङ्गादिति भावः । प्रमाणान्तरापेक्षया पृच्छति
१८ १७ कथमिति । संवेदनस्य भेदावभासशून्यत्वादनुभवाधीनसिद्धिकस्य * च विषयवदनात्मत्वादेकः स्थाय्यात्मैवानुभव इत्याह प्रमाणजन्यश्चेदनुभव इति । सामान्यविशेषभेदकल्पनागौरवादात्मैक एवानुभव इत्याह सर्वानुभवानुगतं चेति । स्वगतभेदप्रतिभासशून्यतामेव प्रपञ्चयति नच नीलानुभव इति । ननु नीलसंवित्स्थितिकाले पीतसंविदोऽभावात्स्थितिविनाशौ दृष्टौ धर्मभेदं कल्पयत इति चोद्यमुद्भाव्य परिहरति ननु विनष्टाविनष्ट इत्यादिना । ननु साधनसन्निधानादुत्तरसंवेदनस्य जातत्वात् संविद्द्वययौगपद्यायोगात् विनष्टापूर्वसंविदिति चेन्नेतरेतराश्रयादित्याह † सा च जन्यत्व इति । सिद्धस्यैव संवेदनस्य विषयोपरागनिमित्तं साधनमितिकल्पनं लघीयः विषयोपरक्तसंविज्जन्मसाधनत्वकल्पनादिति भावः ।

सत्यपि संविदां स्वगतभेदेऽतिसादृश्यात् ज्वालायामिव परोपाधिमन्तरेण भेदो न विभाव्यत इति सुगताः कल्पयन्ति तान्निराकरोति एतेनातिसादृश्यादिति । किञ्च । ज्ञानान्तरगम्यत्वे भेदस्यातिसादृश्याद्भिन्नेष्वभेदभ्रमजन्म स्यात्स्वयंप्रकाशस्य तु भेदः प्रकाशाभिन्न इति प्रकाशमानतैव युक्ते-
१९ १ त्याह नहि ‡ चिदात्मप्रकाशस्येति । नच यथा जीवस्येति स्पष्टार्थः । एकत्वेन पुष्कलप्रकाशस्याप्यविद्याप्रतिबन्धे प्रमाणमुक्तम् इहत्वप्रतिबद्धपुष्कलकारणत्वाद्भेदप्रकाशेन भवितव्यमित्याहाभिहितं तच्चेति । ननु संविदः सादृश्यप्रतिबद्धभेदावभासाः स्थायिप्रकाशबुद्धिवेद्यत्वाज्ज्वालावदित्यनुमातुं शक्यते § तत्राह नहि सामान्यतोदृष्टमिति । पूर्वापरैकरूपानुभवो भेदस्य च प्रकाशेन भवितव्यमित्यनुभवयुक्ती । कथं पुनरात्मचैतन्यस्य नित्यस्य विषयानुभवत्वमिति तदाह तस्माच्चित्स्वभाव एवेति ।

ननु स्वयंप्रकाशमानात्मचैतन्यस्य विषयानुभवत्वेपि विषयानुभवमेव
,, ६ निमित्तीकृत्याहमितिद्रष्टृऽपरामर्शादात्मैवाहङ्कारः संवृत्त इति चोदयति बाढमत एवेति । द्रष्टृरूपेण परामर्शस्य विषयानुभवो निमित्तम् । अन्यथा द्रष्टा-

---

* चो नास्ति ३ पु॰ । † आश्रयत्वादिति ३ पु॰ ।
‡ चित्प्रकाशस्येति २, ३ पु॰ । § तत्रत्राहेति २, ३ पु॰ ।

दिविभागशून्यश्चिन्मात्रावभासः स्यादिति भावः । मैवम् । सुषुप्तावात्मन्यव-
भासमानेप्यहङ्कारस्यानवभासमानत्वादितिव्यतिरेकप्रदर्शनेन परिहरति सत्य- १९ ८
मेवमिति । ननु विषयानुभवनिमित्तो द्रष्टृरूपावभासो ऽहमुल्लेखस्तद्रहिते सुषुप्ते
कथमस्य प्रसङ्ग इति चोदयति कथमिति । विषयानुभवनिमित्तो विषयावभासः
स्याज्जडत्वान्न तन्निमित्तचिदात्मपरामर्श इति परिहरति नीलानुषङ्गो यश्चैत-
न्यस्येति । ननु सुषुप्ते द्रष्टृरूपाभावे कथमहमिति तद्रूपपरामर्शो नेत्याह तत्र
यदि नामेति । द्रष्टृत्वं सप्रतियोगिरूपं स चेदहमर्थो नात्मैवाहङ्कारः
स्यादिति भावः ।

ननु पराग्व्यावृत्तं द्रष्टृरूपं भोक्तृत्वमेव कथं तत्सुषुप्तावनुभूयत इति
चोदयति नन्वहमिति । नाहङ्कारस्य त्वया निष्प्रतियोगिकात्ममात्रत्वाभ्युपग-
मादिति परिहरति नैतत्सारमिति । ननु स्वरूपमपि विषयानुभावादेवाहमि-
ति व्यज्यतां नेत्याह नैतच्छक्यमिति । ततश्च विषयोपरक्तसप्रतियोगिकस्व-
भावस्याहङ्कारस्यात्मत्वं सुषुप्तावनुभवविरुद्धमिदमापत्स्यत इत्याह ततश्च
विषयोपराग इति । आत्मनस्तु सर्वात्मकत्वान्न पराग्व्यावृत्तताहमुपरागादेव
* व्यावृत्त्यवभास इत्यर्थः । भवत्येवेत्यादिः स्पष्टार्थः । यथा पूर्वस्मिन् दिने
ऽहमित्यभिमान † एवासमेवमनुभूते स्मृतिनियमाभावेपि स्मर्यमाणात्ममात्रत्वा-
दहङ्कारस्य सुषुप्तेपि स्मृतिः स्यादित्यर्थः । अहङ्कारादिप्रतिभासस्य नित्यचै-
तन्यरूपस्याविनाशात्तज्जन्यसंस्कारप्रसूता स्मृतिरनुपपन्नेति चोदयति अविना-
शिनः संस्काराभावादिति । परिहारो ह्यस्तनोपीति ।

ननु सिद्धान्ते कथमहङ्कारस्मृतिस्तदवभासिसाक्षिचैतन्यस्य नित्य-
त्वात् । उच्यते । अहंवृत्त्यवच्छिन्नमेवान्तःकरणं चैतन्यस्य विषयभावमाप-
द्यते तद्वृत्तिसंस्कारजन्यस्मरणावच्छिन्नमन्तःकरणं पुनः स्मृत्यनुभवावच्छेदक-
मिति स्मरणोपपत्तिः । ननु सुषुप्ता ‡ वनुभूतसुखस्याप्याश्रयपक्षपातितयाऽह-
मुल्लेखादस्त्येव सुषुप्ते ऽहमनुभव इत्याह नन्वस्त्येव सुषुप्ते ऽनुभव इति । ननु ,, २१
सुखमनुभूतं चेत्तस्य विषयजन्यत्वाद्विषयानुभवनिमित्त एव तत्राप्यहमुल्लेखः

---

* व्यावृत्ततावभास इति २ पु० ।

† अभिमन्यमान एवासमिति २ उपकल्पितमस्ति । ‡ सुषुप्तावननुभूतेति १ पु० ।

१९ २२।२३ स्यात् इति नेत्याह नात्मनो ऽन्यस्येति । सत्यमस्तीत्यादिः स्पष्टार्थः । ननु सुखावमर्शस्य मुख्यसुखालम्बनत्वं परित्यज्य कथं विरोधिदुःखाभावविषयतयोपचारः कल्प्यते शाब्दे हि ज्ञाने लक्षणा स्यात् * प्रत्यक्षस्तु सुखावमर्शो न लक्षणामर्हतीति चोदयति कथमिति । मुख्यसुखाभावाद् दुःखाभावस्य लक्ष्यस्य संप्रतिपन्नत्वादिति परिहरति स्वप्ने तावदित्यादिना ।

ननु परामर्शसामर्थ्यादेव मुख्यमेव सुखं कल्प्यतामिति नेत्याह यदि पुनः सुप्तः सुखमिति विशेषत इति । विषयविशेषोपरक्ततयैवेत्यर्थः । दुःखा-

२० १ भाव एव परामर्शविषय इत्यत्र लिङ्गमाह व्यपदेशोपीति । ननु सुखानुभवस्यापि लिङ्गमस्ति प्रसन्नेन्द्रियत्वादीति तत्राह यत्पुनः सुप्तोत्थितस्येति । तद-

,, ३ सदिति स्पष्टार्थः । उत्तरौ च चोद्यपरिहारग्रन्थौ स्पष्टार्थौ । तस्मान्न सुषुप्तौ भोक्तृतयाप्यहमुल्लेखोनुस्मर्यते इति । नन्वनुभूतेपि भोक्तृतयाप्यहमुल्लेखोनुस्मर्यते इति । नन्वनुभूतेपि न स्मृति † नियमः । सत्यम् । आत्मन्यनुस्मर्यमाणे तावन्मात्रस्याहङ्कारस्याहमित्येव स्मृतिनियमः स्यादित्युक्तम् ।

ननु दुःखाभावो विद्यमानो ऽपि नानुभवितुं शक्यते प्रतियोगिस्मरणाभावात्सम्भवति च ‡ मुख्य एव स्वरूपानन्दानुभवः । ननु § तदपि सुखमविद्यावृतं न प्रकाशमर्हति । न । अनावृतसाक्षिचैतन्यसुखांशस्य प्रकाशोपपत्तेः । जागरणे तर्हि किमिति नावभासते । ‖ भासत एव परमप्रेमास्पदत्वलक्षणं सुखम् तीव्रवायुविक्षिप्त ¶ प्रदीपप्रभावन्मिथ्याज्ञानविक्षिप्ततया न स्पष्टमवभासते सुषुप्तौ तु ** तदभावादधिकं व्यज्यत इति ।

ननु उत्थितस्य दुःखाभावपरामर्शो विद्यते स कथं प्रतियोगिज्ञानाभावादननुभूतः परामृश्यते । उच्यते । अनुभूतमेव सुखमुत्थितस्यानुस्मर्यमाणन्तत्र विरोधिदुःखाभावमर्थापत्त्या गमयति अनुभूतं चेत्सुखं नास्ति दुःखमिति । अतो दुःखाभावो नानुस्मर्यते किंतु प्रमीयत इति एवमुत्थितस्य ज्ञानाभावपरामर्शोपि ज्ञानविरोधिनो ऽज्ञानस्यानुभूततया स्मर्यमाणस्यानुपपत्त्यैव प्रमीयते नानुस्मर्यते ।

---

* प्रत्यक्षसुखेति ३ पु० ।
† नियमः स्यादित्युक्तम् सत्यमिति ३ पु० ।
‡ मुख्यमेवेति १ पु० ।
§ तदापीति १ पु०, ३ पु० तदापीत्युपकल्पितम् ।
‖ अवभासत एवेति २ पु० ।
¶ प्रदीप्तदीपप्रभावदिति ३ पु० ।
** तुशब्दो नास्ति १ पु० ।

ननु जागरणेप्यनुभूयमानमज्ञानं कथं ज्ञानविरोधि स्यात् । न । अवस्थाविशेषविशिष्टस्याज्ञानस्य सुषुप्ते ऽनुभवात् तस्य च जागरणेपि घटादिज्ञानविरोधितादर्शनात्पटावगमसमये । नन्वस्मर्यमाणत्वादेव ज्ञानानां सुषुप्तो ज्ञानाभावो *ऽनुमीयते । न । अतिवृत्तज्ञानानामपि सतामस्मर्यमाणत्वात् । प्रातर्गजाभावोपीदानीमनुस्मर्यमाणाद् गजविरोधिपदार्थादर्थापत्त्या प्रमीयते न गजविषयस्मृत्यनुदयमाचाद्व्यभिचारित्वात् । तस्माद्विशिष्टाज्ञानसुखानुभवानुपपत्तिगम्यौ ज्ञानाभावदुःखाभावाविति मन्तव्यम् ।

नन्वज्ञानसुखानुभवयोः साक्षिचैतन्यस्य चाविनाशिनः संस्काराभावे कथमुत्थितस्य चयाणामनुस्मरणं स्यात् । उच्यते । अज्ञानगतचैतन्याभासजन्मोपाधित्वादज्ञानसुखसाक्षिविकल्पानुभवस्याज्ञानावस्थाभेदेन चैतन्याभासानां भिन्नत्वात् तद्विनाश † संस्कारजस्मरणमज्ञानसुखसाक्षिचैतन्याकारमज्ञानविशिष्टात्माश्रयमेव सम्भाव्यते नान्तःकरणाश्रयमिति सर्वथापि सुषुप्ते ऽज्ञानसुखानुभवसम्भवात् असम्बद्धमिदं टीकाकारेणोक्तमिति । सत्यम् । परमतमाश्रित्येदमुक्तं न स्वमतमिति न दोषः । स्वयंप्रकाशत्वाहङ्कारभेदावुक्तावुपसंहरति तदेवं नायं नीलादिप्रत्ययादिति । अहङ्कारभेदस्याप्युपलक्षणार्थं यस्मादात्मनोहङ्कारो भिद्यते तस्मादागम ‡ मूलभाष्यवचनमुपपन्नमित्याह तस्माद् ब्रह्मविदामिति । २० ७ ,, ८

कश्चासावागमः । स एवाधस्तात्स एवोपरिष्टादिति भूमाख्यब्रह्मणः सर्वात्मकत्वमभिधायाथाते ऽहङ्कारादेश इति तस्यापि सर्वात्म § कत्वमुक्त्वा || अथात आत्मादेश इत्यात्मानम् ¶ अहङ्काराद् भेदेन निर्दिशति । ननु जीवब्रह्मणोः सार्वात्म्यव्यपदेशो यथैकत्वसिद्ध्यर्थमेवमहङ्कारस्यात्मैकत्वसिद्ध्यर्थो व्यपदेशः स्यात् । तन्न । द्वयोः सार्वात्म्यायोगात् । तच युक्तं भेदेन प्रतिपन्नयोर्जीवब्रह्मणोरेकत्वसिद्ध्यर्थस्तदुपदेशः अहङ्कारस्य तु पूर्वमेवात्मैकत्वप्रतिपत्तेः पृथगुपदेशो भेदसिद्ध्यर्थ इति गम्यते । ब्रह्मणः परोक्षस्य प्रत्य-

---

* अनुमीयतामिति २ पु॰ । † संस्कारजं स्मरणमिति २ पु॰ । ‡ मूलं भाष्येति २ पु॰ ।
§ कशब्दो नास्ति २ पु॰ । || अथात्मादेश इति ३ पु॰ । ¶ अहङ्काराभेदेनेति ३ पु॰ ।

सत्त्वसिद्धये ऽहमात्मत्वमुपदिश्य पुनस्तद्युदासेन मुख्यात्मत्वमुपदिशतीत्यर्थः । महाभूतान्यहङ्कार इति च स्मृतिः ।

तर्ह्ययमहङ्कारः किमुपादानः किंनिमित्तः किंस्वरूपः किंप्रमाणकः किङ्कार्यः किमिति सुषुप्ते न भातीति चोदिते सति उच्यत इत्यादिपरिहारः । येयमित्याद्युपादानसङ्कीर्त्तनम् । अविद्याकर्मपूर्वप्रज्ञेति भ्रान्तिकर्मपूर्वानुभवसंस्कारा इत्यर्थः । तस्या इति निमित्तकारणनिर्द्देशः । विज्ञानक्रियाशक्तिद्वयाश्रय इति स्वरूपं दर्शयति । * कर्तृत्वभोक्तृत्वेति कार्यप्रदर्शनं कूटस्थचैतन्य इति प्रमाणोपन्यासः । यत्सम्भेदादित्यात्मनि सर्वोऽतदारोपनिमित्तत्वं कार्यान्तरमाह । किमिति तर्हि सुषुप्ते न स्यादित्यत आह स च सुषुप्त इति । अज्ञानकार्यलिङ्गशरीरप्रविलयो हि सुषुप्तिरित्यर्थः । ननु सति प्राणे क्रियात्मनि कथमहङ्कारस्य क्रियाशक्तेः प्रविलयः । उच्यते । नाहङ्कारमात्रत्वं प्राणस्य उच्यते किन्तु प्राणस्य पृथक्सतः पञ्चधा व्यापारहेतोरहङ्कारस्य क्रियाशक्तिरस्तीत्येतावदुच्यते मनोधीनतादर्शनात्प्राणवृत्तेरिति । प्राणलक्षणक्रियाशक्त्यंशं वा विहाय विज्ञानशक्त्यंशस्य लयः कल्प्यताम् सांशत्वादन्तःकरणस्य । स्वप्नादिवद् दृष्टिसृष्टिमाश्रित्य वा सुषुप्तपुरुषदृष्ट्यभिप्रायेण सर्वस्य तत्र लयो दर्शितः सुषुप्तप्राणशरीरादिदर्शनस्य पुरुषान्तरस्य विभ्रमत्वादिति ॥

अत्र सांख्या मन्यन्ते यद्यचेतनं मायाशब्दादिवाच्यम् अन्तःकरणाद्युपादानमिष्टं स्यात् तर्हि तदहङ्कारनिर्भासे साक्षिणि तच्छक्तित्वेन वा तदाश्रयत्वेन वा † तदधिष्ठानत्वेन वानन्तर्भूतमेव प्रधानं स्वतन्त्रमेव धर्मलक्षणावस्थाभेदैस्त्रिधा परिणमत इति । तत्र धर्मपरिणामो नाम महदादिकृत्स्नकार्यरूपेणावस्थानम् । तस्यैव च धर्मस्यातीतानागतवर्त्तमानलक्षणरूपापत्तिर्लक्षणपरिणामः । तथाहि । कार्यमनागतलक्षणापन्नं तत्परित्यज्य वर्त्तमानलक्षणमापद्यते पुनः तत्परित्यज्यातीतलक्षणापन्नं भवति पुनस्तदेव आगामिलक्षणापन्नं भवति । अवस्थापरिणामस्त्वतीतमतीतरमतीततममनागतमनागततरमनागततममिति त एव नूतनचिरन्तनाद्यवस्थापत्तिः अतो न चेतनोपादानेन कृत्यमिति नेत्याह नचैवं मन्तव्यमिति । कुत इति तदाह

* कर्तृत्वभोक्तृत्वैकाधार इति ३ पु० । † तदधिष्ठेयत्वेन वेति ३ पु. ।

तथा सत्यऽपाकृताहङ्कृतिसंसर्ग इति । अहमिति कृतिः करणं यस्मिन्स साक्ष्यहंकृतिः । अयमाशयः । चेतनस्यानात्मसम्भेदावभासो नाख्यातिर्नाप्य-न्यथाख्यातिर्नापि चात्मख्यातिरित्युक्तम् इदानीं चेतनस्यैव स्वाविद्याविवर्त्त-मानमिथ्यावस्तुसम्भेदावभासलक्षणानिर्वचनीयख्यात्यनभ्युपगमे चेतनाचेतन-योरत्यन्तविविक्तावभास एव स्यात् न सम्भेदावभास इति ॥

अत्र नैयायिका मन्यन्ते । आत्मेन्द्रियविषयेषु समवहितेषु कदाचि-द्विज्ञानोदयसामर्थ्यादात्माश्रयज्ञानादिवृत्तीनां क्रमजनने * करणभूतं किञ्चि-न्मनः कल्पितम् । तत्र तदतिरेकेणान्तःकरणं नाम ज्ञानसुखदुःखेच्छाप्रय-त्नादिविज्ञानक्रियावृत्त्याश्रयमयः पिण्डवदग्नेरादर्शवन्मुखस्याऽथाचवच्चन्द्रस्या-त्मावच्छेदकतया तस्मिन्नऽतदारोपोपाधिभूतं किञ्चिन्न पश्यामः । बुद्धिरिति चेत् न । बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरमित्यक्षपादसूत्रवचनात् । जानाति बुद्धिरात्मोपलभत इति चेत् न । प्रतिधात्वर्थं धर्मिभेदप्रसङ्गात् तस्माद्वर्णित-मन्तःकरणं नास्तीति । तत्राह स च परिणामविशेष इति ।

अयमाशयः । बुद्धेर्गुणेनात्मगुणेन † चैव आराग्रमात्रो ह्यवरोऽपि दृष्ट इति श्रुतौ परिणामगुणवत्तया द्रव्यमित्यवगता बुद्धिः । तथा यदा पञ्चैव लीयन्ते ज्ञानानि मनसा सह । बुद्धिश्च नेङ्गते तत्र परमात्मानमश्नुते इति श्रुतौ चेष्टाश्रयत्वेन द्रव्यमित्यवगता बुद्धिस्तथा विज्ञानं यज्ञं तनुते इत्यानन्दमय-स्यात्मनः पृथगऽभिधानाद् विज्ञानं बुद्धिरित्यनर्थान्तरत्वाद् बुद्धिः क्रियाश्रय-त्वेन द्रव्यमित्यवगता । तथा विज्ञानेन वा ऋग्वेदं विजानाति मनसा ह्येव पश्यतीति च करणपक्षपातिनोर्विज्ञानमनसोरेकत्वान्मनसश्च कामसङ्कल्पा-दिवृत्तिमत्त्वश्रवणादेकमन्तःकरणं विज्ञानक्रियाशक्तिमन्मनआदिशब्दवाच्यं श्रुतिलिङ्गेभ्यः प्रसिद्धम् । तथा बुद्धेर्गुणेनात्मगुणेन चैव सधीः स्वप्नो भूत्वा इमं लोकं सञ्चरति विज्ञानमयो मनोमय इत्यादिश्रुतावात्मावच्छेदकतया स्वगुणा-रोपगमनागमनादिनिमित्तत्वं चावगतम् । तथा कस्मिन्वहमुत्क्रान्ते उत्क्रान्ता-भविष्यामीति श्रुतावुत्क्रान्त्याद्युपाधेः प्राणस्याप्यन्तःकरणांशत्वमवगतमयुग-पदुपाधिद्वयायोगात् । ततश्च वर्णितमन्तःकरणं श्रुतिलिङ्गसिद्धमिति । नन्व-

* कारणभूतमिति १ पु ।   † चैवं ह्याराग्रमात्रो ह्यवरोऽपि दृष्ट इति २ पु ।

र्थवादलिङ्गानां न्यायापेक्षा विद्यते । सत्यम् । निरंशसर्वगतासङ्गस्याकाशस्येव निरुपाधेर्गमनपरिच्छेदाद्यनुपपत्तिरेव न्याय इत्यलमतिप्रसङ्गेन ॥

नन्वात्मन एव विज्ञानक्रियापरिणामशक्ती किं न स्यातामिति । निरवयवसर्वगतासङ्गस्य परिणामानुपपत्तेः परिणाम्यन्तःकरणसन्निधानाच्च प्रतिभासस्यान्यथासिद्धेरिति सदृष्टान्तमाह तेनान्तःकरणोपरागनिमित्तमिति । मिथ्यात्वं स्फटिकलौहित्यस्य क्लृप्तप्रतीतिसत्तयोः कारणाभावादिति भावः । तदुभयाभावमुत्तरग्रन्थेन साधयति । तत्राख्यातिवादिनः स्फटिकगतं मिथ्यालौहित्यमवभासते किन्तु जपाकुसुमगतमेव गृह्यमाणं स्फटिकादविविक्तमेवावभासत इति चोदयति कथं पुनः स्फटिक इति । नैतदित्याह यदि स्फटिकप्रतिस्फालिता इति ।

ननु दोषबलादिन्द्रियस्य कुसुमसंयोगाभावान्न सन्निवेशग्रहणमिति २१ २ नेत्याह नहि रूपमात्रनिष्ठ इति । संयुक्तसमवायात् संयोगाद्वा गुणग्रहणे द्रव्यमपि संयुक्तमिति भावः । अन्यथाख्यातिवादी रूपमात्रं प्रतिविम्बितं स्फटिकात्मना प्रतिभातीति वक्ति तन्नेत्याह नापि स्वाश्रयमिति । तर्हि स्फटिकदेशे लौहित्यं सद्रव्यमेवाविविक्तं स्फटिकात्मना वा गृह्यते इति चोदयति नन्वभिजातस्येवेति । तथाप्यन्यथाख्यातौ संसर्गमिथ्यात्वमित्याह तथापि स्वयमलोहित इति ।

अख्यातिवादिनो मत * माददाति अथ प्रभैव लोहितेति । तर्हि स्फटिकग्रहणे संयुक्तसमवायकारणपौष्कल्यादप्रतिबद्धसंयोगाद् वा रूपग्रहणमपि स्यादित्याह शौक्ल्यमपि तर्हीति । विरोधिगुणया प्रभया विरोधिगुणस्यापसारणं प्रतिबन्धो वा कृत † इति शङ्कते प्रभयापसारितं तदिति । अपसारणे ‡ दोषमाह स तर्हि नीरूप इति । प्रतिबन्धश्च § द्रव्यस्यापि समानः गुणद्वारा विरोधिसाम्यादित्यर्थः । रूपहीनमपि द्रव्यं रूपिप्रभासंयोगाच्चाक्षुषं ‖ स्यात् इत्याशङ्क्याह न च रूपिसंयोगादिति । तर्हि शौक्ल्यमपसार्य लौहित्यस्योत्पन्नत्वा-

---

* आददातीत्येव पु॰ त्रयेऽपि पाठः, "आङो दोऽनास्यविहरणे" इत्यात्मनेपदन्तूच्चारणक्रियायामास्यव्यादानस्यावर्जनीयत्वाच्च भवतीति प्रागवोचद्भावप्रकाशिका ।

† इत्याशङ्कत इति २ पु॰ । ‡ दूषणमिति २ पु॰ । § चो नास्ति २ पु॰ ।

‖ चाक्षुषमपीति १ पु॰ ।

रूपवत्तया चाक्षुषः स्फटिक इति नेत्याह न प्रभानिमित्तमिति । अभ्युपगम्य प्रभामित्यादिः स्पष्टार्थः । ततश्चोपरक्ताहङ्कारनिमित्तमात्मनि कर्तृत्वाद्यारोपणमित्याह तदेवमिति । नन्वहङ्कारधर्मस्यात्मन्या * रोपमात्रं क्रियते किं वा मिथ्यैव धर्मान्तरमुत्पद्यते इति । पूर्वस्मिन् नायं दृष्टान्तो ऽन्यथाख्यातिश्च स्यादुत्तरस्मिन्सत्यमिथ्याकर्तृद्वयावभासः स्यात् । उच्यते । अहङ्कारस्य स्वधर्मसहितस्यैवात्मन्यध्यस्ततया मिथ्यात्वान्नान्यथाख्यातिप्रसङ्गो ऽन्यसन्निधानादन्यस्मिन्मिथ्याधर्मावभास इत्येतावति दृष्टान्तः । अथवा । कर्तृद्वयेपि धर्मिणोरेकत्वापत्त्या धर्मभेदानवभास इत्यविरोधः ।

ननु भिद्यते हृदयग्रन्थिरित्यादौ हृदयग्रन्थिरात्मनि अनर्थहेतुरिति गम्यते तत्कथमहङ्कारस्योच्यते इति तत्राह ततः संभिन्नोभयरूपत्वादिति । २१ १२ नन्वात्मा स्वात्मन्युपरक्ताहङ्कारस्तद्धर्मादीन्नावभासयेत् उपरक्तत्वसाम्यात्स्फटिकादिवदिति तत्राह तत्र जड़रूपत्वादिति । † जाड्यचैतन्ये अवभासकत्वानवभासकत्वयोर्निमित्ते नोपरक्तत्वानुपरक्तत्वे इत्यर्थः । ननु चेतनस्याप्युपरक्तविषयज्ञानव्यापारशून्यत्वाज्जाड्यादविशेष इति तत्राह चिद्रूपस्य पुनरिति । अव्यवधानेन चित्संसर्ग एव प्रतिभासहेतुर्न ज्ञानव्यापार इति भावः । ननु साक्षिस्वरूपबुद्धिज्ञानक्रियाव्यवधानमन्तरेणाहङ्कारस्य सिद्धौ कथमिदमंशतेति तत्राह तेन लक्षणत इति । अर्थस्वभावत इत्यर्थः । ‡ अर्थतश्चित्स्वरूपता ऽनिन्दमंशता चैतन्यकर्मता चेदमंशतेति § न ज्ञानक्रिया ‖ व्यवधानेनेत्यर्थः । व्यवहारतः पुनः कथंभूतस्येदमंशतेति तदाह व्यवहारतः पुनरिति । यदुपरागात् यस्याहङ्कारस्योपरागादित्यर्थः । ¶ तदात्मन इति । तदात्मतामहङ्कारात्मतामापन्नस्येत्यर्थः । तद्व्यापारेणाहङ्कारव्यापारेणेति । वृत्तिव्यवधानसिद्धिरेव शरीरेन्द्रियविषयाणाम् इदमिति प्रतिभासितानामव्यवधानसिद्धिरेवानिदंप्रतिभासितेति भावः । नन्वज्ञानव्यवहितोहङ्कारः कथमव्यवधानादिदंतावभासाभावः स्यादित्यत्राहात एवाहमिति । अनिन्दन्ताप्रतिभासादेव अज्ञान- ,, १८

---

* आरोपणमात्रमिति २ पु॰ । † जाड्यचैतन्येत्वनवभासकत्वावभासकत्वयोरिति २ पु॰ ।
‡ अर्थतस्तु चिदिति २ पु॰ । § इतिशब्दो नास्ति २ पु॰ ।
‖ व्यवधानतेत्यर्थइति २ पु॰ ।
¶ तदात्मनोऽहङ्कारात्मतामापद्यमानस्येत्यर्थइति २ पु॰ ।

मात्रव्यवधानादेवेत्यर्थः । नन्वर्थतो युष्मदर्थत्वे तथाप्रतिभासाभावो न युक्त इत्यत्राह दृष्टश्च लक्षणत इति । ननु तत्र विमर्शेपि * मृन्मयव्यवहारो न जायते इह तु विमर्शे युष्मदर्थता व्यवह्रियते अतो नायं दृष्टान्त इत्यत आह व्युत्पन्नमतयस्त्विति । अत एव निपुणतरमभिवीक्ष्येत्यादिः स्पष्टार्थः ।

यदि स्फटिकोदाहरणेनैवात्मन्यनात्माध्यासः सिद्धो न तर्हि दर्पण-जलाद्युदाहरणेन वेदान्तविहितेन कृत्यमिति तत्राह यत्पुनर्दर्पणजलादिष्वि-ति । ननु प्रत्यङ्मुखताभेदावभासाभ्यां वस्त्वन्तरे विम्बात्प्रतिविम्बे प्रत्यक्षे

२२ २ कथमेकत्वप्रमाणमन्तरेण तदेव तदिति चोदयति कथं पुनस्तदेव तदिति । व्यक्तिप्रत्यभिज्ञानादिति परिहरति एकस्वलक्षणत्वावगमादिति । नन्वभिज्ञायां भेदप्रतिभासः कथं प्रत्यभिज्ञया बाध्यत इति तत्राह न तद्वस्त्वन्तरत्व इति । ननु व्यक्तिगतयोरैक्यभेदावभासयोः केन किं बाध्यमिति † विशये व्यक्तिभेदस्तत्रोपपत्तिशून्यत्वाद्बाध्यत इत्याहापि चार्थाद्वस्त्वन्तर इति । दर्प-णावयवा एव व्यक्त्यन्तराकारेण परिणता इति वाच्यम् । अन्यथा ‡ व्यक्त्युत्प-त्त्युपायाभावादिति भावः । ननु मुखलाञ्छितप्रतिमुद्रेयं न परिणाम इति नेत्याह विरुद्धपरिमाणत्वादिति । अस्तु तर्हि परिणाम इति नेत्याह तथा सतीति । ननु दृश्यते एव सर्वदा । नैवम् । दर्पणस्य तिर्यङ्निरीक्षणे पूर्वो-त्पन्नमुखदर्शनाभावात् ।

ननु निमित्तकारणापायेपि कार्यमपैति यथा वैशेषिकाणामपेक्षाबुद्धि-विनाशे द्वित्वादिविनाशो हस्तसंयोगापाये च कटविवरणापाय इति नेत्याह न खलु संवेष्टित इति । सर्वत्राग्निसंयुक्तद्रुतताम्रादाविव पुष्कलकारणेन विरु-द्धकार्योदयादेव पूर्वकार्यविनाशः वैशेषिकाणां च प्रक्रियामात्रम् । तद्द्वित्वा-देर्वस्तुसहभावित्वादिति भावः । ननु संस्कारजन्यकार्यान्तरोदयात्पूर्वकार्य-

,, १० विनाशो न निमित्तं कारणापायादिति कुत इति तत्राह तथा च यावदिति । निमित्तापायमात्राद्विवरणापायः संस्काराभावे § संवेष्टितेति भावः । इहापि तर्हि पूर्वसंस्थानस्य चिरकालं संस्थानसंस्कारबलाद्विरुद्धकार्योदये प्रतिविम्बा-

---

* मृणमय इति २ पु॰ ।

† विशयो नाम संशयः, विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरमित्यादौ तथादर्शनात् ।

‡ व्यक्त्युपायेति १ पु॰ व्यक्त्यन्तरोपायाभावादितीति ३ पु॰ । § अपिशब्दोऽधिकः २ पु॰ ।

पाय इति चेत् न । उत्पन्नदर्पणमात्रे चिरकालावस्थितमुखपरिणामसंस्कारेपि विम्बापायमात्रात्प्रतिविम्बापगमदर्शनादित्याह एवं चिरकाल इति । २२ ११

ननु चिरकालावस्थितविकासपरिणामसंस्कारप्रचयेपि सवितृकिरणापाये विकासापायदर्शनवच्चिरकालावस्थितप्रतिविम्बापायेपि विम्बापाये स्यादिति नेत्याह यः पुनः कमलमुकुलस्येति । ननु निमित्तकारणापाय एव तत्रापि निमित्तं न पार्थिवाद्यवयवजन्या मुकुलतेति तत्राह तदुपरम इति । आदर्शेपि तर्हि मुखविपरीतकार्यपरिणामहेतुः कल्प्यतामिति नेत्याह नादर्शे पुनरिति ।*कारुकर्मापेक्षं चादर्शतलजन्मेति भावः । किंच । सत्यपि विम्बसन्निधाने दर्पणद्रव्यं † मुखाकारं कर्त्तुं दाहच्छेदादिबहुप्रयत्नदर्शनात् स्पर्शगो ‡ चरत्वाभावाच्च । अवयवव्यवधाने चाक्षुषत्वमपि न स्यादित्यभ्युच्चयः । तत्रायं प्रयोगः § न दर्पणादौ मुखव्यक्त्यन्तरमस्ति तज्जन्मकारणशून्यत्वात् ‖ शशमस्तकविषाणवदिति ।

तर्हि शुक्तिकारजतवन्मिथ्यात्वोपपत्तेर्न मुखैकत्वमिति चोदयति अत्राहेति । ननु प्रत्यभिज्ञयैकत्वमवगतमिति नेत्याह ¶ शुक्तिरजतस्येति । मिथ्यारजतेपि प्रत्यभिज्ञा दृश्यते मदीयमिदं रजतमितीत्यर्थः । उत्तरमाह नैवम् तत्र हीति । तत्र नेदं रजतमिति रजतस्वरूपमेव बाध्यते नात्र रजतं किन्तु तदिदं रजतमिति देशमात्रबाधया सत्यरजतेनैकतया न प्रत्यभिज्ञायते अतो रजते ऽभिज्ञाबाधात्प्रत्यभिज्ञा विभ्रम इत्यर्थः । इह तु नेदं मुखमिति न स्वरूपेण बाध्यते किंतु नात्र मुखं मदीयमेवेति प्रत्यभिज्ञायते नच सा बाध्यते । व्यक्त्यन्तरत्वे च नात्र मुखमस्तीति न बाधः स्यादित्यर्थः । यत्पुनरिति स्पष्टार्थः । ननु स्वमुखावयवानामचाक्षुषत्वात्कथं प्रत्यक्ष * प्रत्यभिज्ञा । न । कतिपयावयवदर्शनादपि लोकवदवयविनश्चाक्षुषत्वोपपत्तेस्तत्त्वमसिवाक्यं त्वंपदार्थबाधनिमित्तं संसारिणो विनाशमन्तरेण मोक्षानुपपत्तेरतो नायं दृष्टान्त इति चोदयति ननु तत्त्वमसिवाक्यादिति । सोयं देवदत्त ,, २१

---

* कारुककर्मापेक्षमिति १ पु॰ ।
† मुखाकारे इति २ पु॰ ।
‡ गोचरताऽभावादिति ३ पु॰ ।
§ दर्पणादौ नेति १ पु॰ ।
‖ शशमस्तके विषाणवदिति ३ पु॰ ।
¶ शुक्तिकारजतस्येति ३ पु॰ ।
* प्रत्यभिज्ञानमिति २, ३ पु॰ ।

इति तादात्म्यपरं न परार्थबाधपरमिति परिहरति मैवमिति । किंच शास्त्रीयोपीति स्पष्टार्थः ।

न वारिस्थमित्याऽऽदित्यस्य वारिस्थतोपजीव्यते । अख्यातिवादी न विम्बादन्यत्वेन प्रतिविम्बं नाम दर्पणगतमवभासते किंतु विम्बमेव दर्पणादविविक्तं प्रकाशत इतिवदति तदनुवदति यस्तु मन्यत इति । स्पष्टप्रत्यङ्मुखावभासं दर्पणान्तरानुप्रविष्टमिव स्वमात्मानं पुरुषान्तरवन्निरीक्ष्यमाणमिवेदं यादृग्दृश्यमानं मुखं तथा नावभासत इति वदन् कथमाप्तः स्यादित्याह

२३ ४ तमनुभव एवेति ।

ननु मूर्त्तद्रव्यस्य युगपत्कात्स्र्न्येन देशद्वयवर्त्तित्वं लोके न क्वचिदपि दृष्टमिति चोदयति कथं पुनः परिच्छिन्नमिति । एकमेकदेशस्थमेव मुखं भ्रमाद्भिन्नं भिन्नदेशस्थं * वावभासत इत्याह न वयमिति । किं पुनरिदमेकस्मिन्नेकदेशवस्तुनि भेदभिन्नदेशत्वलक्षणं वस्त्विति तदाह विच्छेदस्त्विति । ननु माययापि प्रमाणविरुद्धं कथमवभासत इत्यत आह नहि मायायामिति । ननु विच्छेदावभासः कथम् † अविद्याविजृम्भितो यावतोर्ध्वाग्रोपि स्पष्टमवभासमानो वृक्षो ऽधोग्रो ‡ जले प्रतीयते नच तत्राज्ञानमस्तीति । उच्यते । नच विषयावरणमज्ञानमध्यासहेतुरित्युक्तम् तत्रौपाधिकभ्रमेषूपाधिरेव आत्माविद्यापरिणामे पुष्कलकारणं नचाधिष्ठान § याथार्थ्यस्य ज्ञानं सोपाधिकभ्रमेष्वध्यासविरोधि किंतु निरुपाधिकभ्रमेष्विति द्रष्टव्यम् ।

ननु सोपाधिकभ्रमत्वे भेदकर्तृत्वाद्यध्यासस्य न तत्त्वज्ञानादध्यासनिवृत्तिः किंतु उपाधिमात्रनिवृत्त्येति चोदयति ननु सत्येव विम्बैकतावगम इति । ‖ चोदितदोषं परिहर्त्तुमाशङ्कान्तरं प्रथमं निवर्त्तयति कथं जीवः प्रतिविम्बश्चेत् न विम्बात्मतामवगन्तुमलं प्रतिविम्बत्वात् अक्षिपात्रगतदेवदत्तप्रतिविम्बवदित्येतन्निराचष्टे देवदत्तस्याचेतनांशस्येति अचेतनत्वप्रयुक्ता तत्रानवगतिर्न प्रतिविम्बत्वप्रयुक्ता घटादिषु तथादर्शनादिति भावः । ननु शरी-

,, ११ रमेव चेतनमिति लोकायतस्तत्राह सचेतनांशस्यैवेति । दर्पणजाड्येन ¶ प्रतिबन्धात् स्वभावजाड्याद्वेत्यर्थः । देवदत्तप्रतिविम्बस्याचेतनत्वे हेत्वन्तरमाह

---

* चावभासत इति ३ पु० । † अविद्यया विजृम्भित इति १ पु० । ‡ जलेषु इति २ पु० । § याथात्म्यज्ञानमिति २ पु० । ‖ चोदितं दोषमिति २ पु० । ¶ प्रतिबन्धकत्वादिति ३ पु० ।

तथाचानुभव इति । कदाचित्तस्यापि चेतनत्वे स्वातन्त्र्यात्तच्चेष्टया विनापीदं २३ १३
चेष्टतामिति भावः । ननु देवदत्तस्यैव विम्बस्य भ्रमनिवर्त्तकतत्त्वज्ञानाश्रयत्वं
दृष्टमेवं विम्बत्वाद् ब्रह्मण एव भ्रमनिरासितत्त्वज्ञानाश्रयत्वं स्यादिति नेत्याह
यस्य हि भ्रान्तिरिति । न विम्बत्वकृतं * तत्त्वज्ञानाश्रयत्वं किंतु भ्रान्तत्व-
कृतं तदप्यज्ञत्वकृतं तदपि जीवत्वनिमित्तमिति भावः ।

ननु जीवलक्षणप्रतिविम्बात्मतामात्मनो ब्रह्म जानीयाद्वा न वा ।
न चेत्सर्वज्ञाताहानिः । जानाति चेत् ब्रह्म स्वात्मन्येव संसारं पश्येदिति
नेत्याह यस्तु जानीते देवदत्त इति । देवदत्तो हि स्वात्मानमक्षिपात्रे ऽल्प-
त्वादिगुणमवगच्छन्नपि तत्त्वज्ञानप्रतिहतत्वान्नानुशोचति एवं ब्रह्मापि स्वा-
त्मनि जीवे प्रतिविम्बे संसारं पश्यदपि तत्त्वज्ञानित्वान्नानुशोचति । तत्त्व-
ज्ञानसंसरणे चावदातश्यामत्वादिवन्नतरेतरत्र व्यवतिष्ठते इति भावः ।

नन्वेकतावगमेपि न तत्र विच्छेदविभ्रमो निवर्त्तते । सत्यम् । न प्रति-
विम्बकृतं तत्किंतूपाधेरज्ञानाजन्यत्वाज्ज्ञानानिवर्त्यत्वकृतमित्याह नापि
ज्ञानमात्रादिति ।† ननु जीवस्यापि तर्ह्युपाधिजाड्येनास्कन्दनसम्भवात्
न भ्रान्तिसम्यग्ज्ञानाश्रयत्वम् अप्रतिविम्बता च तदाश्रयत्वे स्यादिति नेत्याह
जीवः पुनरिति । रूपंरूपं प्रतिरूपो बभूव एकधा बहुधा चैव दृश्यते ,, १०
जलचन्द्रवत् अत एव चोपमा सूर्यकादिवदिति च श्रुतिस्मृतिसूत्रैर्जीवस्य
प्रतिविम्बभावस्य दर्शितत्वात् । अमूर्त्तस्य चाकाशस्य साभ्रनक्षत्रस्य जले प्रति-
विम्बवदऽमूर्त्तस्य ब्रह्मणोपि प्रतिविम्बसम्भवात् । जानुमात्रप्रमाणेपि जले दूर-
विशालाकाशदर्शनात् । जलान्तराकाश एवाभ्रादिविम्बयुक्तो दृश्यत इति वक्तु-
मशक्यत्वात् । तत्प्रतिविम्बत्वं चिद्रूपत्वं च शास्त्रप्रतिपन्नं प्रत्यक्षप्रतिपन्नं च
न निराकर्त्तुं शक्यत इति भावः ।

ननु घटाकाशवदुपाध्यवच्छिन्नो जीवः किन्न स्यात् । न । सामा-
न्यविशेषाभ्यामुपाधिभिरण्डान्तर्वर्त्तिब्रह्मणः सर्वात्मना जीवभावेनावच्छिन्न-
त्वादनवच्छिन्नस्य ब्रह्मणोऽण्डाद्बहिरेव सद्भावप्रसङ्गात् । तत्र सर्वगतसर्वनियन्तृ-
त्वादि-ब्रह्मणो न स्यादवच्छिन्नप्रदेशेष्वनवच्छिन्नस्य द्विगुणीकृत्य वृत्त्ययोगात् ।

---

* तत्त्वं-ज्ञानाश्रयत्वमिति १ पु· । † नन्विति १ पु· नास्ति ।

स्वरूपापेक्षया तत्सव न बहिःस्थितब्रह्मापेक्षयेति चेत् न । यो विज्ञाने तिष्ठन्नित्यादौ जीवव्यतिरिक्तस्यैव ब्रह्मणो जीवसंनिधानेन विकारान्तराव- स्थानश्रवणात् । प्रतिबिम्बपक्षे तु जलगतस्वाभाविकाकाशे सत्येव प्रतिबिम्बाका- शदर्शनादेकत्रैव द्विगुणीकृत्यवृत्त्युपपत्तेर्ज्जीवावच्छेदेषु ब्रह्मणोपि नियन्तृत्वा- दिरूपेणावस्थानमुपपद्यत इति प्रतिबिम्बपक्ष एव श्रेयानिति । मिथ्यातत्त्व-

२३ १८ ज्ञानाश्रयत्वं च तत्र प्रत्यक्षमित्याह । स चाहंकर्तृत्वमिति । उपाधिस्वरूप- मपि भ्रान्त्यैवावभासत इत्यर्थः । अतस्तत्त्वज्ञानेनोपाधिनिवृत्तेर्विच्छेदोपाय

,, १९ इत्याह अतो युक्त इति ।

नन्वज्ञानं जीवावच्छेदोपाधिरिति पुरस्तादुक्तम् तत्कथमहंकारोपाधि- ता जीवस्याभिधीयत इति । नैष दोषः । चैतन्यस्यावच्छेदकविकल्पतारतम्येन व्यवहारविकल्पतारतम्यात् । तथाहि । निर्विकल्पंकचैतन्यमात्रैकरसम् अविद्यासम्बन्धा * दीषद्विकल्पव्यवहारालम्बनं भवति सुषुप्ते । ततस्त- दुपादानान्तःकरणावच्छेदात्तदेव स्थूलतरव्यवहारालम्बनं भवति स्वप्ने । पुन- रन्तःकरणसंसृष्टस्थूलशरीरोपरागात् स्थूलतमं भवति जागरणे । न चोपा- धिभेदाज्जीवभेदप्रसङ्गः । पूर्वपूर्वोपाध्यवच्छिन्नस्यैवोत्तरोत्तरेणावच्छेदात् । निरपेक्षोपाधिभेदे हि जीवभेदः ।

ननु स्थूलशरीरोपादानभूतसूक्ष्मरूपसहितेन लिङ्गशरीरसंस्कारेणोपर- क्तमज्ञानं सुषुप्ते न जीवमवच्छेत्तुमर्हति । तत्र भ्रान्त्यभावात्तल्लक्षणत्वाच्च विभागस्य । अथ † भ्रान्त्यज्ञानमपेक्ष्यैवार्थगत एव विभागः ‡ कल्प्यते तत्र विभागस्य कार्यत्वे सुषुप्तिप्रलयादावभावाद् ब्रह्मण्येवाविद्यादिसाङ्कर्य्यं स्यादऽकार्य्यत्वे विभागस्यानादित्वाद § विद्यानिमित्तत्वं न स्यात् । उच्यते । ब्रह्मण्यविद्यादिसाङ्कर्यपरिहाराय सुषुप्त्यादावप्यस्त्येव जीवब्रह्मविभाग इति कल्प्यते । नन्वर्थगत एव तर्हि विभागो न विभ्रमगतः । सत्यम् । सुषु- प्त्यादिगतविभागादन्यत्र जीवब्रह्मविभागो विभ्रममात्रतया ऽविद्योपादान उच्यते । नन्वर्थगतो विभागस्तर्हि नाविद्योपादानः अनादित्वात् अविभ्रम-

---

* ईषत्त्वविकल्पेति १ पु० । † भ्रान्तिज्ञानमनपेक्ष्येति ३ पु० ।
‡ कल्प्यतामिति २ पु० । § अविद्यानिमित्तत्वे इति १ पु० ।

त्वाच्च । सत्यम् । तथाप्यविद्यातन्त्रो विभागो ऽनादित्वेपीति ब्रूमः । * यथा-हि । स्वात्माऽविद्यासम्बन्धो ऽविद्यातन्त्रो नाविद्योपादानः । सम्बन्धजननात् प्राक् स्वातन्त्र्येणावस्थानानुपपत्तेरज्ञानस्यानादित्वाच्चात्माविद्यासम्बन्धस्य नाविद्योपादानता ॥

ननु जीवब्रह्माश्रयो विभागः कथमविद्यातन्त्रः स्यात् । उच्यते । अनाद्यविद्याविशिष्टं चैतन्यमनादिजीवभावेन काल्पनिकानादिभेदस्याश्रयो न स्वरूपेण तस्यैकत्वात् अतो विशिष्टाश्रयो विभागः † स्वरूपेणाप्युपरज्यमानो विशेषणाविद्यातन्त्रो विशिष्ट इत्यविद्याकृतो विभाग उच्यते । अविद्यातन्त्राणां चानिर्वचनीयत्वमनादित्वं चाविद्यासम्बन्धवन्न विरुध्यते । लोके च दर्पणघटादिविशिष्टयोरेव मुखाकाशयोर्मिथ्याभेदावभासो न स्वरूपेणेत्युपाधितन्त्रता भेदस्योच्यते । तस्मादनाद्यविद्याप्रतिविम्बकृतविभागस्यैव जीवस्य तदुत्पन्नाहंकारादिविशेषेषु स्थूलप्रतिविम्बापेक्षया सर्वेषामुपाधित्वं न विरुध्यते ।

अत्र सर्वसङ्करवादी प्रतिविम्बस्यावस्तुत्वाभ्युपगमान्न जीव प्रतिविम्बमिति जल्पति । तत्र मुखचित्स्वरूपयोः प्रतिविम्बेषु नावस्तुत्वमिष्यते । भेदविपर्यासादीनामऽवस्तुत्वाभ्युपगमेपि न मुखचैतन्ययोः काचित् क्षतिः । मुखचित्स्वरूपयोश्च विम्बात्मतां प्रमिमीमहे मिथ्यांशपर्युदासेन । नच मिथ्यांशस्य बन्धमोक्षौ किंतु स्वरूपस्यैव स्वरूपगतस्यापि साङ्कर्यपरिहारयोपाधिभेदो दर्शितः । तस्मात्परसिद्धान्ताऽपरिज्ञानविलसितोऽयं सर्वसङ्करवादिनो विभ्रमः ।

‡ अवस्तुत्वाभ्युपगमादिति । अहंकारोपाधिनिमित्तो जीवब्रह्मविभागो २३ १९ ऽनात्माध्यासश्च दृष्टान्तद्वयेन सिद्धः । तत्र किं रज्जुसर्पोदाहरणेन वेदान्तविहितेनेति चोदिते तस्य प्रयोजनमाशङ्कान्तरनिवृत्तिरित्याह ननु तत्र विभ्राम्यत इति । निरुपाधिकाध्यासपरिनिष्पन्नाहंकारोपाधिकः कर्तृत्वाद्यध्यास इति कथयितुमित्यर्थः । ननु सर्वत्राधिष्ठानाध्यस्यमानव्यतिरिक्तोपाधिनिमित्त एवाध्यासो न निरुपाधिक इति चोदयति ननु तत्रापि यदि नामेति । पूर्वानुभवसंस्कारमात्रोपाधिमात्रमिहापि विद्यते स्वतन्त्रोपाधिरेव निराक्रियत इति

* यथा ह्यात्मेति २ पु० ।

† स्वरूपेणोपरज्यमानो विशेषणाविद्येति २ पु०, स्वरूपतोऽप्युपरज्यमानविशेषणेति ३ पु० ।

‡ मिथ्यात्वापगमइति हि मूले मिलति पाठः ।

परिहरति बाढमिहापीति । न पूर्वानुभवसंस्कार एव भ्रमहेतुर्न पूर्वभ्रान्ति-संस्कार इति नियमोऽस्तीति भावः ।

नन्वात्मनि सोपाधिकस्य निरुपाधिकस्य * चाध्यासस्योदाहरणचयेणैव सिद्धत्वान्न घटाकाशोदाहरणेन वेदान्तविहितेन कृत्यमस्तीत्याशङ्क्य

२४ १ चोद्यान्तरनिराकरणेनासङ्गत्वसिद्धिः प्रयोजनमित्याह तत्र यद्यप्यनिर्वचनीयतयैवेति । अरुणादिना स्फटिकादेर्गुणगुणित्वेन सम्भेदे योग्यस्याप्यनिर्वचनीयतया ऽरुणादेरसम्भेदावभासः सिद्ध इत्यन्वयः । कथं पुनर्घटाकाशोदाहरणेनासङ्गत्वसिद्धिरिति तदाह तत्र हीति । ननूदाहरणैरेवात्मनो ऽविकारित्वैकत्वासङ्गत्वानां सिद्धत्वान्नागमेन कृत्यमिति नेत्याह एतच्च सर्वमुदाहरणजातमिति । प्रमाणमन्तरेणोदाहरणमात्रादर्थसिद्ध्ययोगात्प्रत्युदाहरणसम्भवादिति भावः ।

अस्मत्प्रत्ययविषयत्वादिति भाष्यमात्मन्यध्यासोपपत्त्यर्थं तत्रास्मत्प्रत्ययस्तन्निमित्ताध्यासश्च दर्शितो विषयशब्दार्थमिदानीमाह तदेवं यद्यपीति । गौण्या वृत्त्या विषयशब्दप्रयोगे किं गुणसाम्यमिति तदाह प्रमेयस्य चेति । ननु † सविकल्पकाध्यासस्य सविकल्पकमेवाधिष्ठानं वक्तव्यम् तथादर्शनात् न ‡ निर्विकल्पकचिन्मात्रम् । तत्र कथमहङ्काराद्यध्यासेन § सविकल्पकेऽहंकाराध्यास इति चोदयति ननु व्यवहारयोग्यत्व इति । निर्विकल्पेपि सविकल्पाध्यासदर्शनादज्ञानाध्यासेन सविकल्पे पूर्वाहंकाराध्यासेन वा सविकल्पके

,, १२ चिदवभासे सम्भवत्येवोत्तराहंकाराध्यास इत्याह नाऽनादित्वेनेति ।

नन्वविकारिचैतन्यैकतानस्य निष्कलङ्कस्वभावानन्दस्यासङ्गस्यात्मनो न प्रमातृत्वमुपपद्यते प्रमाणक्रियापरिणामाभावात् । नच प्रमातृत्वहीनस्य कर्तृत्वभोक्तृत्वे सम्भवत इति प्रमातृप्रमाणप्रमेयकर्तृकर्मकार्यभोक्तृभोगभोक्तव्यसंसर्गलक्षणस्य व्यवहारस्यात्मन्यसम्भवादऽहंकारस्य चाचेतनतया तदाश्रयत्वायोगादुच्छिन्नव्यवहारमिदं जगदापद्येतेति प्राप्तम् ।

अथ स्वभावसिद्धचैतन्यप्रकाशेनैव विषयं प्रकाशयेत् तर्ह्यविशेषात्सर्वगतत्वाच्च सर्वं प्रकाशयेदित्यव्यवस्थैव । तस्माद्विकारसमर्थ एवात्मेत्यत्रापर

---

* चस्थाने वाकारः १ पु॰ । † सविकल्पाध्यासस्येति १, २ पु॰ ।

‡ निर्विकल्पं चिन्मात्रमिति १, ३ पु॰ । § सविकल्पे-इति १, २ पु॰ ।

आह न तावत्सर्वगतात्मवादिनामिदं चोद्यं सम्भवति । कथम् । यदि तावदात्मविषयेन्द्रियमनश्चतुष्टयसंनिकर्षादिनोत्पद्यमानं विज्ञानं क्रिया वा गुणो वा यावदात्मसमवाय्येवोत्पद्येत निरवयवे प्रदेशाश्रयत्वानुपपत्तेस्तदा युगपत्सर्वमूर्त्तद्रव्यसंयोगलक्षणत्वात्सर्वगतत्वस्य स्वाश्रयात्मसंयुक्तवस्तुनः सर्वस्यावभासिविज्ञानं स्यात् प्रदीपादिषु क्रियाप्रकाशगुणयोः स्वाश्रयसंयुक्ते वस्तुन्यनुरूपप्रकाशाद्यतिशयहेतुत्वात् । अदृष्टेन क्वचिदेव विषये ज्ञानं नियम्यत इति चेत् । न । प्रदीपादिषु यावत्संयुक्तवस्त्ववभासिष्वदृष्टेन वस्तुसामर्थ्यमतिक्रम्य नियमादर्शनात्सुखदुःखाद्यनिमित्ततृणाद्युपेक्षणीयसर्वविषयावभासेन चादृष्टनियमानुपपत्तेः । जनकमेव ज्ञानं प्रकाशयति न सर्वमिति चेत् न । चक्षुरादिषु प्रकाशप्रसङ्गात् । विषयस्य निरूप्यमाणत्वाद्विषयतया जनकमिति विशेषणायोगात् प्रदीपादिषु च प्रकाशगुणस्य स्वाश्रयसंयुक्ताजनकविषयस्यापि प्रकाशकत्वदर्शनात् । क्रियारूपे विज्ञाने समानमेतदिष्वादिव्यापाराणामनुद्दिष्टेपि विषये स्वाश्रयसंयोगे सत्यतिशयहेतुत्वदर्शनात् । निरवयवत्वादात्मनो न सर्वसंयोग इति चेत् । न किंचिदपि प्रकाशेत । क्रियागुणयोः स्वाश्रयमतिलङ्घ्यान्यत्र संसर्गायोगादससर्गादसंसृष्टे चातिशयायोगात् ।

अथ शरीरावच्छिन्नात्मप्रदेशसमवाय्येव ज्ञानं न यावदात्मसमवायीति मतम् । तर्हि सावयवत्वमात्मनः न व्यवहितविषयावभासश्च स्यात् आत्माश्रयप्रकाशस्य विषयेणासंसर्गात् न चाश्रयातिलङ्घनं क्रियादेरित्युक्तम् । नचानाश्रयात्मप्रदेशसंबन्धादवभासः । सर्वस्यावभासप्रसङ्गात् । नन्वभिचारकर्म्म स्वाश्रयात्मप्रदेशासंयुक्ते पुरुषान्तरेऽनर्थं जनयति तद्वदिहापि स्यात् । नैतत्सारम् । दृष्टक्रियासामर्थ्यादेवादृष्टेप्युभयात्मप्रदेशसंयुक्तस्य देवतात्मनो वेश्वरस्य वा हेत्वन्तरस्य वा ऽनुमीयमानत्वात् । नचात्मसंयुक्तमनःसंसृष्टेन्द्रियसंयुक्तविषये ऽतिशयः पुरुषाश्रयज्ञानादुपपद्यते । विषयसंयुक्तेपि वस्त्वन्तरे प्रकाशत इतिव्यवहारातिशयप्रसङ्गात् । पूर्वभावित्वाच्च संयोगप्रवाहस्य ज्ञानवता विषयस्य वर्त्तमानसंयोगप्रवाहाभावादेवमणुदेह * परिमाणात्मवादेपि तुल्यो दोषः । तस्मान्नसर्ववादिनां प्रमाणादिव्यवहारसम्भव इति ।

---

* परिणामेति तु १ पु॰ ।

२४ २४ सत्यमस्मत्पक्षे तु कथंचित्सम्भवं प्रदर्शयिष्यामीत्याह तचैवंभूतस्याहंकर्त्तुरिति । इदमंशस्यान्तःकरणस्येत्यर्थः । व्यापार इति परिणामोऽभिधीयते । प्रकाशस्वभावं सावयवमन्तःकरणमदृष्टेन्द्रियादिसहकृतं ध्रुवादिविषयपर्य्यन्तं दीर्घप्रभाकारेण परिणमते । तेजसः शीघ्राति * दूरगमनदर्शनात्परिणामद्वारेण कर्तृकर्म्मसम्बन्धोऽवस्थाविशेष इत्याह स च प्राप्नोतिक्रियाहित इति ।

स्यादन्तःकरणस्य स्वपरिणामद्वारेण विषयसंबन्धः आत्मनस्तु विषयविशेषावभासः कथमिति तदाह तेन विषयविशेषसंबद्धमिति । सर्वचाविद्यावृततया अनभिव्यक्तस्वभावमपि चैतन्यमन्तःकरणं येनयेनावस्थाविशेषेण विवर्त्तते तेनतेनाकारेण व्यज्यते ऽयःपिण्डेनेव चतुष्कोणत्वाद्यवस्थाविशेषमापाद्यमानेन कृशानुरितिविषयसंसृष्टान्तःकरणावच्छिन्नं चैतन्यं तदाकारमवभासत इति भावः । ननु प्रमातृरूपावच्छिन्नं चैतन्यं तद्रूपेण भासतां कथं चैतन्यस्य विषयावच्छेद इति तदाह कर्म्मकारकमपीति । स्वव्यापाराविष्टमिति परिणामसंसर्गादापन्नजाड्याभिभवलक्षणयोग्यत्वमुच्यते । अन्तःकरणं हि स्वस्मिन्निव स्वसंसर्गिण्यपि चैतन्याभिव्यक्तियोग्यतामापादयतीति भावः ।

नन्ववच्छेदकभेदे चित्प्रकाशभेदात्कथं विषयावच्छिन्नानुभवस्य प्रमातृरूपावभाससंसर्गः असंसर्गे वा कथं मयेदमवगतमिति प्रमातृप्रमेयसंसर्गावभासिसंवेदनं स्यात् अनुभवभेदात् । एकस्मिन्संबन्धावगमे पदार्थयोरवभासायोगादिति तचाह प्रधानक्रियाहितप्रमाचवस्थाविशेषावच्छिन्नाप † रोक्षतैकरूपामति । एकामित्यर्थः । परिणामस्योभयसंसर्गाद्व्यञ्जकाभेदेन व्यङ्ग्याविच्छेद इति भावः । ननूभयच चैतन्याभिव्यक्त्यविशेषे घटावच्छिन्नानुभवः प्रमाता किं वा ऽन्तःकरणावच्छिन्न इति न विशेषः स्यादिति नेत्याह ततश्चात्मनो ऽन्तःकरणावस्थाविशेषोपाधिजनितो विशेष इति । प्रमातेति वाक्यशेषः । कर्त्तुर्हि प्रमातृता न कर्मणः । तचान्तःकरणस्य कर्तृत्वात्तदवच्छिन्नः प्रमातेत्यर्थः । ननु चैतन्यस्यैकत्वे प्रमातैव फलमिति विरुद्धमापन्नमिति तचाह विषयानुभवसंशब्दितो ‡ विषयस्यापरोक्ष्यैकरसः फलमित्यन्तःकरणावच्छिन्नतया प्रमाता विषयावच्छिन्नतया फलमिति भावः ।

,, ,,

* अतिदूरं गमनेति २ पु॰ । † आपरोक्ष्यतैकरूपमिति १ पु॰ ।
‡ विषयस्यापारोक्ष्यैकरस इति ३ पु॰ ।

ननु क्रियाफलयोरन्तःकरणात्मसमवायिनोर्भिन्नाश्रयत्वं घटान्तःकर-
णाविषयतया च भिन्नविषयत्वमिति क्रियाफलयोरेकाश्रयत्वैकविषयत्वनियमवि-
रोध इति नेत्याह इति क्रियैकविषयता फलस्येति । * विषयतेत्याश्रयस्याप्यु- २४ २०
पलक्षणम् अन्तःकरणात्मनोरैक्याध्यासेनैकाश्रयत्वम् चैतन्यस्यापि घटावच्छे-
दादे † कविषयत्वमिति । ननु बुद्धिस्थमर्थं पुरुषश्चेतयत इति सांख्याः ।
तद्विरुद्धमात्मा स्वचैतन्योपरक्तं चेतयत इति तत्राह एवं चाहं कर्त्तेति । प्रथमं
बुद्धिस्थमर्थं तदात्मतामापन्नः पश्चाच्चेतयत इत्यर्थः । उक्तं तावत्सर्वगतस्या-
प्यात्मनोऽविद्यावृतप्रकाशस्य परिच्छिन्नान्तःकरणपरिणामोपाध्यभिव्यक्त्यपे-
क्षया विषयविशेषं प्रति प्रमातृत्वम् ।

ननु केयमभिव्यक्तिः । आवरणाभिभव एव न स्वरूपातिशयः । ननू-
क्तोपाधिः किंप्रमाणकः उक्तं ह्रीर्धीर्भीरित्येतत्सर्वं मन एवेति । धीशब्दवाच्य-
ज्ञानपरिणामवन्मनो विज्ञानं बुद्धिरिति । तदेवमुपाधिवशान्नियमेपि तदज्ञा-
नात् यच्चोदितं चैतन्यस्य सर्वविषयाविशेषित्वात्सर्वमस्य युगपदवभासेतेति
तत्परिहरति तत्र च प्रमातुः स्वयंज्योतिष इति । परिणामसंसृष्टकर्म्मोपाधि-
नियमान्नासंसृष्टेषु चैतन्याभिव्यक्तिरिति नैकस्य प्रमातुः सर्वविषयावभास इति
भावः । ननु कर्म्मकारकेपि चैतन्यमभिव्यक्तं चेत् सर्वप्रमातृसाधारणतया
सर्वेषामवभासतामिति नेत्याह कर्मकारकमपीति । एतत् प्रमातृचैतन्याभिन्न- ,, २४
तयैवाभिव्यक्तं तद्विषयचैतन्यं न प्रमात्रन्तरचैतन्याभेदेनाभिव्यक्तमतो न
सर्वेषामवभास्यत्वमित्यर्थः ।

ननु स्वयंप्रकाशमानस्य प्रदीपादिवत्स्वसंसर्ग्यशेषवस्तुप्रकाशित्वे प्राप्ते
कथमहंकारोपाधिनियमः कल्प्यते । न चान्तःकरणपरिणामसंसृष्टविषया-
दन्यत्र चैतन्यमुपरक्तमपि न प्रकाशयतीति युक्तम् । प्रकाशसंसर्गस्यैव प्रकाश-
मानताभिधानाद्विषयान्तरेषु चैतन्यस्यासंगितया नोपराग इति चेत् अन्तः-
करणेपि तर्ह्यसंगितया नोपराग इति तदुपाधिनापि न किंचिदपि प्रकाशेत ।
स्यादेतत् । अन्तःकरणावच्छिन्नो हि जीवः प्रतिविम्बस्थानीयः परिच्छिन्नस्त-
त्संसृष्टमेव विषयं प्रकाशयेद् ब्रह्म तु विम्बस्थानीयं सर्व्वगतत्वात्सर्वमव-

* विषयइति आश्रयस्याप्युपलक्षणमिति ३ पु० ।
† एकभिन्नविषयत्वमिति ३ पु० ।

२४ २४ भासयिष्यति । नच ब्रह्मणि *सर्वदर्शित्वं मुखावदातत्ववत् जीवमनुगच्छति । जीवगतं वा किञ्चिज्ज्ञत्वं मुखश्यामत्वादिवन्न ब्रह्मानुगच्छतीति सर्वमुपपन्नमिति । नैतत्सारम् । तथा सति विषयावच्छिन्नचैतन्यस्य ब्रह्मचैतन्यतया ऽहङ्कारावच्छिन्नजीवानुषङ्गाभावात्सर्वज्ञत्वमिव विषयावभासेऽपि जीवस्य न स्यात् । ननु जीवोपाधेरन्तःकरणस्य विषयस्य परस्परान्वयादुभयावच्छिन्नमपि चैतन्यमपि चैतन्यमन्योन्यसंसृष्टमिति युक्तो जीवस्य विषयावभास इति । नैतद्युक्तम् । तथा सति सर्वगतेन ब्रह्मणा नित्यसंसृष्टमन्तःकरणमिति तदुपाधौ जीवब्रह्मचैतन्याभेदाभिव्यक्तेर्ब्रह्मसार्वज्ञ्यं जीवस्य नित्यवत्प्रकाशेत ।

अथ मतम् । सर्वगतमपि चैतन्यमविद्यावृतत्वात् स्वयमपि तावन्न प्रकाशेत । नच स्वयमप्रकाशमानश्चैतन्यप्रकाशः प्रदीपवत् प्रकाश्यमवभासयितुं क्षमः । अङ्गुलिमात्रेणादित्यवत् परिछिन्नेनाप्यज्ञानेन सर्वगतमपि चैतन्यं तिरोधीयते तच्चान्तःकरणोपरागेणावरणाभिभवात्तत्रैवाभिव्यक्तम् चैतन्यं किंचिदेव प्रकाशयतीति । तदपि न युक्तम् । कार्यभूतेनान्तःकरणेन स्वोपादानाज्ञानाभिभवायोगात् । तस्मान्न युक्तं किंचिदज्ञत्वे ऽहंकारोपाधिवर्णनमिति । अत्रोच्यते । युक्त एवायमुपाधिः सर्वगतस्यापि जीवस्यासङ्गितया सर्वेणासंयोगात्प्रकाशस्य च संयुक्तवस्त्ववभासित्ववद् ब्रह्म तु सर्वोपादानतया स्वात्माभिन्नं जगदात्मानमिवावभासयति नतु जीवो ऽनुपादानत्वात् । कथं पुनः सर्ववस्तुदेशाव्यवहिततया सर्वगतस्य विषयान्तरेष्वसङ्गितयाऽसंसृष्टस्यान्तःकरणसंसर्गिता संभवेत् ।

उच्यते । यथा गोत्वादयो जातिविशेषाः केसरादिमद्व्यक्त्यन्तरप्रदेशसंनिहिता अपि स्वभावविशेषादश्वादिव्यक्त्यऽसङ्गितया तैरनभिव्यक्ता अपि सास्नादिमत्पिण्डसङ्गितया ऽभिव्यज्यन्ते । यथा वा प्रदीपप्रभावाय्वाकाशरसगन्धादिप्रदेशव्यापिन्यपि स्वभावविशेषात्तानि न† प्रकाशयन्ती रूपसंसर्गितया तदेव प्रकाशयति एवं चैतन्यमपि स्वभावविशेषादन्तःकरणे संसृज्यते नान्यत्रेति युक्तम् । यथा च केवलेन वह्निना न दाह्यमपि तृणादि अयःपिण्डसमारूढेन दह्यते तथाऽहंकारसमारूढेनात्मना केवलेनाप्रकाश्या अपि विषयाः प्रकाश्यन्त इति युक्तमहंकारोपाधिवर्णनम् ॥

---

* सर्वदर्शितत्वमिति १ पु० ।   † प्रकाशयति-इति ३ पु० ।

अथवा सोपाधिकत्वाज्जीवः परिच्छिन्नो न सर्वमवभासयति । जीवावच्छेदनिमित्तान्तःकरणपरिणामसंसर्गकृताभिव्यक्तित्वाद्विषयावच्छिन्नचैतन्यस्य जीवचैतन्यता च न विरुध्यते । ब्रह्माकारपरिणतान्तःकरणसंसर्गाभावाच्च न नित्यवद् ब्रह्मणः प्रकाशप्रसङ्गः । नचान्तःकरणस्वरूपमात्रसंसर्गिणोभिव्यक्तिरङ्गीकृता तद्गतधर्मादीनामपि प्रसङ्गात् । जीवाकाराहंवृत्तिपरिणतान्तःकरणेन च जीवोभिव्यज्यते । *अन्यथा ऽसुषुप्तेः । अतः परिच्छिन्नत्वा † न्न सर्वविषयावभासिता । अथवा ऽज्ञानावृतःस्वयमप्रकाशमानतया विविधविषयानऽनवभासयन्नन्तःकरणोपरागादावरणतिरोधाने तत्रैवा ‡ भिव्यक्तस्तत्संसृष्टमेव विषयमवभासयति । दृष्टं च वृश्चिकवृक्षादिकार्यस्य गोमयमृदादिकारणस्वभावतिरोधायकत्वमिति सिद्धैवात्मनि प्रमातृत्वादिव्यवस्थेति ।

विषयस्य चैतन्यविवर्त्तत्वात्तदभिन्नमपि चैतन्यमहमवभासैकरूपमुक्तम् । तत्रापसिद्धान्तप्रसङ्गं चोदयति ननु नीलादिविषयोपि चेदिति । यत्किंचित्साम्यादपसिद्धान्ते सर्वसिद्धान्तसंकरः स्यात् । अस्ति चात्र महान्सिद्धान्तभेदः । क्षणिकाद्विज्ञानाद्भेदेनार्थक्रियासामर्थ्यसत्त्वशून्यं विषयमाहुर्विज्ञानवादिनः । तत्त्वदर्शिनस्त्वद्वितीयात्संवेदनादभेदेपि विषयस्य भेदेनाप्यर्थक्रियासामर्थ्यसत्त्वं स्थायित्वं चाबाधितमस्तीति वदन्ति । तत्र कथं सिद्धान्तसंकर इति वदितुं संवेदनैक्यं दर्शयति मैवम् ‖ परस्परव्यावृत्ताविति । अस्त्वेकरूपता प्रत्यभिज्ञानाद्भेदोपि घटसंवित्पटसंविदित्यवभासत इति तत्राह विच्छेदावभासेपीति । स्वरूपप्रत्यभिज्ञा परोपाधिविच्छेदेन न बाध्यत इति भावः । नन्वेकत्वेपि संविदां विषयाभेदः किं न स्यादिति तत्राह यदि स्यादिति । अनुवृत्तस्य व्यावृत्तान्नाभेदोनुवृत्तत्वादाकाशघटादिवदित्यनुमानमुक्तम् । इदानीं प्रत्यक्षोपि विषयसंविद्भेद इत्याह किंच तैरपीति । नीलात्मकसंविदिति नीलमेवोच्यते । युगपद्विषयविषयिसंविद्द्वयानभ्युपगमात् । प्रत्यगवभास इति । अहं संवेदनमात्रमहं नीलं पश्यामीति कर्तृकर्म्मतया भेदः प्रत्यक्ष इत्यर्थः । अत्र विज्ञानवादी चोदयति नैतद् द्वयोरपीति । अयं भावः । २५ १ ,, ८

* अन्यथा जीवस्य सुषुप्तेरिति २ पु· । † न जीवस्य सर्वविषयेति २ पु· ।
‡ अभिव्यक्तं तत्संसृष्टेति १ पु·, अभिव्यक्ततत्संसृष्टेति २ पु· ।
§ सामर्थ्यमस्त्वेति ३ पु । ‖ परस्पराव्यावृत्ताविति १ पु· ।

संविदोन्यच्चेन्नीलं न तत्संवेदने ऽवभासेत । भासते चेत्सर्वं किमिति नाव- भासते विशेषसंबन्धाभावात् । नीलस्य संविदो जनकता विशेषसंबन्ध इति चेन्न इन्द्रियस्यापि विषयताप्रसङ्गात् । तस्मात्स्वाभाविकासाधारणाभेदसंबन्धा- देव विज्ञाने नीलमवभासत इति । सिद्धान्ती तु भेदावभासोपि प्रत्यक्षो युक्त्या

२५ ८ कथमपह्नूयत इत्याह कथं पुनरिदमहं जानामीति । विज्ञानवादी तु नैत- त्त्रयमेकसंवित्प्रतिभासि किंतु संवित्त्रयमेतत्क्रमवर्त्तीति परिहरति नायं तद- वभास इति । क्रमवर्त्तित्वे अन्यसंवित्काले अन्यन्नावभासेत इद तु त्रितयं युगपत्प्रत्यक्षमेवावभासते ततः प्रत्यक्षविरुद्धः क्रम इत्याह सिद्धान्ती कथं पुनस्तेष्विति । आह विज्ञानवादी तद्वासनासमेतसमनन्तरप्रत्ययसमुत्थ- मिति । अहमित्यहंकल्पनोपारूढं कदाचिद्विज्ञानं भवत्यनन्तरं चेदमिति * विषयविकल्पितं विज्ञानं भवति । ते एव विज्ञाने वासनासजातीयज्ञानस्य पूर्ववृत्तसजातीयज्ञानमेव वासना नान्यः संस्कार इत्युक्तम् । तच्च वासनाद्व- यसमेताज्जानामीति क्रियाविकल्पप्रत्ययात्कारणत्रितयानुरूपेणाहमिदं जाना- मीति विषयक्रियाहंकल्पनाविकल्पितं आकारमेकं विज्ञानमुत्पद्यत इत्याह सिद्धान्ती किं पुनरेवमिति । नहि केवलमहमिति चेदमिति वा जाना- मीति वा प्रत्यया दृष्टाः । किंतु प्रथमत एव प्रत्ययोहमिदं जानामीति कर्तृ- कर्म्मानुभवात्मको दृष्टः । तस्माद्यथाप्रतिभासमेवाहमिति विज्ञानाद्भिन्नमर्थ- क्रियासमर्थं नीलवस्त्वनुमन्तव्यमिति भावः । सत्यम् नानुभावमाश्रित्य संवेद- नादभिन्नं नीलं ब्रूमः किंतु † विज्ञानेन नीलस्य प्रतिभासान्यथानुपपत्त्या । कथम् । स्थायित्वे हि विज्ञानविषययोः क्रियानिमित्तासाधारणपरस्परसंबन्धा- दसाधारणो विषयावभासः स्यात् । क्षणिकस्य त्वागन्तुकसंबन्धाभावे यदि स्वाभाविकाभेदसंबन्धोपि न स्यात् । तच्च चैतन्येनासंस्पृष्टस्य प्रतिभास एव न स्यात् । अतः प्रतिभासानुपपत्तिरभेदं साधयतीति विज्ञानवादी वर्ण-

,, १३ यति क्षणविध्वंसिनः क्रियानुपपत्तेरिति । तत्र प्रत्यक्षेण विज्ञानानां क्षणि- कत्वमुच्यते किंवा ऽनुमानेन । ननु प्रत्यक्षेण तथा हि । वर्त्तमानाव- भासिज्ञानं स्वात्मनो ऽवर्त्तमानाद्व्यावृत्तिमपि गमयति । नीलज्ञानमिवानी-

---

* विषयकल्पितमिति २ पु॰ । † विज्ञाने नीलस्येति २ पु॰ ।

लव्यावृत्तं नीलमतो वर्तमानक्षणमात्रं विज्ञानं * प्रत्यक्षमिति । न तावत्प्रत्य-
क्षेण विज्ञानभेदावभास इत्याह यद्येवमहमिति संविद् इति । २५ १५

ननु सत्यपि भेदावभासे अतिसादृश्यान्न स्पष्टमवभासत इति शङ्कते अथात्यन्तसादृश्यादिति । कोयमभिप्रायः । यदि तावत्संविदोन्यो भेदो ज्ञानान्तरगम्यश्च सादृश्यदोषात् स्पष्टं नावभासत इत्यभिप्रायः । तदा धर्मि-प्रतियोगिसंविदोः संविदन्तराविषयत्वात् न तयोर्भेदग्रहणं स्यात् विषयत्वे वा धर्म्मिप्रतियोगिभेदाख्यत्रितयमपि भेदसंवेदने कल्पितं तदभिन्नं वा स्यात् । अथ संवित्स्वरूपमेव भेदः संवेदनमेव तत् ज्ञानमिति तत्राह संविदोपि चेदिति । अपि च ऐक्यप्रतिभासे सादृश्यकल्पनं प्रमाणविरुद्धं भिन्नयोरैक्यभ्र-मश्च सादृश्यकल्पनायां प्रमाणं तदभावाच्च न सादृश्यसिद्धिरित्याह अपि च तद्रूपप्रतिभास इति । नन्वैक्यावभासस्य व्यामोहत्वान्न सादृश्यकल्पना प्रमा-णविरुद्धा ऐक्यभ्रमश्च भिन्नेषु सादृश्यमन्तरेणानुपपन्न इत्यर्थापत्तिमूला च सादृश्यकल्पना अतः सिद्धं सादृश्यमित्याह पूर्ववादी तद्रूपप्रतीतेर्व्यामोहत्वा-दिति । मैवम् ऐक्यभ्रमसादृश्यसिद्ध्योरितिरेतराश्रयत्वादिति परिहरति नेतरे-तराश्रयत्वादिति । नन्वैक्यप्रतिभासप्रामाण्यं न स्वतः सिद्ध्यति किंतु सादृश्यस्य निर्मूलत्वप्रमाणविरुद्धत्वापेक्षया सादृश्यस्य च निर्मूलत्वप्रमाणविरुद्धत्वमैक्यप्र-तिभासस्य प्रामाण्यापेक्षयेति तुल्यं तवापीतरेतराश्रयत्वमिति चोदयति स्यादे-तत् अव्यामोहेपीति । ऐक्यप्रतिभासो न सादृश्याभावापेक्षः किंतु स्वत एव २६ २ प्रमाणमिति परिहरति नैतत्स्वारसिकमिति । ननु सादृश्यमपि स्वत एव सिद्ध-मित्याशङ्क्याह न तु सादृश्यकल्पना स्वत इति । कुतस्तर्हि सादृश्यसिद्धिरित्यत आह अप्रामाण्यपूर्विकेति । ऐक्यभ्रमो हि भिन्नेषु सादृश्यं कल्पयतीति भावः । ,, ७

ननु केयं प्रत्यभिज्ञा नाम । यत्सामर्थ्यबलात्संविदैक्यं प्रतीयते । पूर्वानुभवसंस्कारसहितादिदानींतनवस्तुप्रमितिकारणाज्जातमेकस्य कालद्वय-संबन्ध † विषयकं प्रत्यक्षज्ञानं प्रत्यभिज्ञेति चेत् । न तर्ह्यात्मनि सा संभवति । कथम् । विज्ञानस्वभावस्य ह्यात्मनः स्थायित्वे स्वयंप्रकाशस्य ज्ञानान्तरा-गम्यत्वात्तद्विनाशसंस्काराभावात्स्वरूपस्य चाविनाशादविनाशिनः संस्काराभा-

---

* प्रत्यक्षमित्यर्थ इति ३ पु॰ । † कप्रत्ययो नास्ति २, ३ पु॰ ।

त्वात्स्वयंप्रकाशस्येदानींतनस्वरूपव्यतिरिक्तप्रमाणकारणाभावाच्च न प्रत्यभिज्ञा-कारणं तावदात्मनि संभवति । नच स्वरूपज्ञानमेव प्रत्यभिज्ञा । तस्य प्रदीपप्रभावद्वर्त्तमानप्रकाशिनः पूर्वापरपरामर्शात्मकतायोगात् । सोऽहमिति च विषयाकाराभ्युपगमे स इत्यहमिति * चाकारभेदेन विषयभेदाज्ज्ञानभेद-सिद्धेः । तस्मान्नात्मनि प्रत्यभिज्ञेति युक्त्या व्यामोहत्वसिद्धिरिति ।

अत्रोच्यते । अन्तःकरणविशिष्टे तावदात्मनि प्रत्यभिज्ञानं ब्रूमः न निष्कलङ्कात्मस्वरूपमात्रे तस्य मोक्षावस्थायिनः शास्त्रैकगम्यत्वात् संसारावस्था-यामन्तःकरणविशिष्टरूपानपायात् तस्यैव प्रत्यभिज्ञया स्थायित्वाभिधानात् तच्च चान्तःकरणजन्याहंप्रत्ययाधीनत्वाद्विशिष्टात्माभिव्यक्तेः । पूर्वकालविशिष्टात्मा-नुभवनिमित्ताहंवृत्तिसंस्कारसहित†मन्तःकरणमेवेदानींतनात्माभिव्यक्तिनिमित्तं सत् पूर्वापरकालविशिष्टात्मविषयं प्रत्यभिज्ञानमुत्पादयति । ननु पूर्वापराभि-ज्ञयोरविषयतयाभिव्यक्तस्यात्मनः कथं प्रत्यभिज्ञाविषयत्वमिति । नैष दोषः । यथा संवेदनस्य स्वसंविदितरूपस्यापि कालान्तरे स्वसंस्कारजनितस्मृतिवि-षयत्वं तद्वदिहाप्यभिज्ञायामविषयस्यापि प्रत्यभिज्ञाविषयत्वं न विरुध्यते ।

ननु स्वयंप्रकाशस्य विषयतैवानुपपन्ना । मैवम् । देशकालान्तःकरण-विशिष्टतया विषयतोपपत्तेः । यथा धर्म्मस्यागमैक‡समधिगम्यस्यापीदानीं फलदानायोन्मुखीभावादिलक्षणधर्म्मविशिष्टतया वर्त्तमानफलोदयलिङ्गादिगम्य-त्वम् तद्वत् । नन्वेकस्यैवात्मनः प्रत्यभिज्ञायां कथं कर्तृकर्म्मतया युगपद्विरुद्ध-रूपद्वयान्वयः । ननु सर्ववादिनां देहव्यतिरिक्ताद्यनुमानविषयतया कर्तृकर्म्म-भावः संप्रतिपन्नः । तन्न । अनुमानादौ विषयस्य कारकताऽभावात् आकार-मात्रतया विषयत्वात् तत्र कर्तृतैवात्मनो न कर्म्मता । प्रत्यक्षे तु पुनर्विष-यस्यापि स्वविषयज्ञानजनकतया कर्म्मकारकत्वात्प्राप्तैवात्मनो युगपदेकस्यां क्रियायां विरुद्धरूपद्वयापत्तिरिति ।

उच्यते । अन्तःकरणविशिष्टतयात्मनो ज्ञातृत्वं पूर्वापरकालविशिष्ट-तया च ज्ञेयत्वमित्युपाधिभेदादविरोध इति । सोऽहमिति च प्रत्यभिज्ञायाः स्वानुभवसिद्धत्वाद्यथाकथंचिन्निमित्तं कल्पयितव्यम् । व्यवहाराविसंवादाद्वा-

---

* चकारस्थाने वाकारो २ पु॰ । † अन्तष्करणेति १ पु॰ । ‡ समाधिगम्यस्येति १ पु॰ ।

न्तित्वायोगात्। नच सोहमित्याकारभेदादर्थभेदेन ज्ञानभेदो युक्तः। विज्ञानं क्षणिकमित्याकारभेदेनार्थभेदाद्विज्ञानस्य क्षणिकताभावप्रसङ्गात्। सत्यम्। विज्ञाने क्षणिकत्वादिधर्म्मोपरागो विकल्पव्यवहारमात्रं न सत्यतोस्तीति चेत्तथा स्थायित्वादिव्यवहाराश्च कालादिधर्मोपाधित्वाद्विज्ञाने विकल्पव्यवहारा इत्यविशेषः। इयांस्तु विशेषः। सति काले स्थायित्वादिविकल्पप्रत्ययाः सोहमित्याद्यनुभवसिद्धा व्यवहाराऽविसंवादिनोर्थक्रियासामर्थ्याश्च दृश्यन्ते न तथा क्षणिकत्वादिव्यवहारा इति।

अत्र प्राभाकरा मन्यन्ते। नैवम्प्रत्यभिज्ञायां विषयत्वेनायमात्मा सिद्ध्यति किंत्वाश्रयत्वेनेति। तदयुक्तम्। पूर्वापरकालविशिष्टस्य आत्मनः क्षणमात्रवृत्तिप्रत्यभिज्ञानाश्रयत्वायोगात्तदाश्रयतया स्थायित्वसिद्ध्यभावात्। ननु पूर्वकालसंवेदनमिदानीमनुस्मर्य्यमाणं स्वाश्रयं तदानीन्तनमात्मानं साधयति स्मृतिश्च स्वाश्रयतयेदानींतनमात्मानं साधयतीति कालद्वयविशिष्टात्मसिद्धिरिति। नैतत्सारम्। स्मृतिपूर्वानुभावौ हि तत्तत्कालमात्मानं साधयतः अभिज्ञाप्रत्यक्षद्वयवदेकस्य कालद्वयसंबन्धः केन सिद्ध्यतीति वक्तव्यम्। पूर्वापरसंविद्द्वयमेव साधयतीति चेत्। न। घटादिष्वभिज्ञाद्वयव्यतिरेकेण प्रत्य * भिज्ञापादनात्। किंच। न तावत्स्वयमेव संविद्द्वयं साधयत्येकैकस्य कालद्वयवदात्माश्रयत्वाभावात्। न च संभूय पूर्वापरसंविद्द्वयं तद्वन्तमात्मानं साधयत्यन्योन्यस्यान्योन्यसंविद्विशिष्टात्मश्रयत्वाभावात् अथ संविद्द्वयमेव पूर्वापरसंविद्द्वयाश्रयात्मैक † त्वविषयसंविदन्तरमुत्पादयति सिद्धं तर्हि प्रत्यभिज्ञानमात्मविषयम्। किंच। अनुभूतं मयेत्याश्रयविशिष्टपूर्वसंविदनुस्मृतेः स्वानुभवसिद्धत्वात्स्मर्यमाणतयैवेदानीं पूर्वानुभूतात्मसिद्धिर्न्न पूर्वसंवेदनाश्रयतया तस्याऽविद्यमानस्येदानीमसाधकत्वात्। स्वयंप्रकाशमानं हि संवेदनमात्माश्रयं साधयति न स्मृतिविषयतया परप्रकाश्यम् अन्यथा धर्मादीनामपि परतःसिद्धानां स्वाश्रयात्मसाधकत्वप्रसङ्गात्। तस्मात्सिद्धमात्मनि प्रत्यभिज्ञानमिति।

स्यात्तर्ह्यनुमानात्क्षणिकत्वमिति घटादौ साधयति अथान्ते क्षयदर्शनादिति। घटस्य विनाशान्तरपूर्वक्षणविशिष्टसत्त्वमन्त इत्युच्यते। तस्य स्वस- २६ ७.

---

* प्रत्यभिज्ञोपपादनादिति प्रागभूत्तत्र प्रत्यभिज्ञापादानादिति शोधितं २ पु॰।

† त्वप्रत्ययो नास्ति ३ पु॰।

त्तात्क्षणादुत्तरक्षणे विनाशो दृष्टः । तत्रान्त्यक्षणावच्छिन्नघटसत्त्वात्पूर्वपूर्वक्षणावच्छिन्नघटसत्त्वान्याऽऽदिरित्युच्यन्ते । तान्यपि स्वसत्ताक्षणादुत्तरक्षणे विनाशव्याप्तानि घटसत्त्वादन्त्यक्षणावच्छिन्नघटसत्त्ववदित्यनुमानम् । ततश्च सतोऽनन्तरं विनाशात्क्षणिकत्वसिद्धिरिति । क्षणिकेष्वैक्यं सादृश्यनिबन्धनमिति ।

८ तत्र प्रत्यनुमानमाह आदौ सत्तादर्शनादित्यादि । घटसत्तावच्छेदकाः* क्षणा उच्यन्ते । अन्त इति । विनाशावच्छेदकत्वेनाभिमताः क्षणास्तत्रान्त्यक्षणाः सर्वे घटसत्तया व्याप्ता इति साध्यते कालत्वात्सत्तावच्छेदककालवदिति प्रत्यनुमानम् । अभावानुभवविरुद्धमन्त्ये सत्तानुमानमिति चोदयति क्षयानुभवेति । तर्ह्यन्त्यक्षणात्पूर्वक्षणावच्छिन्नघटसत्त्वानामनन्तरक्षयानुमानमपि प्रत्यभिज्ञाविरुद्धमिति परिहरतीहापीति । क्षयानुभवोऽभिज्ञानुमानं बाधते न प्रत्यभिज्ञानुमानात् दुर्बलेति नेत्याह नह्युभयोरिति ।

सर्वे भावाः क्षणिका अर्थक्रियाकारित्वात् । यदक्षणिकं न तदर्थक्रियाकारि यथा शशविषाणमित्यनुमानान्तरं दर्शयितुं स्थायिनोऽर्थक्रियानुपपत्तिमाह अथ मन्येत योऽसौ स्थिरत्वाभिमत इत्यादिना । ननु स्थिरस्यैव निमित्तसंयोगादन्यथाभूतस्य क्रियापूर्वकं कार्य्यमुत्पादयितुं सामर्थ्यं न क्षणिकस्येति सिद्धान्ती चोदयति कथमयोग इति । इत्थमयोग इत्यादिः परिहारः । क्रमेणेति । अनेकानि कार्याणि सातत्येन कुर्यादित्यर्थः । एकं वाऽनेकं वा कार्यं सकृत्कृत्वो† परमत इत्याह यौगपद्येनेति । क्रमपक्षं दूषयति न तावदिति । अनेकानि कार्याणि कर्तुं समर्थश्चेत्पुष्कलकारणस्य भावादेकस्यानेककार्यदर्शनाच्च सकृदेव कुर्यादिति भावः । द्वितीयं पक्षं दूषयति नापि यौगपद्येनेति । अर्थक्रियाकारित्वलक्षणत्वात्सत्त्वस्येति भावः । अतः सकृत्कर्तुः कालान्तरे पुनः कर्तृत्वे निमित्ताभावादकर्तृत्वे वा सत्त्वात्सकृदेव सत्त्वमित्युपसंहरति अतोऽर्थक्रियाकारित्वादेवेति ।

सिद्धान्ती तु स्थायिनः सकृदेव कार्यं कृत्वा तूष्णींभूतस्यापि नासत्त्वप्राप्तिः सत्त्वस्यार्थक्रियाकारित्वलक्षणत्वाभावादित्युपपादयति अथ कथमित्यादिना । तत्राह स्वविषयज्ञानजननमिति । युक्तं बाह्यार्थानामेतादृशं सत्त्वं

---

* क्षणादुच्यन्ते—इति २ पु॰, क्षणा उच्यन्त इति उपकल्पितमास्ते ३ पु॰ ।

† उपरमत इति १, २ पुस्तकेष्वस्ति, उपरमतीति तु न्याय्यम्·उपरमते इत्याहेत्युपकल्पितं ३ पु॰ ।

विज्ञानानां तु स्वविषयविज्ञानाजनकत्वान्न सत्त्वलक्षणमिति दूषयति प्राप्तं २६ १९
तर्हि सर्वासामिति । नन्वेकसन्तानज्ञानानामन्योन्यविषयविषयिताभावेऽपि
पुरुषान्तरज्ञानस्य विषयतया पुरुषान्तरज्ञानं जनकमित्यर्थक्रियालाभः संवि-
दामिति नेत्याह न सन्तानान्तरेपीति । पुरुषान्तरज्ञानं प्रति पुरुषान्तरज्ञान-
स्याप्रत्यक्षत्वादनुमेयत्वादिति भावः । अनुमानज्ञानविषयत्वात्तर्हि सन्ताना-
न्तरज्ञानस्य सन्तानान्तरज्ञानं जनकमिति नेत्याह अनुमानेपीति । प्रत्यक्ष-
मेवार्थजन्यं नानुमानादीति ते मतमित्यर्थः । ननु सर्वं संवेदनजातं सर्वज्ञ-
ज्ञानस्य विषयतया जनकं भवति तस्य सर्वविषयप्रत्यक्षत्वादित्यत आह * न
सार्वज्ञेपीति । साक्षादिति । सहविज्ञानोपप्लवैरव्यवधानेन सर्वज्ञज्ञानो-
परक्ततया तदभेदेनेत्यर्थः । † तत्र हेतुः । संसारसंविदेकरूपत्वप्रसङ्गादिति ।
संविद्विषययोरभेदोपगमात्सांसारिकज्ञानैः सोपप्लवैः सर्वज्ञज्ञानं दूषितं स्यादि-
ति भावः । ननु सर्वोपप्लवोपरक्तमपि तत्त्वज्ञानेन बाधितत्वान्न दोषमावहति ।
न तावत्तदेव ज्ञानं सोपप्लवं बाधते । प्राप्तिबाधयोरेकस्मिन् क्षणे ऽनुपपत्तेः ।
ज्ञानान्तरस्य तु न पूर्वज्ञानोपप्लवो विषयो येन तदनुवादेन बाधः स्याद्विषयत्वे
च बाधकज्ञानेप्युपप्लवानामभेदः स्यात् । तर्हि विनैवोपप्लवैः ‡ सार्वज्ञे
ज्ञाने विज्ञानान्युपरज्यन्त इति नेत्याह अतद्रूपत्व इति । सर्वज्ञस्य लौकिको-
पप्लवा § नवभासनादुपदेशायोग इति भावः ।

अथ न स्वविषयज्ञानजननमर्थक्रिया किंतु सजातीयलक्षणान्तरोत्पाद
इति चोदयति अथेति । उत्तरमाह चरमक्षणस्यासल्लक्षणत्वप्रसङ्ग इति ।
अयमर्थः । अहमिति संतानपतितानि विज्ञानानि स्थायित्वानुसंधानकल्प- ,, २४
नाभ्यां रागादिदोषैर्विषयैश्चोपप्लुतानि पूर्वपूर्वसजातीयविषयविज्ञानलक्षणसं-
स्कारेभ्य उत्तरोत्तराण्युत्पद्यन्ते । तत्र सर्वमिदं क्षणिकमिति भावनया ऽना-
दित्वकल्पना निवर्तते । स्वलक्षणभावनया द्रव्यगुणशब्दकर्मविशेषणविशे-
ष्यकल्पना विनश्यति । दुःखमिति भावनया रागादिदोषप्रवृत्तिसुखदुःखो-
पप्लवाः क्षीयन्ते । शून्यमिति भावनया विषयोपप्लवविगमः । ततश्च भाव-
नाभेदैश्चतुर्भिश्चतुर्विधसंस्कारविरोधिभिश्चतुर्विधोपप्लवे क्रमेण मन्दीकृते

---

* न सर्वज्ञेऽपीति २ पु॰, न सर्वज्ञज्ञाने-इति ३ पु॰ । † अत्र हेतुरिति ३ पु॰ ।
‡ ज्ञाने-इति नास्ति २ पु॰ । § अनवभासत्वादिति ३ पु॰ ।

भावनाप्रकर्षपर्य्यन्तात्समनन्तरप्रत्ययात्सर्वोपप्लवविरहिविज्ञानमुत्पद्यते । तत्सं-
सारसन्तानस्यान्त्यत्वाच्चरममिति तस्य कार्यान्तराभावादऽसत्त्वप्रसङ्गात्क्र-
मेण सर्वमसदेव पूर्वं स्यादिति । ननु चरमक्षणोऽपि स्वसन्तानज्ञानान्त-
२६ २४ राभावेऽपि सर्वज्ञज्ञानं विषयतया जनयतीति नेत्याह नच * सार्वज्ञ-
ज्ञानजननेति । तुल्यस्वभावयोः कार्यकारणभाव एकैकसन्तानता नाम
चरमक्षणसर्वज्ञज्ञानयोर्विशुद्धतया तुल्यस्वभावयोः । कार्यकारणभावादवि-
२७ १ च्छिन्नः संतान इति भावः । मा भूत्संतानविच्छेद इति नेत्याह मुक्त्यभा-
वप्रसङ्गादिति । संतानविच्छेदो हि मुक्तिरभिप्रेतेति भावः । अथ सर्वज्ञसंता-
नस्य तुल्यसंतानस्य तुल्यस्वभावतया जनकत्वात्तत्संतानैक्यमेव मुक्तिरिति ।
तर्हि विषयतया जनकत्वमेव नास्तीत्याह नच संवित्संविदो विषय इति ।
प्रत्यक्षत्वं विषयशब्देनोच्यते पुरुषान्तरसंवेदनस्यानुमेयत्वात् । अथवा ।
प्रत्यक्षस्यैव संवेदनस्य देहान्तरसंबन्ध एवानुमीयत इति सर्वप्रमाणाविषयः
संविदिति । अथवा संविदात्मना भेदाभावादित्ययमर्थः । संवित्संविदन्तरान्न
संविदाकारेण भिद्यते प्रतियोगिनो ऽसंवित्त्वप्रसङ्गादेका संवित्स्यात् । असं-
विदाकारेण भेदेऽपि संविदेकैत्र स्यादिति न संविदां विषयविषयिभाव इति ।

किंचेति । अर्थक्रिया नाम कारणसत्त्वे हेतुः प्रतीतिनिमित्तं वेति विकल्प्य
हेतुत्त्वे दूषणमाह स्वकारणन्निष्पन्नस्येति । कार्यात्प्रागेव कारणस्य न्निष्पन्नत्वा-
दित्यर्थः । नच निष्पन्नमप्यर्थक्रियातः पूर्वमसदिति शक्यं वक्तुम् । शशविषा-
णतुल्यत्वेनाकरणत्वप्रसङ्गात् । प्रतीतिपक्षे अनवस्यादूषणमाह तच तस्या
अन्यत इति । ननु कार्यमर्थक्रिया नाम ज्ञानानि च पूर्वेषामुत्तरोत्तराणि
कार्य्याणि स्वयंसिद्धानीति न प्रतीत्यनवस्थेति चोदयति ननु स्वज्ञानार्थक्रि-
याया इति । तर्हि कार्यकारणभूतानां ज्ञानानां स्वयंसिद्धत्वान्नार्थक्रियास-
त्तावगतिनिमित्तमित्याह न तर्ह्यर्थक्रियात इति । मा भूत्कारणभूतं ज्ञानं
कार्यभूतज्ञानाधीनप्रकाशं स्वयंप्रभत्वात् तथापि स्वयं स्वेनैवावभासत इति
,, ६ स्वयमेव स्वस्यार्थक्रियेति नेत्याह नहि स्वरूपमेवेति । तस्मान्नार्थक्रियाका-
रित्वलक्षणं सत्त्वं किंतु स्वाभाविकमिति सकृत्कार्यं कृत्वा तूष्णींभूतस्यापि
स्थायिनः सत्त्वं न विरुध्यत इति ।

---

* सर्वज्ञज्ञानेति ३ पु० ।

इदानीं क्रमेणापि कार्य्यं कृत्वा सत्त्वं न विरुध्यत इत्याह यत्पुनः २७ ७
क्रमेणेति । शक्तस्यापि सहकारिसन्निधानविशेषक्रमापेक्षया कार्यक्रमो युज्यत
इत्याह स्थायिनोपीति । शक्तस्य सहकारिकारणापेक्षामपलपति अथ कारण-
स्येति । गूढाभिसन्धिरुत्तरमाह अकारणस्यापि नतरामिति । मा भूत्तर्हि
शक्तस्याशक्तस्य च सहकार्यपेक्षेति तत्राह असहकारि विश्वं स्यादिति ।
शक्तस्यैव सहकार्यपेक्षया कार्यकरत्वानुभवविरोध इति भावः । अशक्ता एव
पदार्थाः सामग्रीलक्षणकारणोत्पत्तौ परस्परमपेक्षन्त इति नानुभवविरोध
इत्याशङ्कते अथाकारणं कारणोत्पत्तय इति । कार्ये प्रत्यऽशक्ता अपि पदार्थाः
सामग्रीकारणं प्रति शक्ता वा न वेति * विकल्पयति अथ तत्कारणस्येति । उभ-
यत्र दूषणं कारणं † चेदिति अथ नापेक्षेत्युक्तार्थम् । ननु शक्ताऽशक्तयोरपेक्षा-
भावे कथं ‡ सहकार्यनुभवः कथ्यते । ननु कार्यस्याप्यसत्त्वाविशेषात्सर्वस्मा-
ज्जन्म किं न स्यात् । कारणस्य वा विशेषसंबन्धहीनस्य सर्वस्य जनकता किं न
स्यादित्यव्यवस्थायां कथं कार्यकारणभावमात्रं त्वया व्यवस्थाप्यते । § अथा-
ऽन्वयव्यतिरेकसामर्थ्यात्कार्यकारणनियम इति । सहकारिणोपि तथेत्याह
तस्माद्यथैव हेतोरिति । क्व तर्हि सहकार्युपयोग इति तत्र मतान्तरमुपन्यस्य
पूर्ववादिनं दूषयति यस्तु मन्यते सहकारिजनितविशेष इति । यः सहकारि-
णमपेक्षते स स्वात्मनि विशेषोत्पत्तौ शक्तो वा न वेति विकल्प्याऽहेतुत्त्वे दूष-
णमाह विशेषोत्पत्ताविति । नह्यशक्तं सहकारिसहस्रसन्निधानेपि किंचित्कुर्वद्दृ-
ष्टमित्यर्थः । हेतुत्वे दूषणमाह अथ हेतुरिति । तत्र प्रथमविशेषस्य विशेषा-
न्तरापेक्षया ऽनवस्थाप्रसङ्गदोषपरिहाराय किंचिदेव सहकारिभिः कारणे विशेषो
जन्यते कार्य्यजननाय । क्वचित्तु कारणे विशेषजन्मानपेक्षमेव सहकारिभिः
कार्य्यं जन्यत इत्यव्यवस्थां स्वयमेव दर्शयति अथ मतं न सर्वं कार्यमिति ।
तावत्येवाभवदुच्छूनता विशेषे सत्येवेत्यर्थः । तर्हि शक्तिमता कारणेन
स्वात्मन्यनुपकुर्वन्नपि सहकार्यपेक्ष्यत इति त्वयैव स्वपक्षो निरस्त इति
परिहरत्यनुपकुर्वन्नपि तर्हीति । आह साक्षात्क्षणिकवादी नानुपकुर्वन्निति । ,, २३
सर्वस्य सहकारित्वप्रसङ्गादित्यर्थः । क्व तर्ह्युपकरोति तदाह स्वरूपे तु

* विकल्पयति इत्यथेति १ पु० । † चेदित्यादि । अथेति ३ पु० ।
‡ सहकार्यानुभाव इति १ पु० । § यथान्वयेति १ पु० ।

२८ १ नोपकरोतीति । कार्यं हि सहकारिणा जायमानमुपक्रियत इत्यर्थः । तर्हि क्षणिकस्येव नित्यस्यापि कार्यस्योपकाराय सहकार्यपेक्षा न विरुध्यत इति परिहरति नित्योपि तह्यनाधेयातिशय इति । तदेव प्रपञ्चयति * यथैव क्षणिको भाव इति । सामग्रीसाध्यत्वादिति बहुकारकव्यापारसाध्यत्वादित्यर्थः । † पुनश्चोपकार्य्यमेवोपकारकं सहकारिणमपेक्षते नानुपकार्यं कारणमित्याशङ्कते अथ मतं क्षणिकोपि नैवापेक्षत इति । यदन्यसंनिधौ भवति तदपेक्षत इति सम्बन्धः । नित्येपि तर्हि कारणे कार्यमेव सहकारिणमपेक्ष्य क्रमेण भविष्यतीति नेत्याह नित्यस्य तु जनकस्येति । सहकारिणां कारणस्य च सर्वदा भावात्सर्वदाकार्य्यजननादित्यर्थः । ननु सहकारिणामपि संनिधानमपेक्षत इति नेत्याह को हेतुरिति । कारणसहकारिणोरपि सम्बन्धः कार्यं चेत्सोपि कारणसहकारिभ्यां सदा भवतीति कार्यजन्म सदा भवेदित्यर्थः । ननु क्षणिकादपि सहकारि सव्यपेक्षात्किमिति सदा कार्यं न जायते विशेषवति सत्ताक्षणे कार्यजन्माभावात् पूर्वोत्तरकालयोर्विशेषाभावादिति तत्राह ‡ क्षणिकस्तु यो जनक इति ।

,, १० इदमयुक्तं वर्त्तत इति । अयमर्थः । न तावदग्निस्वलक्षणस्यैव धूमस्वलक्षणं प्रति कारणत्वमवगन्तुं शक्यम् । क्षणमात्रापवर्गिणोरन्वयव्यतिरेकबुद्धिद्वयकालावस्थानायोगात् । किंत्वग्निधूमसन्तानयोरन्वयव्यतिरेकाभ्यामग्निस्वलक्षणानि धूमस्वलक्षणानां कारणानीति सामान्योपाधौ प्रमातव्यम् । तत्राग्निस्वलक्षणानां विशेषाभावादङ्गारगतादप्यग्निस्वलक्षणाद् धूमजन्म किं न स्यात् । § काष्ठस्वलक्षणाभावादिति चेत् न । तस्यापि स्वसंताने विद्यमानत्वात् । अग्निकाष्ठस्वलक्षणसंसर्गापेक्षा विद्यत इति चेन्न । संतानद्वयनित्यत्वे तन्निमित्तसंनिधानस्यापि सदा प्रसङ्गात् । तत्राप्यन्यापेक्षेति चेदिहापि ‖ नित्येऽपि सहकारिसंनिधानस्य कदाचिद्भावान्नित्यवत्कार्यजननप्रसङ्गो न युक्तो वर्त्तत इति । ननु सहकारिसन्निधानादेव कार्योदयनियमेपि धूमकाष्ठसन्तानयोर्नोपकार्योपकारकसम्बन्ध इत्याह किमत्रायुक्तमिति । परिहरति सति नियम इति । सहकारिणां कार्येणान्वयव्यतिरेकनियमेपि नोप-

---

* तथैवेति क्वचित् । † पुनश्चोपकार्यं कार्यमेवेति २, ३ पु० ।
‡ क्षणिकास्तु—इति १, २ पु० । § काष्ठलक्षणेति १ पु० । ‖ अपिशब्दो नास्ति २ पु० ।

कार्योपकारकसम्बन्ध इत्युक्तिविरुद्धेत्यर्थः । नन्वन्वयव्यतिरेकनियमस्योप-
कार्य्योपकसम्बन्धव्याप्तिः क्व दृष्टेति दृष्टा कार्यकारणयोरित्याह तथाहि यः २८ ११
कश्चिदिति । उपकार्योपकारकसम्बन्धाभावे जलधूमयोरिवान्वयव्यतिरेकनि-
यमानुपपत्तेरिति भावः ।

ननु ययोरेवाग्निधूमस्वलक्षणयोः कार्यकारणभावो दृष्टस्तयोरेवान्वय-
व्यतिरेकनियमो नाग्निधूमसंतानयोः येनाविशेषात्सर्ववह्निस्वलक्षणेषु धूम-
स्वलक्षणकारणेषु काष्ठसंयोगासंयोगाभ्यां धूमभावाभावदर्शनेन सहकारिका-
रणेष्वन्वयव्यतिरेकनियमो ऽपेक्षालक्षणोपकार्य्योपकारकसम्बन्धश्च स्यात्
तस्मान्न कार्यकारणस्वलक्षणादन्यत्र सामान्योपाधौ कार्यकारणयोग्यताप्राप्ति-
रिति तत्राह एवं हि कार्यकारणभावसिद्धिरि * त्यादिना । सामान्यो-
पाधौ हि व्यवहारो दृश्यत इति भावः । अस्तु सामान्योपाधौ जन्यजनक-
योग्यतानियमस्ततः किमिति तत्राह तत्र न † यदि क्षणिकं कारणमिति ।
तदेव साधयति तथाहि हेतुपरम्पराप्रतिबन्धादिति । कारणस्य स्वयंशक्ति-
त्वादित्यर्थः । नापि कार्य्यं सहकारिणमपेक्षते इति । कारणादेव जनना-
दित्यर्थः । ननु वह्निस्वलक्षणाद्धूमजन्मनि काष्ठसंसर्गस्यापि संनिधानात्तदपि
सहकारि कल्प्यत इति । तन्न । प्रागपि हि कृशानुस्वलक्षणस्य धूमजनन-
योग्यस्य काष्ठसंसर्गाभावात्तदहेतुत्वलक्षणस्य व्यतिरेकस्य दर्शनमन्तरेणान्व-
यमात्रान्न सहकारित्वसिद्धिरित्याह काकतालीयमुच्यत इति । तर्हि मा
भूत्सहकार्यपेक्षेति कारणमपि मा भूदित्याह तथाच कार्यकारणव्यवहारा
इति । तस्मात्क्षणिकनित्ययोः सहकारिसन्निधानक्रमस्याविशेषात्कारणत्वम-
विशिष्टमित्युपसंहरति तस्मात्क्षणिकस्यापीति । अयमर्थः । यथैकस्मादग्नि- ,, १८
स्वलक्षणात्समानदेशे वह्निरुपरिष्टाद्धूमो ऽधस्ताद्भस्म पुरुषे विज्ञानमिति
सहकारिभेदाद्देशभेदेनैकस्मादनेकानि कार्याण्युत्पद्यन्ते । तथैकस्मात्कारणा-
त्कालभेदेन सहकारिभेदात्कार्यभेदा इति ।

तस्मात्सत्यपि ‡ विषयाभेदे ऽहंसंवेदनस्य तथाप्रतिभासमद्वितीया §-
त्संवेदनाद्भेदेनाप्यर्थक्रियासमर्थतया ‖ ऽवस्थायित्वमस्तीति महदेतात्सद्धान्त-

* इत्यादीति ३ पु० । † न यदक्षणिकमिति १ पु० तत्र यदि नेति ३ पु० ।
‡ विषयभेदे-इति १ पु० । § संवेदनादिति नास्ति १ पु० ।
‖ अवशब्दो नास्ति २ पु० ।

८२ २१ वैलक्षण्यमस्तीत्युपसंहरति तदेवमहङ्कर्तुः सदैकरूपावगमादिति । यत्किञ्चित्साम्येन च सिद्धान्तसाङ्कर्ये मन्त्रार्थवादेतिहासपुराणप्रामाण्यानभ्युपगमाद्देवतास्वर्गेश्वरमोक्षानभ्युपगमात्क्षणिकप्रमाणसंबन्धस्य क्षणिकस्यैव सत्त्वाभ्युपगमाल्लोकायतबौद्धांशद्वयपरिणतः प्राभाकरो भेदाभेदाभ्युपगमात्मन्त्राद्यप्रामाण्याच्च लोकायतक्षपणकांशद्वयपरिणतो वार्त्तिककारः । यस्तु कश्चित् क्षपणकपादावनतशिरोबिम्बस्तत्त्वदर्शनतन्निष्ठपरमहंसप्रद्वेषतीव्रवायुविक्षिप्तविवेकविज्ञानलवः स्वपरपक्षगुणदोषविभागदूरीकृतविज्ञानो भेदाभेदाभ्यां बन्धमोक्षादिसङ्करमिव कुर्वन् दुर्ज्जनरमणीयां वाचं जल्पति सुगतविज्ञानवादसमानो ऽयं वेदान्तवाद इति स सम्प्रदायश्रवणपरिचयशून्यतया दर्शनविवेकमनवबुद्ध्यमानो नापवाद्यः किन्तु शोचनीय इत्युपेक्षणीयो विद्वद्भिः ।

ननु विज्ञाने प्रपञ्चस्य कल्पितत्वं तव तस्य च तुल्यम् । सत्यम् । विज्ञाने * प्रतिभास्यमानत्वं च तव तस्य च तुल्यमिति विज्ञानवादस्त्वदीयं दर्शनं किं न स्यात् । सत्यपि प्रतिभास्यत्वे सत्यमिथ्याविभागो ऽस्तीति चेत् । इहापि सत्यपि मिथ्यात्वे अर्थक्रिया † समर्थसत्त्वासत्त्वविभागोस्त्येव । कल्पितत्वेनेयं विभागसिद्धिरिति चेत् । प्रतिभास्यत्वेपि न सत्यमिथ्याविभागसिद्धिः । दृश्यते विभाग इति चेत् । तदेव विभागदर्शनं मम किं न स्यात् । घटादेर्मिथ्यात्वमप्रसिद्धमिति चेत् न । प्रतिभास्यसत्यत्वस्याप्यसिद्धत्वाच्छुक्तिरजतघटयोरर्थक्रियाभावाभावसत्त्वासत्त्वविभागदर्शनाच्च । दृश्यते च माया प्रीतिद्वेषादिकारणम् श्रूयते च देवासुरसंग्रामादिषु मायाविनिर्मितशस्त्रभेदानां दाहच्छेदभेदादिहेतुत्वमित्यलमतिप्रसङ्गेन ।

ननु विषयस्यापि चैतन्यव्यञ्जकतया परोक्षत्वे ऽनुमानादिष्वपि तथा

,, २४ स्यान्न तथा दृश्यत इति चोदयति ननु नानुमेयादिष्विति । अन्तःकरणपरिणामसंसर्गकृतयोग्यत्वापत्त्या विषयस्य चैतन्यं प्रति व्यञ्जकत्वं तदनुमेयादिष्ववर्त्तमानत्वसम्भवात्तेषु वर्त्तमानधर्मद्वयोत्पत्त्ययोगान्नापरोक्षतेति परिहरति नानुमेयादिष्वपरोक्षत्वमिति । ‡ अव्यापृतत्वादिति । कारकत्वव्यञ्जकत्वधर्मद्वयानुपपत्तेरित्यर्थः । नहि विनष्टे घटे ऽग्निसंयोगाल्लौहित्यमुत्पद्यते ।

---

* प्रतिसमानत्वमिति २ पु॰ । † सामर्थ्येति १ पु॰ । ‡ अव्यावृत्तत्वादिति १ पु॰ ।

नन्वतीतानागताकारेण वृष्ट्यादेर्वर्त्तमानत्वमपि दृश्यते । न । वृष्टेर्युगपदतीतत्ववर्त्तमानत्वायोगात् । अतीतताधर्मस्यापि वर्त्तमानकालो घटादेरिव नान्वयितया ऽवच्छेदकः किन्तु प्रतियोगितयेति घटादिवन्न वर्त्तमानतासिद्धिः । किंच । अतीताकारेण वर्त्तमानस्य नेदानींतनक्रियागुणाश्रयत्वमतीताकारतया वर्त्तमानस्य घटस्य वर्त्तमानलौहित्यगमनाश्रयत्वादर्शनात् अतो नानुमेयादिषु कारकत्वव्यञ्जकत्वे युक्ते । प्रत्यक्षे पुनरिन्द्रियसंयोगस्य गुणस्य गुणिव्यापारमन्तरेणाऽव्यापाराद्युक्तो विषयस्य सामग्र्यन्तर्भाव इति । कथं तर्हि विषयव्यापाराभावे ऽनुमेयादिषु विषयाकारता विज्ञानस्येति । तदाह लिङ्गादीनामेवेति । २९ १ नन्वतीते वर्त्तमानविषयत्वजन्मवत्कारकत्वमपि स्यादिति नेत्याह प्रमेयस्य चेति । विषयत्वं नामानुमेयेषु सुषुप्तिव्यावृत्तिः । सा चाभाव * स्तद्धर्म्मो न भवति । विज्ञानाकारतापि न विषयव्यापारः किंतु ज्ञानस्यैवेति नातीतेर्थे क्रियाकारित्वम् । जानातेश्चानुमेयादिषु फलापेक्षया सकर्मकत्वं न कर्मकारकापेक्षयेति । सकर्मकत्वे च प्रत्यक्षवदपरोक्षतापि स्यादिति ॥

अर्थमुपवर्ण्येदानीमस्मत्प्रत्ययविषयत्वादिति भाष्यं योजयति तदेवमहंकारग्रन्थिरिति । ननु शारीरः क्षेत्रज्ञ इत्यादिबहुविधोपाधिसंसृष्टमात्मानं वर्णयति श्रुतिस्तत्र कथमहंकारस्यैवोपाधितेति चोदिते अहंकारतत्संस्कारोपरक्ताज्ञानोपाधिकस्यैवात्मनोऽवस्थात्रयेपि बाह्यबहुविधोपाध्यन्तरनिमित्तोयं व्यपदेश इत्याह स पुनरेवंभूतो जाग्रत्स्वप्नयोरिति । गतागतमाचरन्नित्येनेकोपाध्युपराग उच्यते । सविकल्पके ऽधिष्ठाने सविकल्पाध्यास † इति वदतो ऽस्मत्प्रत्ययविषयत्वादिति परिहार उक्तः इदानीं निर्विकल्पकेपि सविकल्पाध्यासः संभवतीत्याह किंच न केवलमिति । ननु नित्यानुमेय आत्मा कथमपरोक्षतया सिद्ध इति नेत्याह नह्यात्मन्यप्रसिद्ध इति । स्वपरयोर्मयेदं ,, १३ विदितमिति कर्तृकर्मसंबन्धावगमशून्यत्वाविशेषात् । अनुभवनिमित्तज्ञानाश्रयत्वमन्यतरस्य विशेष इति चेत् न । आत्मपदार्थानुभवाभावे संबन्धावगमायोगादनुभवसंबन्धाभावाऽविशेषे ऽन्यतराश्रयज्ञानानुमानायोगादिति भावः । अस्तु तर्हि विषयानुभवाश्रयतया सिद्धिरिति नेत्याह नच संवेद्याज्ञानेनेति ।

* तद्वर्त्तमानं भवतीति १ पु॰ ।   † इतिवादत इति १ पु॰ ।

८६ स्वयंप्रकाशतया ऽपरोक्षत्वमात्मनः। आकाशस्याप्रत्यक्षप्रत्यक्षत्वमतानि।

ननु संवित्स्वोपाधिं साधयति न कर्मकारकमिति। न तावदाश्रयत्वमुपाधिः विषये ऽभावात्। आश्रयविषयत्वमुपाधिरिति चेत्। किं विषयत्वं नाम। संवित्प्रयुक्तव्यवहारयोग्यत्वमिति चेन्न। आत्मापि तर्हि विषयः स्यात्। आश्रयव्यतिरिक्तत्वे सति संविद्व्यावर्त्तकत्वमिति चेच्चक्षुषोपि प्रसङ्गः। न चाश्रयव्यतिरिक्तत्वे सति तत्प्रयुक्तव्यवहारयोग्यो विषयः। संवित्तदाश्रयसंबन्धस्यापि विषयत्वप्रसङ्गात्। नच संबन्धो नास्ति न वक्तुम्। तस्मात्संप्रयोक्तादिवस्त्वेवावभास्यत इत्यस्तु तर्ह्यात्मविषयज्ञानान्तरादिति नेत्याह नच

२९ १४ ज्ञानान्तरेणेति। कुतः तच्च ज्ञानान्तरं विषयानुभवसमकालं वा भिन्नकालं वा। विभिन्नकालत्वे दूषणमाह भिन्नकालत्व इति। एककालत्वमिति चेत्तचाह नह्येककालमिति। निरवयस्य युगपदेकदेशे वा भिन्नदेशे वा परिणामद्वयायोगादित्यर्थः। एकस्य युगपत्सामस्त्येन परिस्पन्दद्वयमनुपपन्नं परिणामस्तु संभवतीत्याह मा भूदिति। परिणामद्वयमपि कार्त्स्न्येन युगपन्न संभवतीत्याह मैवमिति। यौवनस्थाविरयोः कृत्स्नशरीरवर्त्तित्वादिति। * नच भागेन परिणामो निरवयवत्वादिति भाव.। तस्मादिति परिशेषात्स्वयंप्रकाशतया ऽपरोक्षत्वोपसंहारः। अध्यस्यमानेनैकेन्द्रियग्राह्यत्वमधिष्ठानस्य वक्तव्यं नापरोक्षतामात्रेण कृत्यमित्याशङ्क्याकाशदृष्टान्त इति भाष्यतात्पर्य्यमाह ननु न क्वचिदिति।

अत्र शब्दस्य बाह्यैकेन्द्रियग्राह्यत्वाद्गन्धवद् द्रव्यव्यतिरेकेणोपलब्धेः संभवाद्विशेषगुणत्वे वक्तव्ये स्पर्शादिगुणचतुष्टयसहवृत्तित्वाभावाद्बाह्येन्द्रियग्राह्यत्वाद्दिक्कालमनसां विशेषगुणशून्यत्वाद्भूतचतुष्टयात्मदिगादिव्यतिरिक्तद्रव्यस्यैव विशेषगुणः शब्दः तद्गुणश्चाकाश इति वैशेषिकादयो ऽनुमिमते। † बौद्धलौकायताश्चानुपलब्धिलिङ्गकं मूर्त्तद्रव्याभावमात्रमाकाशमनुमिमते। प्राभाकराणां त्वस्त्येवाकाशोनुपलब्धिलिङ्गो मूर्त्तद्रव्याभावमात्रत्वाद्भा ‡ वान्तरस्यैव चाभावत्वात्। क्षपणकवार्त्तिककारीयास्तु चाक्षुषमाकाशमिच्छन्ति। तथा सति स्पर्शित्वमपि स्यात्। अस्त्विति चेन्न। रूपस्पर्शवत्येव द्रव्ये चक्षुरादिप्रवृत्तिनियमात्। चक्षुःप्रसारणस्य चाकाशानुमानलिङ्गदर्शनेन्यथासिद्धत्वात्। तस्मादप्रत्यक्षोपि ह्याकाश इत्युक्तम्। § अथवेति साक्षिवेद्यतया

,, २४

---

* न च भोगेनेति २, ३ पु॰।
† बौद्धलोकायताश्चेति ३ पु॰।
‡ भावान्तरस्य चाभावत्वादिति ३ पु॰।
§ अथ चेति १ पु॰।

मनोमात्रगम्यतया वा अपरोक्ष इत्यर्थः । इन्द्रनीलमिव नीलमित्यर्थः । एवमविरुद्ध इत्यादिः स्पष्टार्थः । प्रतिपन्नोपाधौ निरस्यमानमर्थमविद्यान्वय- ३० २ व्यतिरेकाभ्यामविद्यां मन्यन्त इत्यर्थः ।

न केवलमविद्यान्वयव्यतिरेकसामर्थ्यादविद्योपादानतया ऽविद्यात्वं किंतु विद्याविपरीतत्वाच्चेत्याह तद्विवेकेनेति । नन्वविद्यामुपवर्ण्य तस्याज्ञाननिवर्त्यत्वप्रदर्शनेनाध्यासनिवृत्तिसिद्धेः किमध्यासोपवर्णनेनेति चोदयति यद्येवमध्यास इति प्रक्रम्येति । पुरुषाकाङ्क्षया ऽनर्थनिवृत्तिविषयत्वादनर्थस्यैवाविद्यात्वेन ज्ञाननिवर्त्यत्वं वक्तव्यमिति परिहरति नैतत्सारमिति । अनर्थस्यैवाविद्यात्मकत्वे तदाश्रये विषये वा वस्तुतस्तन्निमित्तगुणदोषाभावात् । ज्ञानेन सर्वानर्थनिवृत्तिः फलिष्यति तत्फलवचनमुत्तरभाष्यमित्याह तदेतदाह यत्र यदध्यास इति । अविद्याध्यासविषयत्वप्रयुक्तस्तावद्गुणदोषाभावः सिद्धः अत्राध्यासपरिणामितयाश्रयत्वप्रयुक्तदोषगुणाभावः कथ्यते । कथम् अनाद्यविद्याध्यासस्य नित्यचैतन्यावभासत्वान्न तत्राध्यासपरिणामः । कादाचित्काध्यासपरिणामस्याविद्योपादानत्वादविद्यासंभेदादात्माश्रयत्वादसिद्धिरिति । प्रतिज्ञेति । सूत्रकारस्य ज्ञानेन बन्धनिवृत्तेरर्थो * त्सूत्रणमुच्यते ।

वृत्तसंकीर्तनपूर्वकमुत्तरभाष्यस्य तात्पर्यमाह एवं तावद्युष्मदस्मदित्यादिनेति । प्रमातृप्रमाणप्रमेयकर्तृकर्मकार्यभोक्तृभोगभोग्यस्वलक्षणस्य व्यवहारत्रयस्य शरीरेन्द्रियादिष्वहंममाध्यासपुरःसरत्वं प्रत्यक्षमिति प्रत्यक्षोपन्यासः कृतः । ननु विधिप्रतिषेधपराणि शास्त्राणीत्येव वक्तव्यम् तन्निष्ठत्वात्सकलशास्त्रस्य किमिदं मोक्षपराणीति तत्राह मोक्षपरत्वं चेति । कथं पुनरित्यादिभाष्यस्याध्यासोपादानं व्यवहारत्रितयमित्यत्र प्रमाणान्तरप्रश्नविषयत्वं दर्शयति बाढमुक्तलक्षणाविद्येति । आदिना कथं पुनरित्याक्षेपार्थं दर्शयति ३१ ३ प्रमातारमाश्रयन्तीति । अविद्याध्यासपरिनिष्पन्नाहंकारात्मसंपिण्डितोपादानत्वे प्रमाणानां प्रामाण्यमेव न सिद्ध्यतीत्यस्मिन्नर्थे भाष्यं योजयति अथवा कथमविद्यावद्विषयाणीति । अविद्यावदुपादानत्वे का प्रामाण्यानुपपत्तिरिति तदाह † अविद्यावद्विषयत्व इति । उच्यते देहेन्द्रियादिष्वित्यादिपरिहारभाष्यम- ,, ६

---

* सूत्रमुच्यते इति १ पु० ।

† मतुन्नास्ति २ पु० ।

३१ ९ वतारयति वस्तुसंग्रहवाक्यमस्यैव प्रपञ्च इति । व्यवहारचितयमध्यासोपादान-
मित्यत्रार्थापत्तिव्यतिरेक्यनुमानप्रदर्शनाय *यत्र यत्राध्यासाभावः संपतिपन्नस्तत्र
व्यवहाराभावो दृष्ट इति व्यतिरेकव्याप्तिं भाष्यार्थे दर्शयति नहि देहेन्द्रिया-
दिष्विति । देहादिशब्दार्थे विभागेनाध्यासं च कथयति यतो देहे ऽहमभि-
मान इत्यादिना । प्रमाणान्तरप्रदर्शनाय व्यवहारत्रयमूलाध्यासे प्रत्यक्षमुक्तमनु-
वदति सर्वो हि मनुष्योऽहमिति । अत्रायं प्रयोगः देवदत्तस्य जाग्रत्स्वप्नकालौ
तस्यैव कर्तुः करणभूतदेहेन्द्रियादिष्वहंममाध्यासपुरःसरप्रमातृत्वादिव्यवहा-
रवन्तौ तस्यैव सुषुप्तिकालादन्यकालत्वात् । यः कालस्तथाविधव्यवहारवान्न
भवति न स तस्यैव सुषुप्तिकालादन्यकालो यथा तस्यैव सुषुप्तिकाल इति ।
व्यवहारचितयं वा दर्शिताध्यासोपादानमन्तरेणानुपपन्नमध्यासाभावे व्यवहा-
रादर्शनात्सुषुप्त इत्यर्थापत्तिः ।

ननु कर्तृकरणयोः संबन्धमात्रं व्यवहारे ऽपेक्ष्यते न तादात्म्यसं-
बन्ध इति तत्र परिशेषानुमानार्थापत्तिसिद्धये संबन्धान्तराणि व्यावर्त्तयति
न तावत्स्वस्वामिसंबन्ध इति । आह न स्वत्वेन संबन्धेनेति । सुषुप्तेपि
तस्य भावादित्यभ्युच्चयः । इच्छानुविधायित्वमेव व्यवहारनिमित्तं तदभा-
वात्सुषुप्ते व्यवहारविपर्यय इति चोदयति अपर आहात्मेच्छानुविधायित्व-
मिति । अस्त्विच्छामात्रेण विनियोज्यविनियोजकसंबन्धस्ततः किमिति तत्राह
तत आत्मन इति । नन्वेतत्संबन्धमूलो व्यवहार इति किमत्र प्रमाणमित्यत
आह तथाचोत्तिष्ठामीति । ननु भृत्यादयोपि तदिच्छानुविधायिनस्तच्छरीरे-
णापि व्यवहारः स्यादिति नेत्याह न च भृत्यादिषु तदस्तीति । उच्यते ।
यदीच्छानुविधानयोग्यतामात्रं संबन्धः सुषुप्तेपि तदस्तीति तत्रापि व्यवहारः
स्यात् । अथेच्छयानुविधीयमानत्वं संबन्धः अर्थान्तरे तदभावात्प्रमातृत्वादि-
व्यवहारो न स्यात् अथ दृश्यते अयं संबन्धो व्यवहारमूलमिति नेत्याह
नैतत्संविदि बहुमानवतो युक्तमिति । नच गौणत्वं मुख्यानुभवविरोधादित्याह
गौणीत्यादिना । इच्छाप्यध्यासमूलैवेत्याह अपि चेच्छापि परिणामविशेष इति
अन्तःकरणाध्यासमूलैवेच्छेति प्रत्यक्षमाह तथा चानुभव इति । नचात्मा-
३२ १ नात्मनोः संयोगसमवायौ व्यवहारनिमित्तम् सुषुप्तेपि भावात् । भोक्तृभोग्यान्वय-

* यत्रपदं सकृदेव १, ३ पु॰ ।

स्वकर्म्मारभ्यत्वस्वेन्द्रियाधिष्ठेयत्वादीनां भोगाद्यध्याससापेक्षत्वाद्भृत्यादिशरीरे च भावात् । अव्यवधानेन भोग्यत्वं मूलसंबन्ध इति चेत् । यदि भोगयोग्यता संबन्धः । सुषुप्तेप्यस्ति । यद्यव्यवधानेन भुज्यमानसंबन्धः । तन्नात्मनः सर्वशरीरदेशकालाव्यवधाने सत्यचैव भोगान्वयस्य मूलसंबन्धान्वेषणा । तस्माद्यत्किंचिदेतत्संबन्धान्तरम् । अतः परिशेषादर्थापत्त्यनुमानाभ्यामध्यास एव व्यवहारमूलं सिद्ध इत्युपसंहरति अतः स्वयमसङ्गस्यापीति । ३२

ननु सर्वशरीरसंनिधानाविशेषे सति आत्मनः कथमस्मिन्नेव शरीरेऽध्यासनियम इति । अनादिस्तावदविद्याध्यासस्तत्परिणामत्वाल्लिङ्गशरीरे तत्कार्य्यभूतसूक्ष्मशरीरारब्धत्वात्तत्संश्लेषाद्वा स्थूलशरीरेध्यासनियमो न विरुध्यते । ननु प्रमातैव व्यवहाराश्रयो नाध्यास इति न प्रमातृत्वमेवाध्यासपरिनिष्पन्नमित्याह तेन यद्यपीति । यत्त्वध्यासपरिनिष्पन्नाहंकारात्मसंपिण्डितोपादानत्वे कारणदोषादप्रामाण्यं प्रमाणानामिति । तच यदि प्रतिपन्नोपाधौ केनापि प्रमाणेनाबाध्यत्वलक्षणतत्त्वावेदनप्रामाण्यं हानिरुच्यते तदङ्गीकृतमेव । अथा * गमेन परमार्थसत्यत्वांशे बाध्यमानेपि व्यवहारसमर्थवस्त्वङ्गता प्रामाण्यहानिरुच्यते न तच बाधाभावादित्याह तथा निरपेक्षाणामिति । विधिमुखोपदर्शितमिति । व्यवहाराङ्गतायां प्रत्यक्षेणाध्यासमूलतायां प्रत्यक्षानुमानार्थापत्तिभिः प्रदर्शितमुभयमित्यर्थः । अर्थक्रियासमर्थत्वाच्च शब्दादिप्रत्यक्षाणामविद्यानिवृत्तिब्रह्मावगतिलक्षणार्थक्रियाहेतुत्वं मिथ्यात्वेपि शब्दादीनां न विरुध्यते ।

नन्वर्थक्रियासंवादात्प्रामाण्यप्रसङ्गः । न । ज्ञानादेवार्थतथात्ववदर्थावगमादेवार्थक्रियासामर्थ्यनिश्चयात् अन्यथा तवापि तथात्वज्ञानात्प्रामाण्यप्रसङ्गः । ननु ब्रह्मज्ञानस्याप्यध्यासोपादानत्वान्मिथ्यात्वमापन्नम् । यदि तावत्स्वरूपमिथ्यात्वमुच्यते अङ्गीकृतमेव तत् । अर्थविषयमिथ्यात्वन्न ब्रह्मणि भावात् । प्रपञ्चस्यापि बाधादेव मिथ्यात्वं नाध्यासोपादानज्ञानगम्यत्वात् । ननु दुष्टकारणजन्यस्य विषयतोपि मिथ्यात्वं दृष्टमिति नेत्याह दोषस्त्वागन्तुक इति । प्रमाणकारणेषु सत्सु पश्चाद्भवन् दोषो दोष इत्युच्यते ,,

* अथानुगमेनेति ३ पु० ।

स आगन्तुक इत्युक्तः । प्रमाणकारणत्वेनैव यो दोषो व्यवतिष्ठते स न दोषः कारणत्वादविद्याध्यासस्तु चैतन्यस्याद्वितीयावभासं प्रत्येव दोषो न द्वैतावभासं प्रति तस्य कारणत्वाद्यथा काचादिः * चक्षुरादिदोषस्तथाविधपापादृष्टोदयमनुमापयंस्तत्र प्रमाणत्वान्न दोषस्तद्वदित्यर्थः । चैतन्यदोषत्वादेव तत्प्रकाश्याव्यवहार्य्यब्रह्मविपरीतं व्यवहारयोग्यं वस्तु प्रदर्शयति । दोषत्वं चाविद्यायाश्चैतन्यस्य तथावभासविरोधितयान्यथाप्रतिभासनिमित्तत्वात् । कथमागन्तुके दोषबुद्धिर्न नैसर्गिक इत्येतावन्मात्रे
३२ ८ दृष्टान्तमाह नच सर्वसाधारण इति । ननु भाष्यकारेण दोषमात्रमेव विषयतोऽपि ज्ञानमिथ्यात्वे हेतुरुक्त इति नेत्याह अनैसर्गिकं च दोषमिति ।

नन्वविवेकिव्यवहारोऽध्यासमूलो भविष्यति न विवेकिव्यवहार इति नेत्याह इतश्चैतदेवं पश्वादिभिश्चेति । † पश्वादिदृष्टान्तेऽध्यासमूलतां व्यवहारस्य दर्शयति तथा च पश्वादय इति । अध्यासानुमाने हेतुभूतव्यवहारस्य विवेकिष्वपि पक्षधर्मतामाह तदेकरूपयोगक्षेमा इति । तत्र हेतुदर्शनात् हेतुमन्तमध्यासमनुमिमीते अतस्तदेकरूपकार्यदर्शनादिति । पश्वादिदृष्टान्तेप्यध्यासमद्भावे प्रमाणं चोदयति ननु पश्वादीनामिति । पदार्थद्वयदर्शने सति प्रत्यक्षानुमानागमैर्भेदाप्रतिपत्तावध्यासः परिशिष्यत इत्याह प्रौढमतिभ्य इति । स्वाभाविकप्रत्यक्षेण विवेकदर्शने दोषमाह एवमेवेति । नन्वनुमानागमविचारहीनानामप्यदृष्टार्थे व्यवहारदर्शनात्प्रत्यक्षेणैव विवेको गृह्यते इति चोदयति ननु गोपालाङ्गनादय इति । न प्रत्यक्षेण विवेकग्रहः किन्त्वाप्तवचनादित्याह न तदभिज्ञव्यवहार इति । प्रत्यक्षश्चेद्विवेको विशेषतः प्रत्यगात्मानं प्रतिपद्येर
३३ १ न्नित्याह तथा च ते पृष्टा इति । अतो निगमनवाक्यमुपपन्नमित्याह तस्माद्युक्तमुक्तमिति । तस्य व्यवहारस्य काल एव कालो यस्याध्यासस्य सोध्यासस्तत्कालः स च पश्वादिभिर्विवेकिनामपि समान इति ।

३ एवं तावत्प्रत्यक्षादीनीत्युक्तानुवादः । न तेनानध्यस्तात्मभावेनेति भाष्यं पूर्वं न व्याख्यातं तदनुवादग्रन्थे व्याचष्टे तत्रेयमाशङ्का । भवत्वध्यासस्य व्यवहारनिमित्तता तथापि रजतादिवन्निमित्तकारणमेवाध्यासो व्यवहारस्य आत्मैव

---

* चक्षुरादिदोषोऽपि संस्थाविधापापेति २ पु० । † पश्वादिदृष्टान्ताध्यास इति १ पु० ।

केवलस्तूपादानमिति तत्राह न तेनानध्यस्तात्मभावेनासङ्गस्येति। अयमर्थः। ३३ ५
रजताद्यध्यासानां व्यवहाराश्रयकोटिनिक्षिप्तत्वाभावात्तदन्तरेण चात्मनि प्रमातृत्वादिव्यवहारदर्शनान्निमित्तकारणतैव युक्ता। इह तु पुनराश्रयकोटिनिक्षिप्तत्वात्केवलात्मनि सुषुप्ते व्यवहारादर्शनादुपादानकारणस्याभ्यर्हितत्वादन्वयव्यतिरेकवतोऽध्यासस्योपादानकारणत्वमेव व्यवहारं प्रति कल्पयितुं युक्तमिति। शास्त्रं पुनरित्युत्तरभाष्यस्याशङ्का तस्यापीति। तात्पर्याभिधानम् शास्त्रीयेत्विति। अदृष्टार्थप्रवृत्तौ व्यतिरेकज्ञानमभ्यनुजानाति अभ्यनुज्ञामाक्षिपति ननु फलनैयमिकेति। फलचोदना तावत् पश्वादीनामस्मिन्नेव जन्मनि लब्धुं शक्यत्वात्तज्जन्यसुखस्य च स्वर्गस्य पश्वादिचोदनाफलत्वाभावात् ज्योतिष्टोमादिफलत्वोपपत्तेर्निरतिशयप्रीतेरप्यत्रैव सम्भवान्न देहान्तरसम्बन्धिनमात्मानमापादयति। नैयमिकनैमित्तिकचोदना तु सुतराम् फलशून्यत्वात् फलवत्त्वे वा दृष्टेनैवोपभोक्तुं शक्यत्वात्। प्रायश्चित्तस्य तु दोषनिबर्हणफलत्वात्। दोषफलस्यास्मिञ्जन्मनि भोक्तुं शक्यत्वात्। जन्मान्तरस्य * चैतादृशत्वात् फलादर्शने च कारीर्यादिवदङ्गवैकल्य † प्रतिबद्धतया सहकार्य्यभावकल्पनोपपत्तेर्मन्त्रौषधादिसिद्धेनानेनापि शरीरेण स्वर्गादिभोगसम्भवान्न देहव्यतिरेकज्ञानोपयोग इति। तत्र देवताधिकरणन्यायेन मन्त्रादिप्रामाण्याद्विशिष्टदेशकालशरारादिभोग्यं स्वर्गादिफलमङ्गीकृत्येदमुक्तमिति परिहरति सत्यमेवं तथापीति।

ननु मन्त्रादिसमन्वयप्रामाण्यमनपेक्ष्यैव चोदनाभिरेव व्यतिरिक्तात्मापेक्ष्यते कर्ममात्रनिर्णयप्रवृत्तेन भाष्यकारेणात्मनो निरूपितत्त्वादिति तत्राह तथाच विधिश्रुतेति। विधिभिरेवापेक्षितश्चेत्सूत्रेणापि भवितव्यमित्यर्थः। नन्वनपेक्षितस्याऽसूचितस्य च भाष्यकारेण प्रतिपादनमयुक्तमित्याक्षिपति तत्कस्य हेतोरिति। तत्प्रमाणं बादरायणस्या ‡ नपेक्षत्वादितिसूत्रावयवेन मन्त्रादिप्रामाण्यद्वारेण परम्परया सूचित एवात्मेति परिहरति धर्मजिज्ञासेति कार्यार्थविचारं प्रतिज्ञायेति। एवं सूत्रार्थपरम्परया भूतेप्यर्थे प्रामाण्यमाश्रित्य भाष्यकारेणात्मविचारः कृतः न चोदनासामर्थ्यमाश्रित्येति कथमवगम्यत इति तत्राह तथा चोदना हि भूतमिति। तर्हि चोदनापेक्षितत्वात्समन्वयोप्यत्रैव ,, १८

* चस्थाने वाकारः २ पु। † प्रतिबन्धतयेति १ पु॰, प्रतिबद्धतपःसहेति ३ पु॰।
‡ अनपेक्षित्वादिति १ पु॰।

३३ २० वर्णनीय इति नेत्याह स च स्वरूपावगम इति । ननु धर्मे प्रयतमानेनाप्य-
पेक्षितत्वात्कर्तव्य एवात्मविचार इति नेत्याह उपयोगाभावादिति । नहि
धर्ममात्रं व्यतिरिक्तात्मानमपेक्षते किन्तु फलमपेक्षते फले च न प्रयतते
जैमिनिरित्यर्थः । ननु फलमप्यपेक्षते चेत्तत्रापि प्रयत्नो युक्त इति न अन्यथा-
सिद्धत्वादित्याह भगवांस्तु पुनरिति । ननु ब्रह्मैव तत्र विचारितं न चोद-
नाफलमिति तत्राह तत्र च देहान्तरोपभोग्य इति । तच्च सर्वमिति स्पष्टार्थः ।

ननु समन्वयसामर्थ्यादेव व्यतिरिक्तात्मसिद्धेरात्मविचारः पिष्टपे-
षणमिति नेत्याह तत्सिद्धिश्चेति । ननु प्रमाणान्तरयोग्यस्य तदभावविरो-
३४ १ धयोः शब्दस्याप्रामाण्यान्नात्मसिद्धिरिति तत्राह अतस्तत्सिद्धौ पराक्रान्तवां-
स्तेनेति । विरोधपरिहारफलेन विचारेणेत्यर्थः । सत्यम् विनापि तेन
सिध्येदित्यादिनोक्तमर्थं संक्षेपतो दर्शयत्यस्ति तु तदिति । भूतेर्थे प्रामाण्यम्
स्वर्गादावित्यर्थः । न तेन विनेति । व्यतिरिक्तात्मना विनेत्यर्थः । ननु
सूत्रकारभाष्यकाराभ्यां देवताधिकरणे मुखत एव देवतादिषु मन्त्रादिप्रामाण्यं
नास्तीत्युक्तं तत्कथं सूत्रावयवसामार्थ्यात्प्रामाण्यमनुमतमिति मन्यते । नैष
दोषः । तत्र देवताया विग्रहवत्त्वे सन्निपत्योपकारकत्वप्रसङ्गाद्योग्यानुपलब्धि-
विरोधात् कर्मणि विरोधप्रसङ्गाभिप्रायेणोक्तत्वात् न प्रामाण्याभिप्रायेण अर्थवा-
दलिङ्गानामपि तत्र तत्र द्वादशलक्षण्यां प्रमाणत्वेनोदाह्रियमाणत्वादिति ।
तथापि न वेदान्तवेद्यमित्यादिभाष्यव्याख्यानं * स्पष्टार्थम् । तत्राशनायाद्यती-
तमित्यादिना † कर्त्रन्वयाधिकारान्वयभोक्त्रन्वयाः क्रमेण निरस्यन्ते । प्राक् चे-
त्यादिभाष्यव्याख्यानं तत्त्वमसीतिवाक्यार्थावगमादित्यादि ।

कथं पुनर्व्यतिरेकज्ञानेनाध्यासस्य सहवृत्तिः । परोक्षापरोक्षविभागाच्च-
न्द्रद्वित्वज्ञानवदऽविरोध इति केचित् । सूक्ष्मशरीरस्यात्माऽविद्याकार्य्यत्वा-
त्कार्यकारणयोर्भेदाभेदभावात् स्थूलशरीरस्याग्न्ययःपिण्डवत्सूक्ष्मशरीरेण संश्ले-
षाद्भेदज्ञानेप्यध्यास इत्यपरे । सर्वथापि यावदपरोक्षज्ञानमध्यासो न निवर्तेत
,, १३ इति भावः । तस्मादित्यध्यासप्रमाणोपसंहारः । नच केवलं प्रत्यक्षानुमाना-
र्थापत्तिभिरेवाध्याससिद्धिः किन्त्वागमोपि विधेर्बोद्धारमधिकारिणं ब्राह्मणादि-

---

* स्पष्टार्थः—इति १ पु० ।   † कार्यान्वयेत्यस्य स्थाने कर्त्रन्वयेति ३ पु० कल्पितम् ।

शब्दैरनुवदंश्चेतनाचेतनयोरैक्यावभासं दर्शयतीत्याह तदेव दर्शयति तथा- ३४ १४
हीति । यो ज्योगामयावी उज्ज्वलामयवानित्यर्थः । वृत्तसङ्कीर्तनपूर्वकमध्यासो
नामेति लक्षणभाष्यमवतारयति एवमध्याससद्भावम्प्रसाध्येत्यादिना । किमिति
पुनरेवोक्तलक्षणानुवाद इति * तदाह कस्य युष्मदर्थस्येति । भाष्यं योजयति
कस्मिन्नऽयुष्मदर्थ इत्यादिना । आत्मानात्मनोरितरेतराध्यासं पुरस्कृत्येत्या-
दिना प्रत्यक्षतो दर्शितस्याध्यासस्य विभज्यप्रदर्शनायोत्तरं भाष्यमित्याह तदाह
तद्यथा पुत्रभार्यादिष्वित्यादि । तथाऽन्तःकरणधर्म्मानित्यतः प्राक्तनो ग्रन्थः
स्पष्टार्थः । अत्रोत्तरोत्तराध्यासविशिष्टे पूर्वपूर्वाध्यास इति कथयितुमात्मन्यध्य-
स्यतीत्यात्मशब्दार्थमाह अस्मदर्थश्चाहंप्रत्ययिसम्भिन्न इति । ननु शरीरमप्य ३५ १०
ध्यस्यते न धर्म्मा एवेत्यत आह धर्म्मिणोपीति । ग्रहणमित्यध्याहारः । धर्म्म-
शब्दस्तर्हि किमिति गृहीत इत्यत आह धर्मशब्दस्त्विति । शास्त्रीयव्यवहार-
मूलत्वेन प्राधान्याच्च धर्म्माध्यासस्य प्राधान्येन ग्रहणमित्याह तन्निमित्तश्चेति ।

नन्वन्तःकरणधर्म्माः कामादयो दण्डादिवत्सम्बन्धितया ऽवगमान्ना-
ध्यासमर्हन्तीति नेत्याह तथान्तःकरणधर्मा † न्कामादीनिति । तथाहि ।
सत्यन्तःकरणे भावादसति च सुषुप्ते तेषामभावादन्तःकरणधर्म्माः कामादयः
सम्बन्धितया ऽध्यस्यन्ते न तादात्म्येनेति भावः । नन्वात्मसमवायिनामेव
कामादीनामन्तःकरणस्य वा ऽन्वयव्यतिरेकौ करणविषयतया ऽन्यथासिद्धौ ।
न । कार्यस्य कारणपरतन्त्रतानियमात्करणनियमाभावात् करणकल्पनादुपा-
दानकल्पनस्या ‡ भ्यर्हितत्त्वाच्चक्षुरादिकरणान्तरभावाच्च । नन्वहं कामीत्यादि-
प्रत्यक्षप्रत्ययादात्माप्युपादानान्तरमस्तीति चेत् । न । दण्डादिवत्सम्बन्धि-
प्रत्ययादुपादानत्वे तादात्म्यादहं काम इति स्यात् । तस्मान्न्यायसहकृतान्व-
यव्यतिरेकावन्तःकरणस्यैव कामाद्युपादानत्वं कल्पयत इति भावः । अन्तः-
करणमित्यहंप्रत्ययिन इत्यादिः स्पष्टार्थः ।

§ अशेषस्वप्रचारसाक्षिणि प्रत्यगात्मनीतिपदद्वयं व्याचष्टे स्वशब्देनाह-
ङ्कारग्रन्थिरित्यादिना । साक्षिशब्दार्थमाह । असङ्गतया ऽविकारित्वेनेत्यादिना । ,, २१
कथं पुनः सर्वान्तरस्यात्मनः प्रत्यगञ्चनमिति देहादिषु ‖ विप्रसृतचैतन्यस्य

---

* तत्राहेति ३ पु॰ ।
† कामादीनितीति—इति ३ पु॰ ।
‡ अभिहितत्वादिति १ पु॰, २ पु॰ च तत्स्थानेऽभ्यर्हितत्वादिति शोधितम् ।
§ अशेषत्वप्रचारेति ३ पु॰ ।
‖ विप्रसृतचैतन्यस्येति ३ पु॰ ।

३५ २२ चित्तसमाधानविषये ऽन्तरनुप्रवेशभ्रमापेक्षयेत्याह स एव देहादिष्विदन्तयेति। ननु न साक्षिवेद्यमन्तःकरणं किन्त्वात्मेन्द्रियविषयेषु समवहितेषु ज्ञानोत्पादक्रमसामर्थ्यगम्यमिति। न। अर्थासिद्धत्वात् आत्मन एव क्रमज्ञानजननसामर्थ्यकल्पनया * न्यथासिद्धः क्रमज्ञानोत्पादः द्रव्यान्तरक्रमसामर्थ्यकल्पनागौरवाच्च वरं प्रसिद्धस्यैवात्मनः क्रमसामर्थ्यकल्पनालाघवम्। ननु नार्थपत्त्या मनः कल्पयामि येनान्यथासिद्धिः स्यात् किन्त्वनुमानेन। तथाहि। आत्मनः सर्वविषयसन्निधाने क्रमकार्योत्पादः कर्त्तुः क्रमकारिसाधारणकारणापेक्षः सन्निहितबहुविषयस्य कर्त्तुः कर्मकार्य्योत्पादत्वात्सन्निहितबहुच्छेद्यस्य देवदत्तस्य कुठारसापेक्ष † क्रमच्छेदनवदिति। नैतत्सारम्। मनसः प्रतीन्द्रियसंयोगव्यापारे क्रमवर्त्तिनि साधारण ‡ कारणान्तरशून्ये ऽनैकान्तिकत्वात्फलस्य § च वृक्षात्पततः क्रमवर्त्तिन्यःऽऽकाशसंयोगे कुठारादिव्यापारे नैकान्तिकत्वादिन्द्रियाणां प्रतिविषयसंयोगव्यापारे ‖ चानैकान्तिकत्वाच्च। अथ मतम्। विज्ञानादिविशेषगुणजन्म स्वाश्रये द्रव्यान्तरसंयोगलक्षणाऽसमवायिकारणापेक्षम्। नित्यद्रव्यविशेषगुण¶ जन्यत्वात् अग्निसंयोगजन्यपरमाणुगतपाकजलौहित्यवदित्यनुमानम्। यत्तद् द्रव्यान्तरं तन्मन इति। नैतत्। शरीरेन्द्रियसंयोगस्य सिद्धत्वाद् द्रव्यान्तरसंयोगेनुमानायोगात्स्वप्नस्मृत्यादिज्ञानेष्वपि शरीरादिसंयोगानपायाद् द्रव्यान्तरसंयोगकल्पनानुपपत्तेः। तस्मान्नानुमानार्थापत्ती मनसि प्रमाणम्। आगमाच्च प्रागेव मनः सिद्धम्। नचेन्द्रियकत्वमणुपरिमाणे परमाणुवदयोग्यत्वादनन्तपरिमाणे मनसि युगपत्संयोगाद्युगपज्ज्ञान * जन्मप्रसङ्गात् मध्यमपरिमाणे च मनसि स्वप्नावस्थायामिन्द्रियाभावेपि मनोदर्शनान्मम मनोऽन्यत्र गतमित्यनुभवाच्च साक्षिवेद्यमेव मन इति।

तं च प्रत्यगात्मानमित्यात्मनोन्तःकरणादिष्वध्यासो दर्शितः तदयुक्तम् इतरेतराध्यासे द्वयोरध्यस्यमानत्वान्मिथ्यात्वापातात् द्वयोरप्यधिष्ठानत्वे

, २४ द्वयोर्विशेषावभासो न स्यादिति तत्राह यदि युष्मदर्थस्यैवेति। अयमर्थः। एकतराध्यासे अन्यतरस्य सामान्यावभासो ऽन्यतरस्यैव विशेषावभासश्च स्यात्।

---

* अन्यथासिद्धक्रमज्ञानेति ३ पु॰। † क्रमभेदनवदिति १ पु॰। ‡ करणेति ३ पु॰।
§ चस्थाने वाकारः १ पु॰। ‖ अनैकान्तिकत्वाच्चेति ३ पु॰ नास्ति।
¶ गुणजन्मत्वादिति १ पु॰। * जन्मेति नास्ति ३ पु॰।

अत्र चिज्जडरूपेण द्वयोर्विशेषावभासो द्वयोरितरेतराध्यासं गमयति। अध्यासे विशेषावभासस्याध्यस्यमानताप्रयुक्तत्वात् । नच द्वयोरपि मिथ्यात्वापातः । चेतनस्याचेतने स्वरूपाध्यासाभावात् संसृष्टतयैवाध्यासात् । नच विशेषावभासादधिष्ठानत्वविरोधो ऽधिष्ठानधर्मतया विशेषस्याप्रतीतेः अधिष्ठानान्तरधर्मतया प्रतीतेरिति । ग्रन्थस्तु स्पष्टार्थः । ननु द्वयोः सामान्यविशेषात्मनावभासमानयोर्नाध्यासः सम्भवति । सामानाधिकरण्यमस्ति चेत् गौणमिति नेत्याह नात्र विवदितव्यमिति । ननु विशेषावभासे ऽध्यासविरोध उक्तो नेत्याह नहि दृष्टे ऽनुपपन्नमिति । तद्विपर्ययेणान्तःकरणादिष्वित्यादिशब्दो विरुद्ध इत्याह नन्वन्तःकरण एव प्रत्यगात्मन इति । अन्तःकरणविशिष्टस्यैव बहिरध्यास इति कुत इति तत्राह अत एव तद्विपर्ययेणेति । ननु तस्मिन् भाष्ये विशिष्टस्यैवाध्यासः कथमुक्त इति धर्मग्रहणसामर्थ्यादित्याह अन्यथा चैतन्यमात्रैकरसस्येति । यद्यपि चैतन्यस्य विषये ऽध्यासेन्तःकरणमुपाधिस्तथापि चैतन्यमेव विषयावच्छिन्नं प्रकाशः तेनान्तःकरणमिति प्रतिभासाभिप्रायेणोक्तमित्याह सत्यमाह भवानिति । तस्यैव विषयस्यात्मानं प्रति कार्य्यकरत्वमापादेत्यर्थः । ननु बहिरप्यहङ्कारस्य चैतन्यवत्सम्बन्धो ऽवभासते ऽहं मनुष्य इत्यादावित्यत आह अत एव बुद्ध्यादिष्विति । चिन्मात्रावगमादेव सर्वपदार्थेष्वात्मत्वविभ्रम इत्यर्थः । अन्यथाहङ्कारस्य चैतन्याव्यतिरेकात्स एवात्मेति प्रतिपत्तिः स्यादिति । ननूपन्यासकाले नैसर्गिको ऽयं लोकव्यवहार इत्यारभ्य कर्तृत्वभोक्तृत्वप्रवर्त्तन इत्यतः प्राक्तनो ग्रन्थः स्पष्टार्थः । अत्र सांख्यव्यतिरिक्ताः सर्वे वादिनः स्वत एव कर्तृत्वभोक्तृत्वशक्तिमतः प्रवृत्तिमात्रनिमित्तमध्यास इति वदन्ति तान्निराकरोति तेन कर्त्तुभोक्तुश्चेति । सर्वलोकप्रत्यक्ष इत्यादिः स्पष्टार्थः । अस्यानर्थहेतोरिति भाष्यस्य वृत्तसङ्कीर्तनपूर्वकं तात्पर्य्यमाह एवं तावत्सूत्रेणार्थादुपात्तयोरिति । ३६ ३ ३७ ५

नन्वनर्थस्य प्रहाणायेति वक्तव्यं न हेतोः प्रहाणायेत्यत आह हेतोः प्रहाणा हीति । प्रयोजनभाष्यमाक्षिपति नन्वनर्थहेतुरध्यासो ऽनादिरिति । ननु शास्त्रप्रामाण्यान्निवर्ततामिति न प्रत्यक्षविविरोधादित्याह तथाहि मनुष्यत्वादीति । नहि सादित्वमनादित्वं वा विनाशाविनाशयोर्निमित्तं किन्तु विरो- ,, ८

३१ १० धिसन्निपातासन्निपाताविति परिहरति नायं दोष इति । लोके ताव * दनादिः प्रागभावो निवर्तते । सुगतानां तत्त्वपरिभावनाप्रकर्षेणानादिवासनासन्तानानां निवृत्तिरिष्टा नैयायिकादीनामप्यनादिर्मिथ्याज्ञानप्रवाहः परमाणुश्यामता च निवर्त्तते । सांख्यानामप्यविवेको निवर्त्तते विवेकेन । मीमांसकादीनामिदानींतनधर्मतत्त्वज्ञानप्रागभावोऽनादिर्न्निवर्त्तते । अनादिभावरूपमात्मवन्न निवर्त्तेत इति चेत् न अनिर्वचनीयत्वादज्ञानस्य अनादिर्न्न निवर्त्तेत इति सामान्यव्याप्तिः ज्ञानेनाज्ञाननिवृत्तिरिति विशेषव्याप्तिरतः सैव बलवती । ननु स्वोपादानगतोत्तरावस्था विनाशस्तच्च कथमनादेर्न्निरुपादानस्य विनाशः । न स्वाश्रयगतोत्तरावस्थेत्येतावत्वादन्यथाणुश्यामत्वादीनामनिवृत्तिप्रसङ्गात् । अभाववैलक्षण्यादात्मवदज्ञानस्याऽनिवृत्तिरिति चेन्न सद्वैलक्षण्यात्प्रागभाववन्निवृत्तिः किं न स्यात् । कस्तर्हि निर्णयः । ज्ञानाज्ञानकृतो विशेषान्वय इत्युक्तम् । यत्तु व्यतिरेकज्ञाने ऽप्यध्यासो न निवर्त्तेत इति तत्राह तत्त्वमसिवाक्यादिति । ननु व्यतिरेकब्रह्मात्मज्ञानयोरध्यासनिवृत्तौ को विशेष इति तत्राह तद्धि ब्रह्मणोऽवच्छिद्येति । नच व्यतिरेकानवबोधनिमित्तः संसारः किन्तु ब्रह्मानबोधनिमित्त इति श्रुतितदर्थापत्तिभ्यां दर्शितम् अतस्तत्त्वज्ञानान्निवर्त्तेत इति भावः । ननु ज्ञानमज्ञानस्यैव निवर्त्तकं कथमध्यासस्य निवृत्तिरिति तत्राह ततः कारणनिवृत्ताविति । नन्वहंप्रत्ययो ऽप्यर्थतस्तथाभूतब्रह्मविषय एव स किमित्यज्ञानं न निवर्त्तयतीति ब्रह्मात्मतानवभासकत्वादित्याह अहंप्रत्ययः पुनरिति । ननु विचाराद्विवेकज्ञानान्तरमुत्पन्नं निवर्त्तयेदिति न प्रमाणज्ञानत्वादित्याह नापि ज्ञानान्तरमिति । ननु नानर्थनिवृत्तिः शास्त्रस्य प्रयोजनं किंतु निरतिशयब्रह्मानन्दावाप्तिरिति पुनः प्रयोजनभाष्यमाक्षिपति ननु† निरतिशयानन्दं ब्रह्म श्रूयत इति । यथा शास्त्रजन्यब्रह्मविद्याफलमानन्दावाप्तिस्तथा ऽनर्थनिवृत्तिरपि श्रुता तच्च कथं प्रयोजनापेक्ष इत्याह ननु चानर्थस्यापीति । तर्हि कृत्स्नस्य

,, २१ फलस्य संकीर्तनं कर्त्तव्यं न फलांशस्येति चोदयति उभयं तर्हीति । न प्रयोजनत्वेन वक्तव्यानन्दावाप्तिर्विषयत्वनिर्देशसामर्थ्यादेव पुरुषाकाङ्क्षया प्रयोजनत्वसिद्धेः श्रुत्यर्थाभ्यां प्रयोजनसम्पूर्णतासिद्धिर्विषयनिर्देशलाभश्चेति युक्तो ऽयं

---

* अनादिप्रागभाव इति समासः ३ पु० । † निरतिशयमानन्द ब्रह्मेति ३ पु० ।

व्यपदेश इत्याह न वक्तव्यमित्यादिना । ननु ब्रह्मात्मैव विषयो भवत्वान- ३७ २२
न्दावाप्तिस्तु पृथक् प्रयोजनत्वेन निर्दिश्यतामिति नेत्याह * नच सा विषया-
द्बहिरिति । ब्रह्मात्मतैवानन्दप्राप्तिरित्यर्थः । नन्वनर्थनिवृत्तेरपि फलवचनवि-
षयत्वात्सापि शास्त्रविषय इति नेत्याह समूलानर्थहानिरिति । ब्रह्मात्मैक-
त्वमेव शास्त्रविषयः फलं त्वर्थसिद्धमिति भावः । तर्हि ब्रह्मात्मैकत्वशा-
स्त्रविषय एवानर्थनिवृत्तिर्न फलवचनविषय इत्याह अनर्थहेतुप्रहाणमपि
तर्हीति । ननु तत्त्वमसिवाक्ये ऽप्यनर्थनिवृत्तिर्विषयतया नावगम्यत इति
तत्राह यतः सर्वेषु वेदान्तेष्विति । वाक्यार्थस्य भावरूपत्वेपि ब्रह्मपदार्थस्या-
नर्थाभावविशिष्टतयैव प्रतिपादनात्सोपि विषय इत्यर्थः ।

ननु न पदार्थप्रतिपादकं वाक्यमस्ति किन्त्वैक्यप्रतिपादकमेवेत्याशङ्क्याह
तद्यथा सदेव सोम्येदमित्यादि समर्पयदेकं वाक्यमिति । अयमर्थः । अलौकि-
कत्वाद् ब्रह्मपदार्थं प्रतिपाद्य तादात्म्यवाक्येनैकवाक्यमिति । ब्रह्मणि † निष्प्र-
पञ्चे शास्त्रविषये जीवगतानर्थनिवृत्तिः कथं शास्त्रविषय इत्याशङ्क्याह तथा सति
तादृशेन तत्पदार्थेनेति । एवमपि स्वाभाविकनिष्प्रपञ्चता शास्त्रविषयो ऽविद्या-
तत्कार्यनिरासस्तु निष्प्रपञ्चब्रह्मात्मतावगतिसामर्थ्यलभ्यो न शास्त्रविषयो ऽवि-
द्यातत्कार्यप्रतिभासाभावस्य तत्प्रतिभासविरोधादेव शास्त्रेण प्रतिपादयितुमश-
क्यत्वादिति परिहरति यद्येवं ब्रह्मात्मावगतिनान्तरीयकमिति । ननु यथा ‡ ३८ ८
प्रातिभासिकाऽविद्यातत्कार्य्यविरोधान्न तदभावविशिष्टो वाक्यार्थः प्रतिपत्तुं
शक्यते तथा ब्रह्मणि प्रपञ्चावभासविरोधान्निष्प्रपञ्चं ब्रह्मात्मत्वेन नावेदयितुं
शक्यमस्थूलादिवाक्यैरिति । उच्यते । न तावत्प्रत्यक्षादिसिद्धो ब्रह्मणि प्रपञ्चः ।
तस्य तदगोचरत्वात् । नच प्रपञ्चसिद्धिमात्रेण ब्रह्मसम्बन्धावगमः कारणमा-
त्रकल्पकत्वात्तस्य । नन्विदं सर्वं यदयमात्मेत्यादिसप्रपञ्चवाक्यैर्ब्रह्मणि
प्रतिभासते प्रपञ्चः । सत्यम् । तेषां ब्रह्मणः सर्वोपादानकारणत्वसामर्थ्यसि-
द्धसार्वात्म्यानुवादेन निषेध्यसमर्पकतया निषेधकवाक्यैरेकवाक्यतयाऽन्वया-
न्निष्प्रपञ्चविरोधित्वाभावात् । नच सर्वोपादानतया सर्वात्मभावे सिद्धे सप्रपञ्च-
वाक्यैः सर्वात्मता प्रतिपादयितुं शक्यते । नच निषेधवाक्यैर्निषेध्याकाङ्क्षि-

* न विषयादिति ३ पु॰ । † निःप्रपञ्चेति प्रायोऽत्र १ पु॰ । ‡ प्रतिभासिकेति १ पु॰ ।

सप्रपञ्चनिषेधश्रुत्योर्निषेधश्रुतेः प्राबल्यम् । जीवस्य सप्रपञ्चत्वाभावेऽपि निष्प्रपञ्चत्वम् ।

तत्समर्पणेनैकवाक्यतासंभवे वाक्यभेदं कृत्वा स्वातन्त्र्येण प्रयोजनवन्निष्प्रपञ्च-विरुद्धं सप्रपञ्चं प्रयोजनशून्यं च प्रमातुं शक्यम् । दृष्टश्च सुषुप्ते चेतनस्य नि-ष्प्रपञ्चता पुरुषार्थ इति । श्रुतिश्चाशब्दमस्पर्शमरूपमव्ययम् निचाय्य तं मृत्यु-मुखात्प्रमुच्यत इति । दृष्टा च चेतनस्य सप्रपञ्चता ऽनर्थकरीति । नच तत्र श्रूयते फलम् । अतो निषेधैरेकवाक्यता युक्ता । नच निषेध्यप्रपञ्चानुवादप्रतिभासो निष्प्रपञ्चमितिं * बाधते तादर्थ्यादनुवादस्य । नन्वप्राप्तं प्रपञ्चं ब्रह्मणि सप्रपञ्च-वाक्यैः प्रापय्य पुनस्तन्निषेधोनर्थक एव प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वर-मिति न्यायात् । उच्यते । अद्वितीयब्रह्मप्रतिपत्त्यर्थं सर्वजगदुपादानत्वप्रतिपा-दनसामर्थ्यादेव प्राप्तस्य ब्रह्मणि प्रपञ्चस्याद्वितीयपुरुषार्थसिद्ध्यर्थमनूद्य निषेधो युज्यते । ननु तर्हि सर्वोपादानत्वसामर्थ्यादेव सप्रपञ्चताप्रमितिः प्राप्ता । न । श्रुतसामर्थ्यप्राप्तस्य सप्रपञ्चत्वस्य साक्षान्निषेधश्रुतिविरोधे दौर्बल्यात् । न तर्हि सर्वोपादानतया सप्रपञ्चताप्राप्तिः । न । यावद्बाधं श्रुतोपादानत्वसामर्थ्यादेव शुक्तिकारजतादिवत्सप्रपञ्चताप्रतिभासात् । प्रतिपन्नमेव तु बलवत्प्रमाणेन बाध्यते नाप्रतिपन्नम् नापि प्रमितम् । नचोपासनाप्रकरणपठितसप्रपञ्चवाक्यै ब्रह्म तथा प्रमीयते । अन्यपराणां तत्परवाक्यविरोधादारोपितरूपेणाप्युपासना-संभवात् । सृष्टिवाक्यैरद्वितीयब्रह्मप्रतिपत्तये निषेध्यप्राप्तिपरैः प्राप्तत्वाच्च । तस्मान्निष्प्रपञ्चब्रह्मात्मप्रमितौ शाब्दी वा लौकिकी वा प्रमितिर्न विरुध्यते ।

ननु जीवोपि वाक्यार्थप्रमितिविषयः तस्मिन्प्रपञ्चे प्रत्यक्षावगते कथं निष्प्र-पञ्चवाक्यार्थप्रमितिरिति । उच्यते । न तावदनुमानादिगम्यः कर्तृत्वादिप्रपञ्चः अपरोक्षत्वात् । नापि चक्षुरादिगम्यः प्रत्यगात्मनो बाह्येन्द्रियाविषयत्वात् । मानसप्रत्यक्ष † गम्य इति चेत् । किं तत्र प्रमाणम् । सत्येव मनसि आत्मनि बन्धोपलब्धेः असति च सुषुप्ते ऽनुपलब्धेरन्वयव्यतिरेकौ प्रमाणमिति चेत् न । अन्यथासिद्धत्वात् । आत्मनि कर्तृत्वादिप्रपञ्चसत्ताकारणतयाप्यन्वयव्यति-रेकोपपत्तेः । सुषुप्ते कर्तृत्वाद्यनवभासः किं मनसो ऽभावात्किं वा स्वयमभावा-दिति संदिग्धव्यतिरेकत्वात् । प्रतीतिः करणमप्यपेक्षत इति चेत् न । आत्मचैतन्येनैवाव्यवधानात्प्रतिभासोपपत्तेः । ननु कर्तृत्वभोक्तृत्वरागद्वेषसु-

---

* बाधेत—इति ३ पु० ।   † गम्य इति नास्ति १, ३ पु० ।

खदुःखादयोप्यात्मनि स्वयंप्रकाशा इति बौद्धप्राभाकराः कल्पयन्ति । नैत-द्युक्तम् । तेषां द्रव्यत्वे * बहुप्रकाशगुणकल्पनया तद्विशिष्टात्मप्रकाशकल्प-नादात्मन एवैकं प्रकाशगुणं परिकल्प्य तदन्वयादितरेषां प्रकाशकल्पनाया लघीयस्त्वात् । तेषां गुणत्वे सति गुणस्य गुणान्तराभावान्न स्वयंप्र-काशता । त एव प्रकाशगुणा इति चेत् न । प्रकाशगुणस्य स्वाश्रयो-पाधावादित्यादाविवानुत्पत्तेः । बन्धस्य स्वसत्तायां प्रतीतिव्यतिरेकाभावेपि न स्वयंप्रकाशमानतां कल्पयति नित्यात्मप्रकाशसंसर्गादपि तदुपपत्तेः । नच क्लृप्तकारणाभावेपि बन्धापरोक्ष्ये प्रमाणकारणान्तरं कल्पयितुं युक्तम् । निष्प्रप-ञ्चागमविरोधात् इन्द्रो मायाभिरिति मिथ्याकारणान्तरक्लृप्तेश्च । तस्मादज्ञानादि-सत्यमिथ्यावस्तुसाधारणेन साक्षिमात्रेण वेद्यत्वात्प्रपञ्चस्य सत्यतो निष्प्रपञ्च-ब्रह्मात्मप्रमितिः सप्रपञ्चप्रमित्या न बाध्यते । तस्मात् अविद्यातत्कार्य्यप्रपञ्च-प्रतिभासाभावस्य तद्विरोधादेव ब्रह्मात्मविशेषणत्वेन प्रमातुमशक्यत्वाद् ब्र-ह्मात्मावगतिनान्तरीयकतया प्रातिभासिकबन्धनिवृत्तिरिति सूक्तम् ।

नन्वनर्थनिवृत्तिर्न्न शास्त्रविषयश्चेत् कथं विषयावगतिसामर्थ्यल-भ्येति । तत्र किमनर्थनिरासः पर्यनुयुज्यते तन्निरासप्रतिभासो वा । यदि निरासस्तत्राह युक्तञ्चैतदिति । तत्त्वावभासविरोधित्वादविद्यातत्कार्यत्वा-च्चेति भावः । ननु नेदं रजतमिति विज्ञानं तत्र रजतमिति विपर्यासं निव-र्त्तयति इह तु अहं ब्रह्मास्मीति † विज्ञानं वस्तुस्वरूपनिष्ठं न प्रपञ्चनिषेधवि-षयं तत्र कथं विपर्यासनिरास इति चोदयति ननु च नञादेर्निरासकृत इति । ३८ १२ तत्र द्वे ज्ञाने विपर्यासविरोधिनी विरोधिशुक्तिकादिभावान्तरात्मज्ञानमध्य-स्तवस्तुतत्त्वाभावज्ञानं च । तत्राध्यस्ततत्त्वाभावज्ञानेनाध्यासनिरासे नञा-द्यपेक्षा न विरोधिभावान्तरज्ञाने इति परिहरति नेदं रजतमिति यत्रेति । ब्रह्मणि तु विरोधिभावान्तरज्ञानादध्यासनिवृत्तिरित्याह इह पुनर्विज्ञानमेव तादृशमिति । ननु सर्वो हि व्यापारः स्वविषयमेव साधयति न नान्तरीय-कमर्थान्तरम् अतो विपर्य्यासनिरासविषयो ज्ञानव्यापारो वक्तव्यो न भावान्तर-विषय इति नेति दृष्टान्तमाह तुलोन्नमनव्यापार इवेति । अन्यविषयव्या- ,, १५

---

* बहुषु प्रकाशेति २ पु॰ । † ज्ञानमिति ३ पु॰ ।

३८ १६ पारादन्यविषयस्य नान्तरीयकसिद्धिं साधयति तथाह्युन्नमनव्यापार इति । ननु व्यापार एवोभयविषय इत्युभयं विषयतयैव सिध्यति नान्यतरन्नान्तरीयकमिति नेत्याह नचोन्नमनकारकस्येति ।

भवतु शुक्तिब्रह्मात्मज्ञानाभ्यां रजतबन्धयोर्नान्तरीयको निरासः । निरासप्रतिपत्तिस्तु कथमिति । सापि नान्तरीयकेत्याह तदेवं विपर्य्यासगृहीते वस्तुनीति । एवमिति यथा निरासस्तथा तत्प्रतिपत्तिरपीत्यर्थः । अभिनयेन दर्शयति नाहं कर्त्ता ब्रह्माऽहमिति चो * त्क्रमेण सम्बन्धः । ब्रह्माऽहमिति वाक्यार्थबोधे ऽहं ब्रह्मैव चेन्नाहं कर्त्तेति नान्तरीयकबोधः । नेदं रजतमित्यत्राप्येषैव योजना । ननु वाक्यमेव ** द्व्यर्थं किं न स्यादिति नेत्याह तस्माच्छुक्तिकेयमित्येव निराकाङ्क्षमिति । अनुवाद इति वाक्यार्थज्ञाननान्तरीयकसिद्धस्य अनुवाद इत्यर्थः । अर्थान्तरज्ञानेनार्थान्तरज्ञानस्य नान्तरीयप्रतिभासे दृष्टान्तमाह अत एवाऽऽख्यातपदस्येति । वाक्यार्थभूतक्रियावाचकत्वादाख्यातस्य वाक्यत्वम् । क्रियाज्ञानसामर्थ्यादेव सर्वसाधनानां विकल्पेन क्रियान्वयप्रतिपत्तौ पदान्तराण्यन्यतमनियमार्थानि नित्यवदन्वयप्रतिपत्तावनुवादमुखेनान्यनिवृत्त्यर्थानीत्यर्थः । संभवति च नित्यवदन्वयप्रतिपत्तिरेकस्य बहुसाधनतोपपत्तेः । तथाचाहुर्यजतिचोदनेत्यादि । उदाहरणान्तरं श्रुतार्थापत्त्यैवार्थान्तरप्रतिपत्तौ । कथं द्रव्यदेवतयोर्यागश्रुत्यन्यथानुपपत्तिगम्यतया यजत्यर्थतेत्याशङ्क्याह कथं क्रियामात्रवाचिन इति । ननु यत्र विपर्यासगृहीतस्य वस्तुनो विरोधिभावान्तरात्मविषयं वाक्यं विपर्यासं निवर्तयति तत्र विपर्यासनिरासप्रतिपादने वाक्यस्य सामर्थ्याभावान्नान्तरीयकं निरासज्ञानमस्तु । यत्र पुनः प्रत्यक्षं बाधकं तत्र विपर्यासनिरासविशिष्टभावान्तरज्ञानमेव बाधकम् न तत्र विपर्यासनिरासस्य नान्तरीयज्ञानमिहाप्यपरोक्षज्ञानादन्यनिवृत्तेरुभयविषयमेव ज्ञानं नान्यतरस्य नान्तरीयकतेत्याशङ्क्याह प्रत्यक्षबाधस्यापीति । न तावदनुपलब्धिगम्यो रजताभावः । पुरोदेशे दृश्यमानत्वात् अथ संप्रयोग † गम्य इति नेत्याह असंप्रयुक्तविषयत्वादिति । रजत-

३९ ३ तदभावौ न संप्रयोगयोग्यावित्यर्थः । तदेवमशाब्दमित्युपसंहारः स्पष्टार्थः ।

---

* इति व्युत्क्रमेणेति २ पु०, इति ह्युत्क्रमेणेति, ३ पु० ।

† गम्य इत्यस्य स्थाने जन्य इति १ पु०, तदर्थरूपेण जन्य इति लिखितमस्ति २ पु० ।

ननु ब्रह्मविद्याफलमनर्थहेतुनिरासो न वेदान्तारम्भफलम् तच्च कथं प्रहाणाय वेदान्ता इत्याशङ्क्याह चतुर्थीप्रयोगोपीति । उपादानं वेदान्तारम्भ ३९ ५ इत्यर्थः । तर्हि ब्रह्मविद्याफलत्वान्न शास्त्रस्यानर्थनिरासः प्रयोजनम् न परम्परयापि पुरुषाकाङ्क्षितप्रयोजनत्वोपपत्तेरित्याह प्रयोजनत्वं चेति । विद्याप्रतिपत्तय इति प्रतिपत्तिशब्दमाक्षिपति नहि विद्या गवादिवदिति । ज्ञानं हि वस्तुतः प्रतीतितश्च ज्ञातुरुत्पत्त्यैवाप्तमेवेत्यर्थः । तच्च प्रत्यक्षान्तरेषु स्वविषयेण सहापरोक्षावभासाविद्या भवति आप्तिशब्देन च विषयेण सहापरोक्ष्यनिश्चयो विवक्ष्यते तदिह न संभवतीत्याह सत्यमेवमन्यचेति । अत्र विद्येति शक्तितात्पर्य्यविचारसहकृताच्छब्दाद्यत् प्रमाणज्ञानमुत्पद्यते तदभिधीयते । तस्य प्रतिष्ठा स्वविषयेण सहापरोक्ष्यमिति । तत्रासंभवानेति चित्तस्य ब्रह्मात्मपरिभावनाप्रचय निमित्ततदेकाग्रवृत्त्ययोग्यतोच्यते । विपरीतभावनेति शरीराद्यध्याससंस्कारप्रचयः । नन्वपरोक्षावभासनिमित्तप्रमाणगृहीते वस्तुनि नोभयविधक्षित्तदोषादपरोक्षनिश्चयाभावदर्शनमस्तीति तत्राह तथा च लोके ऽस्मिन्देशे काल इति । यथा दूरदेशवर्त्तिन्यार्द्रमरीचफलादौ तथाविधवस्तुदर्शनसंस्कारशून्यतया विपरीतसंस्कारवत्तया च प्रत्यक्षदृष्टेपि न निश्चिनोति । असंभावितविशेषांऽशापरोक्षनिश्चयो नोत्पद्यत इत्यर्थः । ननु प्रमाणादनिश्चीयमानः कथं तर्कप्रत्ययान्निश्चीयत इति तत्राह अत एव प्रमाणानामिति । प्रसिद्धैव सहकारिसंपत्तौ फलसिद्धिरित्यर्थः । ननु तर्कस्यापि प्रमाणत्वे कथं प्रमाणद्वयादर्थनिश्चयो भवति अप्रमाणत्वे नतरामिति मन्वान आह अथ कोयमिति । अप्रमाणमपि तर्कः सहकार्येव प्रत्ययविशेषत्वादित्याह प्रमाण- ,, १६ शक्तिविषयतदिति । तेषां तत्त्वं तदित्युच्यते । प्रमाणादितत्त्वे संभवासंभवप्रत्ययस्तर्को न निश्चयरूप इत्यर्थः ।

तत्रेदं निरूपितं प्रथमे तन्त्रे । ज्ञानानां प्रामाण्यमप्रामाण्यं च स्वत इति केचित् । उभयमपि परत इत्यन्ये । प्रामाण्यं परतो ऽप्रामाण्यं स्वत इत्यपरे । अप्रामाण्यं परतः स्वतः प्रामाण्यमिति वेदवादिनः । तत्र न तावज्ज्ञानानां प्रामाण्यमप्रामाण्यं च स्वत इति युज्यते विरोधात् । ननु व्यक्तिभेदेन

व्यवस्था । सत्यमर्थतस्तथैव । प्रतीतितस्तु * प्रमाणाप्रमाणप्रतिभासाविशेषात्कस्य किमित्यनवगमाद्व्यवहाराभावप्रसङ्गात् । नच मूर्त्तामूर्त्तविभागवत्प्रमाणाऽप्रमाणविभागः प्रत्यक्षतो ऽवभासते । अर्थतस्तु व्यक्तिभेदेन व्यवस्थीयते । नाप्युभयं परतः । प्रमाणाप्रमाणविभागहीनस्य ज्ञानस्य स्वरूपानवगमात् । नापि प्रामाण्यमर्थपरिच्छेदसामर्थ्यं कारणगुणज्ञानात्परतो ऽवगम्यते । अनवस्थापातात् । नापि ज्ञानकरणव्यतिरिक्तात्कारणात्प्रामाण्यं जन्यते । क्षणमात्रापवर्गिणि ज्ञाने तदयोगात् । प्रतिभासतो भ्रान्तिसम्यग्ज्ञानयोर्विशेषाभावे चक्षुरादिगुणजन्यत्वावगमात्प्राक् प्रामाण्यनिश्चयाभावाद्व्यवहाराभावप्रसङ्गात् । प्रामाण्यनिमित्तचक्षुरादिगुणज्ञानस्यापि गुणान्तरजन्यत्वावगममन्तरेण गुणनिश्चयनिमित्तत्वायोगात् । प्रतिभासतो भ्रान्तेरविशेषात् स्वतो गुणजन्यत्वानिश्चयात् । ज्ञानस्य गुणान्वयव्यतिरेकयोश्च प्रामाण्यप्रतिबन्धकदोषाभावविषयतया † न्यथासिद्धत्वात् । दोषनिवृत्तिव्यतिरेकेणेन्द्रियादिषु गुणादर्शनाच्चान्यतोपि प्रामाण्यस्य ज्ञानेन सह जन्माभावः । अर्थक्रियासंवादज्ञानात्प्रामाण्यनिश्चयेपि तुल्यो ऽनवस्थादिदोषः । साधनज्ञानानामेवार्थक्रियासंवादात्प्रामाण्यम् न फलज्ञानानाम् अर्थक्रियान्तराभावात् अतो नानवस्थेति चेत् । तद्वदेव साधनज्ञानानामपि तत् स्वत एव स्यात् । अन्यथा प्रवृत्तस्यार्थक्रियातः प्रामाण्यं प्रामाण्याच्च प्रवृत्तिरितीतरेतराश्रयं स्यात् । न च प्रामाण्यनिश्चयाय प्रवृत्तिः असंदिग्धार्थत्वाज्ज्ञानानाम् । रूपकपरीक्षादौ प्रत्ययचतुष्टयाद् दृश्यते ऽर्थनिश्चय इति चेत् न । प्रथमज्ञानस्यैव संशयादिप्रतिबन्धनिरासित्वादुत्तरज्ञानानाम् । तस्माज्ज्ञानोत्पत्तिमात्रप्रयुक्तार्थव्यवहारदर्शनात् प्रतीतितो ऽर्थतश्च स्वत एवार्थनिश्चयः प्रामाण्यम् अप्रामाण्यजन्म दोषसहितात्कारणात् तत्प्रतीतिर्बाधादिति परत एवाप्रामाण्यं युक्तम् । नचाप्रामाण्यस्य परतो जन्म संभवति प्रामाण्यप्रागभावत्वादिति चेत् न । ज्ञानसंशयमिथ्यात्वानामप्रामाण्यानां भावरूपत्वात् । ननु स्वतः प्रमाणस्य कथं परतो ऽप्रामाण्यं स्वभावविरोधादिति चेत् । दोषप्रतिबन्धबलादग्नेरिव शैत्यस्पर्शो न विरुध्यते । स्वतःप्रामाण्या-

---

* प्रमाण्याऽप्रामाण्यप्रतिभासेति ३ पु० । † अन्यथासिद्धित्वादिति १ पु० ।

देव च यावद्दोषावगमं ज्ञानादेव व्यवहारदर्शनम् । तस्मात्प्रामाण्यतत्प्रतीत्योर्गुणतज्ज्ञानान्तराद्यनपेक्षमेव ज्ञानं स्वतः सत्तयैव निश्चयव्यवहारनिमित्तमिति स्थापितं तदेतद्विरुध्यते तर्कप्रत्ययापेक्षया ज्ञानस्य स्वविषयं प्रति निश्चायकत्व इति चोदयति नन्वेवं तर्कसापेक्षं स्वमर्थमिति । परिहरति न स्यात्स्वमहिम्नैवेत्यादिना । प्रमाणादेवार्थापरोक्ष्यनिश्चये तत्प्रतिबन्धविगमे तर्कस्योपयोगान्नार्थनिर्णयहेतुतेत्युक्तम् । ३९ १७

नन्वेवं बहिरर्थे प्रमाणप्रतिबन्धसंभवात्तद्विगमाय भवतु तर्कोपकारो न तथात्मनि स्वयंप्रकाशे प्रतिबन्धाभावादिति तत्राह तथा च तत्त्वमसिवाक्ये त्वम्पदार्थे इति असंभावयन्नित्या * परोक्ष्याभाव उच्यते विपरीतमिति च † पारोक्ष्यमुच्यते । अत्रायमाशयः । लोके तावद्विषयस्यापरोक्षता संविदभेदाद्वा विषयस्याव्यवधानतया स्वसंविज्जनकत्वाद्वा प्रमाणकारणेन्द्रियसंप्रयुक्तत्वाद्वा भवति उक्तकारणत्रयहीने ऽनुमेयादौ परोक्षतादर्शनात् । तत्र ब्रह्मण एव सर्वसंविदुपादानत्वाद्ब्रह्माकारशब्दप्रमाणजन्यसंवेदनेपि तदभिन्नतया वा तज्जनकतया वा ब्रह्मापि प्रथममेवापरोक्षतयावभासते । तच्च चित्तस्यातिसूक्ष्मे ऽनेकाग्रतादोषाद्विपर्य्ययसंस्कारदोषाच्च प्रतिबद्धं भ्रान्त्या परोक्षवदवभासते । तत्रापरोक्षज्ञानमुद्दिश्य यज्ञादीनां शमादीनां निदिध्यासनादीनां च विधानसामर्थ्याद्यज्ञादिनिर्बर्हितकल्मषप्रतिबन्धं शमादिनिरुद्धविपरीतप्रवृत्तिदोषं मननसंदर्शितप्रमेयादिसंभावनागुणप्रदीपोज्ज्वलितमतिसूक्ष्मतरब्रह्मात्मविषयनिदिध्यासनप्रचयपरिनिर्मिततदेकाग्रवृत्तिगुणं चेन्द्रियं पारोक्ष्यविभ्रमनिमित्तप्रतिबन्धनिरासेन शब्दादेवापरोक्षनिश्चयनिमित्तं भवतीति गम्यते । लोके चातिसूक्ष्मवस्तुनिर्धारणे चित्तैकाग्र्यविशेषापेक्षया दर्शनात्तर्कशब्देन चात्रैतादृशं सर्वप्रतिबन्धनिरासि चित्तदर्पणमुच्यते । यौक्तिकासंभावनाविपरीतभावनानिरासितर्काणां प्रथमज्ञानेनन्तर्भूतत्वात् । एवं च तं त्वौपनिषदमिति तद्धितप्रत्ययेन ब्रह्मावगतिहेतुत्वं शब्दस्य दर्शितमुपपन्नं भवति अपरोक्षावगतेरेव सम्यगवगतित्वादिति । अन्यन्मतम् न प्रथमोत्पन्नं शाब्दज्ञानमेव प्रतिबन्धविगमापेक्षया ऽपरोक्षावभासं भवति किंतु शब्द

---

* इत्यपरोक्षनिश्चयाभाव इति ३ पु॰ । † पारोक्षमिति ३ पु॰ ।

एव प्रथमं ब्रह्मणि परोक्षज्ञानमुत्पाद्य पुनर्वर्धितचित्तदर्पणसहकारिकारिणापेक्षया द्वितीयमपरोक्षज्ञानमुत्पादयति । शब्दादीनां तद्धितप्रत्ययादिना ऽपरोक्षज्ञाने विनियोगसामर्थ्यात् । यथा संप्रयोगो ऽभिज्ञामुत्पाद्य पुनः पूर्वानुभवसंस्कारापेक्षया प्रत्यभिज्ञामुत्पादयति तद्वत् । नच स्वयम्प्रकाशे ब्रह्मणि परोक्षज्ञानं विभ्रमः । स्वयम्प्रकाशेपि पुरुषान्तरसंवेदने परोक्षानुमानदर्शनादिति । सर्वथाप्यापारोक्ष्यस्य प्रयत्नान्तरलभ्यत्वाद्युक्तं पृथक्प्रतिपत्तिशब्दग्रहणमित्याह ततः प्राग्विद्योदितापीति । कैः पुनः सहकारिभिः शब्दप्रमाणा-
३९ २३ दापरोक्ष्यं लभ्यत इति तत्राह अवाप्तिप्रकारश्च वेदान्तेष्वेव निर्दिष्ट इति ।

ननु मनननिदिध्यासनयोः कथं श्रवणं प्रत्यङ्गतावगमः यावता ब्रह्मण्येव शक्तितात्पर्य्यविशिष्टवेदान्तशब्दावधारणाच्छ्रवणशब्दाभिधेयादात्मन्यवबुद्धे पश्चान्मननमर्थसंभावनोपपत्तिपर्य्यालोचनाद्वारा जनिता ब्रह्मणि प्रत्ययावृत्तिरुत्पद्यते । ततश्च प्रमाणयुक्तिसंभावनाभ्यां परिनिश्चितेपि विषये तदेकाकारं चित्तसमाधानं निदिध्यासनमुत्पद्यते । तदेवं निदिध्यासनस्वरूपोपकारितया श्रवणमननयोस्तदङ्गभावे ऽवगते न युज्यते श्रवणाङ्गता मनननिदिध्यासनयोरिति । अत्रोच्यते । यस्मिन्पक्षे शक्तितात्पर्यविशिष्टशब्दावधारणं प्रथमं ब्रह्मणि परोक्षज्ञानमुत्पाद्य मनननिदिध्यासनसंस्कारविशिष्टान्तःकरणापेक्षया परोक्षज्ञानमुत्पादयति तत्र ब्रह्मणि परोक्षज्ञानस्य निदिध्यासनोपकारितया तदङ्गत्वेपि तात्पर्य्यविशिष्टशब्दावधारणादपरोक्षज्ञानोत्पत्तौ मनननिदिध्यासने श्रवणस्य फलोपकार्य्यङ्गतामश्नुवाते । नन्वपरोक्षफलोदयेपि निदिध्यासनाङ्गतैव श्रवणमननयोः किं न स्यात् त्रयाणामपि सन्निपत्योपकाराविशेषात् । दर्शपौर्णमासवत्समप्रधानता वा किं *न स्यादिति । उच्यते । विशिष्टशब्दावधारणं प्रमेयावगमं प्रत्यव्यवधानेन कारणं भवति । प्रमाणस्य प्रमेयावगमं प्रत्यव्यवधानात् । मनननिदिध्यासने तु चित्तस्य प्रत्यगात्मप्रवण†तासंस्कारपरिनिष्पन्नतदेकाग्रवृत्तिकार्य्यद्वारेण ब्रह्मानुभवहेतुतां प्रतिपद्येते इति फलं प्रत्यव्यवहितस्य करणस्य विशिष्टशब्दावधारणस्य व्यवहिते मनननिदिध्यासने तदङ्गे अङ्गीक्रियेते । यदा तु पुनः शब्दादेव प्रथममपरोक्षानुभव-

* नशब्दः १ पु॰ नास्ति ।

† तल्प्रत्ययो नास्ति ३ पु॰ ।

फलं विज्ञानमुत्पन्नं भ्रान्तिविक्षेपसंस्काराख्यचित्ता * न्तःकरणदोषादर्थोऽपि परोक्षानुभवफलतया विभ्रान्त्या ऽवतिष्ठते । तदा मनननिदिध्यासने चित्तगतविक्षेपादिदोषप्रतिबन्धनिरासेनापरोक्षफलप्रतिष्ठाहेतुतया प्रमाणस्य फलोपकार्य्यङ्गमिति न विरुध्यते । नच शब्दकरणमन्तरेण निदिध्यासनादेवापरोक्षानुभवफलजन्म संभवति । तस्य प्रामाण्यासिद्धेः । शब्दावगतब्रह्मात्मविषयत्वादपरोक्षस्य तद्द्वारेण प्रामाण्यनिश्चय इति चेत् । नैवम् । उत्पन्नस्य हि विज्ञानस्य प्रमाणान्तराधीनविषयसद्भावनिश्चयाधीनप्रामाण्यकल्पनाद्वरं स्वस्यैव क्लृप्तप्रमाणजन्यत्वकल्पनम् । अन्यथा परतःप्रामाण्यादितरच स्वतःप्रामाण्यात् । तस्माद्युक्तं श्रवणस्य फलोपकार्य्यङ्गता मनननिदिध्यासनयोरिति ।

ननु ब्रह्मापरोक्षज्ञानमपि नानर्थनिवृत्तिनिमित्तम् सत्यपि तस्मिन्संसारानुवृत्तिदर्शनात् अन्यथा सद्य एव शरीरपातः स्यादिति चोदयति नन्वात्मै- ३९ २५ कत्वविद्याप्रतिपत्तिरिति । ननु व्यतिरेकज्ञानात्तत्त्वज्ञानस्य विशेषो दर्शितः । सत्यम् फलतो न विशेष इत्याह तथाहि जीवस्येति । नैतद्युक्तम् तत्त्वापरोक्षात्समूलाध्यासनिवृत्तेरन्वयव्यतिरेकशास्त्रसिद्धत्वादित्याह भवतु तत्त्वाविद्याया इति । नन्वध्यासविरोधिव्यतिरेकावगमात्तत्त्वावबोधो ऽध्यासविरुद्धोऽपि तन्नापनयतीत्यनुमीयतामिति नेत्याह नहि जीवस्येति । अनवबोधविरुद्धं तत्त्वज्ञानं न व्यतिरेकज्ञानमित्यर्थः । सशरीरेन्द्रियस्यैवापरोक्षावगमात् तर्हि सद्य एव शरीरपातः स्यादिति चोदयति ननु ब्रह्म- ४० ६ ज्ञानादिति। तत्त्वज्ञानादविद्यानिरोधेऽपि पुनरनुवृत्तिर्युज्यत इत्याह न संस्कारादिति । तदेव प्रपञ्चयति तथाहीति । ननु क्रियाज्ञानयोरेव संस्कारः सम्भवति नाज्ञानतत्कार्य्ययोः । न । गन्धादिसंस्कारदर्शनात् । प्रलयावस्थायां सर्वकार्यसंस्कारोपगमात् । सर्वत्र विनाशमात्रप्रयुक्तसंस्कारजन्मानुमानात् । अविद्यातत्कार्यस्य भ्रान्तिज्ञानात्मकत्वात् । अज्ञानादौ च साक्षिचैतन्यावच्छेदकज्ञानाभासोपगमात्संस्कारसिद्धेः । ननु संस्कारात् स्मृतिमात्रहेतोः कथमपरोक्षद्वैतावभासः स्यात् । अविद्यावत्संस्कारस्यापि चैतन्यदोषत्वादिति वदामः । अपरोक्षावभासकारणगतो दोषो ऽपरोक्षभ्रमहेतुरिति सिद्धत्वात् आत्ममा-

---

* अन्तष्करणेति १ पु॰ प्रायोऽत्र सर्वत्र भवति ।

चस्यैवाविद्याश्रयत्ववत्संस्काराश्रयत्वोपपत्तेश्च * अविद्यासंस्कारव्यतिरिक्तकार्याणामेवाविद्योपादानत्वात् । आत्मनो मिथ्याभूतसंस्कारोपादानत्वाभावेप्याश्रयोपाधित्वस्याविद्योपाधित्ववदविरोधात् । तत्त्वज्ञानानुसंधानादेव च क्रमेण संस्कारनिवृत्तेः कंचित्कालमवस्थायैव विदेहमुक्तिर्न विरुध्यते । अविद्यालेशो वा तमोलेशवत्संस्कारशब्देनाभिधीयत इति निरवद्यम् ।

४० ११ ननु न सर्वे वेदान्ता इति स्पष्टार्थः । तत्र निर्विशेषब्रह्मप्रतिपत्त्यर्थेषु वेदान्तेषु सगुणब्रह्मोपासनानां तावत्प्रासङ्गिकत्वं दर्शयति सत्यमुपासनाकर्म त्विति । ननु निर्विशेषं चेद् ब्रह्म प्रतिपाद्यम् तस्य कथं सगुणोपासनालम्बनं सप्रपञ्चं ब्रह्माङ्गभूतं स्यात् येनाश्रित्य विधानमुच्यत इति अध्यारोपापवादन्यायमभिप्रेत्याह तच्चापाकृताशेषप्रपञ्चमिति । निराक्रियमाणे प्रपञ्चे कथमुपासनाविधानं निराकरणप्रत्ययविरोधादिति तत्राह अस्यां चावस्थायामिति । नन्वाश्रित्य विधाने गोदोहनवदधिकृताधिकारतापि स्यादिति मुमुक्षोरेवोपासनास्वप्यधिकारः स्यादिति । उच्यते । अपां प्रणयनस्य प्रकृततयोद्देश्यत्वान्न गोदोहनविधिनानुष्ठेयतया सिद्धिः अतः प्राप्तोद्देश्यत्वात्प्रणयनस्य स्वतन्त्रपशुकामिनो प्राप्तत्वात्प्राप्तप्रणयनस्य दर्शपौर्णमासाधिकारिण एव पशुकामस्य गोदोहनेप्यधिकारो दर्शितः । सप्रपञ्चब्रह्मप्रतिपत्तिश्चाश्रीयमाणा मुमुक्षोरमुमुक्षोश्च शब्दादविशेषेण प्राप्नोति तदाश्रित्य विधानं मुमुक्षूणामप्युपपद्यत इति न मुमुक्ष्वधिकारकल्पना किन्त्वाश्रित्य विधानमात्रमिति निरवद्यम् । अतो महातात्पर्य्यप्रक्रमो ब्रह्मपर इत्युपसंहरति तस्मात्तदर्थोपजीवित्वादिति ।

नन्वब्रह्मोपासनान्यपीत्यादेरयमर्थः । साक्षाद्वा परम्परया वाऽन्तःकरणशुद्धिद्वारेण वा ब्रह्मात्मैकत्वावगतिपराः सर्वे वेदान्ता इति वेदान्तविषयप्रयोजनयोरेव विचारशास्त्रस्याऽपि विषयप्रयोजनत्वमिति कथयितुमाह यथाचायमर्थ इति । भाष्यस्य तात्पर्य्यमाह प्रतिज्ञातेर्थे इति ॥ शरीरेत्यादिः स्पष्टार्थः । वेदान्तानां शारीरकत्वेऽपि विचारस्य कथं शारीर- ,, २५ कत्वमिति तदाह तदिह वेदान्तानामिति । ननु विचारकर्त्तव्यतामात्रं

* अविद्यासंस्काराऽव्यतिरिक्तकार्याणामिति १ पु० ।

सूत्रार्थः । तत्र विषयप्रयोजनयोरसूचितयोरुपादानं वेदान्ततद्विचारसंबन्धितया नोपपद्यत इत्याशङ्कामपनुद्य वृत्तसङ्कीर्त्तनपूर्वकमुत्तरभाष्यस्य तात्पर्य्यमाह मुमुक्षुत्वे सत्यनन्तरमित्यादिना । कथं ब्रह्मज्ञानस्य मोक्षः ४० २७ प्रयोजनमर्थसिद्धमिति तदाह पुरुषार्थकामनेति । प्रवृत्तिरिति प्रवृत्तिविषयेष्टसाधनता ऽभिधीयते । सैव हि विधिरिति वक्ष्यामः ।

यस्मिन्धात्वर्थे प्रवृत्तिर्हितसाधनता लिङादिपदैरुपदिश्यते स धात्वर्थः सामान्येन हितसाधनो ऽधिकारिविशेषणेन * फलविशेषेण सामर्थ्यात्सम्बध्यते । सामान्यप्रतीतेर्विशेषपर्य्यवसानमन्तरेणानुपपत्तेः । अतश्च विचारो हि सामान्येन हितसाधनतयावगम्यमानः स्वसामर्थ्यसिद्धज्ञानद्वारेणाधिकारिविशेषणमोक्षविशेषफले पर्य्यवस्यतीत्यर्थः । ननु च पुरुषार्थकामिनो यत्र नियोग उपदिश्यते तत्र नियोगो धात्वर्थस्य पुरुषार्थसाधनत्वं कल्पयति । ततश्च विधीयमानो विचारो नियोगसामर्थ्यान्मोक्षसाधनमिति कल्प्यतां किमिष्टसाधनत्वविधिसामर्थ्यकल्पनयेति । नैतत्सारम् अनुपपत्त्यभावात् । तथाहि । नियोगस्वरूपं तावन्न फलधात्वर्थसंबन्धमन्तरेणानुपपन्नम् अनाप्तनियोगे नैत्यमिके वा ऽदर्शनात् । †प्रवर्त्तकत्वमनुपपन्नमिति चेत् । यदि फलकामनापि नियोगेन प्रवृत्तावपेक्ष्यते सैव तर्हि प्रवृत्तिहेतुः न नियोगः । प्रत्यक्षादिषु तस्याः प्रवर्त्तने स्वातन्त्र्यदर्शनात् । अथ नापेक्ष्यते कामः । तर्हि फलकामनामनपेक्ष्य बलवदनिलसलिलौघनुद्यमान इव पुरुषे नियोगेन प्रवर्त्त्यमाने न फलसंबन्धकल्पनावकाशः सलिलादिनोदनेपि प्रसङ्गात् । ननु फलकामिनो नियोगः प्रमीयमाणो ऽनुपपन्नः फलसंबन्धमन्तरेण अन्यथाफलकामिनियोगो न स्यात् । कोयमभिप्रायः । यदि तावत् फलकामना नियोगाधिकारिविशेषणं न स्यात् फलधात्वर्थसंबन्धमन्तरेणेति । तन्न । जीवनादीनामसाध्यानामप्यधिकारिविशेषणत्वदर्शनात् । साध्यस्य विशेषणत्वमनुपपन्नमिति चेत् न तावदनेन साध्यत्वं सिद्धवत्कर्तुं शक्यते । स्वरूपेण साध्यत्वं चेत् न अविवक्षितत्वात् । तथाहि । अधिकारिविशेषव्यावृत्तिमात्रप्रयोजनतया विशेषणपरेण शब्देन साध्यता न विवक्ष्यते नार्थादपि साध्यत्वविवक्षा । तत्र प्रमाणस्याप्यदर्शनात् । कामनैव च सिद्धस्वरूपा ऽधिकारिविशेषणम् । स्वर्गस्य तद्भावर्त्तकत्वात् ।

---

* फलविशेषणेन सामर्थ्यादिति १ पु॰ । † प्रवर्त्तकद्वयमिति १ पु॰ ।

किञ्च । अन्यसाध्यस्यापि व्यापारान्तरे ऽधिकारिविशेषणत्वं दृश्यते अध्येतुकामो * भैक्ष्यं चरेत्परस्त्रीकामः प्रायश्चित्तं कुर्यात् † ग्रामकामो भुङ्क्ते-त्यादौ । नचाधिकारिविशेषणत्वमपि स्वर्गकामनायाः ‡ संभवति अयोगाऽन्य-योगव्यवच्छेदासंभवात् । तथाहि । स्वर्गकामपदं दर्श § पौर्णमासनियोगस्य पुरुषेणासंयोगं न व्यवच्छिनत्ति । नित्यविधिनैव पुरुषान्वयस्य सिद्धत्वात् । नापि नियोगस्यास्वर्गकामसंबन्धव्यवच्छेदार्थं विशेषणम् । अत्रापि दर्शपौर्णमासनि-त्यविधिसंबन्धविरोधात् । नच नित्यकाम्यनियोगभेदः । साङ्गदर्शपौर्णमास-नियोगस्याविशिष्टत्वात् । अधिकारिमात्रभेदात् । तस्माद्गुणडी प्रैषानन्वाहेतिव-द्विशेषणस्वर्गपरमिदं वचनं न विशिष्टपुरुषपरमिति फलवचनमेतत्स्वर्गकामप-दमर्थात्स्वर्गकामोधिकारी भवति । फलवचनं च साधनवचनेनान्विताभिधा-नमर्हतीति न नियोगाभिधानावकाशः । ततश्चेष्टसाधनमेव लिङादिशब्दार्थो विधिरिति ।

अन्ये मन्यन्ते विषयनियोज्यव्यावृत्ते नियोगे ऽभिधीयमाने विषयनि-योज्ययोरन्वयः सामर्थ्यादवगम्यते । अन्यथा ऽधिकारिणो विषयेण कर्तृकर्म्मा-नन्वयेनाननुष्ठीयमाने विषये नियोगस्य निवृत्त्ययोगात् । ततश्चाधिकारिणा धात्वर्थो ऽन्वीयमानस्तद्विशेषणेन स्वर्गेणाप्यन्वेति । विशिष्टानन्वयस्य विशे-षणेनाप्यन्वयात् । तत्रान्वयो गुणप्रधानभावादृते नोपपद्यत इति स्वर्गप्राधा-न्येन कर्मगुणभावेनेति संपत्स्यते साध्यसाधनसंबन्ध इति ।

नैतत्सारम् । जीवनगृहदाहादिविशेषणेनापि यागस्यान्वयप्रसङ्गात् । को दोष इति चेत् । जीवनादेर्द्धात्वर्थे प्रत्यङ्गत्वेनान्वये विकृतावतिदेशः प्राप्नु-यात् । तत्र यावज्जीवं सौर्यं चरुं निर्वपेदिति स्यात् । प्राधान्येनान्वये जीवना-देरपि कर्मसाध्यत्वं स्यात् । तस्मात्स्वर्गकामपदं फलविशेषपरतया सामान्येन श्रेयःसाधनविध्यभिधायिना लिङादिपदेनान्विताभिधानं करोति । ननु शाब्दे फ-लविशेषान्वये सामान्येन श्रेयःसाधनत्वाऽपर्यवसानसामर्थ्याद्विशेषान्वय इत्यु-क्तमयुक्तम् । नैष दोषः । विशेषसाकाङ्क्षश्रेयःसामान्यसाधनत्वविधिसामर्थ्या-त्स्वर्गकामपदं फलविशेषपरं ‖ कल्प्यते विध्याकाङ्क्षानिबन्धनत्वात्पदान्तरतात्प-

---

* भैक्षमिति क्वचित् । † ग्रामकाम भुङ्क्ष्वेति २ पु०, ग्रामकामो भुङ्क्ष्वेति ३ पु० ।
‡ संभवति संयोगान्येति ३ पु० । § पूर्णमासेति ३ पु० । ‖ कल्प्यतइति १ पु० ।

र्थस्य । ततश्च विधिसामर्थ्यात्फलसंबन्ध इत्युक्तम् । ननु तिङ्कृत्तद्धितसमासै-रनभिहित इति विशेषणात् लिङा यागस्य करणताभिधाने ज्योतिष्टोमेनेति तृतीया नोपपद्यत इति । न । यागज्योतिष्टोमसामान्यविशेषप्रकृत्यर्थभेदोपरक्त-करणत्वभेदाददोष इत्यलमतिप्रसङ्गेन ।

विषयसिद्धिः कथमिति तदाह तथा सति कुत इति । तदेवमि- ४१ ३ त्याद्युक्तानुकीर्त्तनम् । प्रथमं तावदिति भाष्यस्य तात्पर्यकथनम् । ननु विषयः समन्वयलक्षणेनैव गम्यते प्रयोजनं च चतुर्थाध्यायेनैव *प्रमीयते तत्र किमिति विषयप्रयोजने प्रथमसूत्रेण † सूचिते इति तदाह । शास्त्रस्या-दिरयमिति नन्वेकस्य सूत्रवाक्यस्यानेकार्थत्वमयुक्तमिति । तत्राह सूत्रं चैतदिति । तत्राथशब्द इत्यादिपदव्याख्यानभाष्यस्य वृत्तसङ्कीर्त्तनपूर्वकं तात्पर्यमाह एवं सूत्रस्यादित्वेनेति ॥

॥ ‡इति प्रथमवर्णकं समाप्तम् ॥

* प्रतीयत इति ३ पु० ।   † सूत्रिते इति २ पु० ।

‡ श्रीमत्परमहंसपरिव्राजकानन्यानुभवपूज्यपादशिष्यस्वप्रकाशानुभवभगवतः कृतौ पञ्चपा-दिकाविवरणे प्रथमवर्णकं समाप्तमिति ३ पु० ।

तत्रोक्तस्तावद्विचारविधेः फलानुबन्धो व्यवहितविषयब्रह्मात्मतानुबन्धश्चेदानीमव्यवहितविचारविषयानुबन्धमन्यत एवाप्राप्तानुष्ठानं दर्शयि-
४२　१ तुं प्रथममाक्षिपति सिद्धैव ननु ब्रह्मजिज्ञासेति । वेदान्तानामर्थनिर्णयापेक्षितो न्यायकलापो ऽथातो धर्मजिज्ञासेत्यादिसूत्रैः सूचित इत्यर्थः । ननु विधिवाक्यार्थनिर्णयस्तत्र प्रवृत्त इत्याशङ्क्याह सकलवेदार्थस्य विचारितत्वादिति । वेदस्य कार्यमात्रपरत्वादित्यर्थः । ननु वेदान्ततात्पर्याद् ब्रह्मावगम्यते न कार्य्यमनवगम्यं च न वाक्यप्रमेयमिति तत्राह ब्रह्मज्ञानस्य चेति । ननु क्रियाविधिकलापो निरूपितो ज्ञानविधिनिरूपणायेदमारभ्यत इति नेत्याह
,,　३ अतः सिद्धैवेति । उत्पत्तिविनियोगप्रयोगाधिकाराणां विध्यपेक्षितरूपाणां क्रियाप्रतिपत्त्योरविशेषेण निरूपितत्वादित्यर्थः । ननु यथा प्रथमे ऽध्याये वेदस्य प्रामाण्यं निरूपितम् । द्वितीये कर्मोत्पत्तिविधिभेदः । तृतीये विहितानामङ्गाङ्गिभावो निरूपितः । चतुर्थे क्रतुपुरुषार्थप्रयुक्तानुष्ठेयपरिमाणम् । पञ्चमे अनुष्ठानक्रमः । षष्ठे विध्यपेक्षितोधिकारनिर्णय इति पूर्वषट्केन प्रकृतिविध्यपेक्षितो विचारः कृतः समग्राङ्गसंयुक्तो विधिः प्रकृतिर्विकलाङ्गसंयुक्तो विकृतिरित्युच्यते । तत्र सप्तमेन प्रकृत्युपदिष्टानामङ्गानां विकृतावतिदेशो निर्णीतः । अष्टमे त्वाग्नेयोष्टाकपाल इत्यादिप्रकृत्युपदिष्टानामङ्गनां सौर्यं चरुं निर्वपेदित्यादिविकृतौ द्रव्यदेवतादिसामान्यद्वारेण विशेषातिदेशो निरूपितः । नवमे तु प्रकृत्युपदिष्टमन्त्रसामसंस्कारकर्मणां विकृतावतिदिष्टानां प्रकृतिविकृत्योर्द्रव्यदेवताभेदे सति प्रकृतिगतद्रव्यादिशब्दं विहाय विकृतिगतद्रव्यादिशब्दाध्याहारलक्षण ऊहो दर्शितः । यथाग्नये जुष्टमिति मन्त्रस्य विकृतौ सूर्याय जुष्टमिति पदप्रक्षेपः । दशमे तु विकृतावतिदिष्टानामङ्गानां *प्रकृतौ सावकाशानां विकृतिगतविशेषाङ्गोपदेशादिना बाधो दर्शितः । यथा प्रकृतेर्विकृतावतिदेशप्राप्तानां बर्हिषां शरमयं बर्हिरितिविकृतौ विशेषोपदेशेन बाधः । एकादशे त्वनेकशेषिविधिप्रयुक्तस्य शेषस्य सकृदनुष्ठानादेव सर्वशेषिणामुपकारसाम्यं तन्त्रं नामोक्तम् । यथाग्नेयो ऽष्टाकपाल उपांशुयाजमन्तरा यजत्यग्नीषोमीयमेकादशकपालमिति च पौर्णमासकर्मत्रयप्रयुक्तस्य

* विकृतौ सावकाशानामिति २ पु॰, प्रकृतौ साधकानामिति शोधितं १ पु॰ ॥

प्रयाजादेः सकृदनुष्ठानादेव शेषिचयेोपकार इति । द्वादशे त्वेकशेषिप्रयुक्तस्य शेषानुष्ठानस्याप्रयोजकसामर्थ्ययुक्तशेष्यन्तरेप्युपकारः प्रसङ्गो नाम दर्शितः । यथा पशुविधिप्रयुक्तानामङ्गानां पशुपुरोडाशेप्युपकारः । तदेवं प्रत्यग्न्यायमाशङ्कान्तरनिराकरणेन विद्वंशभेदो निरूपितः । तथा प्रतिपत्तव्यस्य ब्रह्मणः प्रत्यक्षादिभिरसिद्धत्वात्प्रतिपत्तिविध्ययोगाशङ्कायां तन्निराकरणायेदमारभ्यत इति । तचाहाभ्यधिकाशङ्काऽभावादिति । यूपाहवनीयादिवद् ब्रह्मणः सिद्धि- ४२ ३
रसिद्धौ * वारोपितरूपेणैवोपासनसिद्धिरित्यर्थः ॥

अथ पूर्ववादी सिद्धान्त्येकदेशीयान् दूषयितुं वेदान्तानां † विधिनिष्ठत्वमङ्गीकृत्यैव ‡ याभ्यधिकाशङ्का तन्निराकरणायैव तेषामारम्भप्रकारं दर्शयति अथ केचिदिति । ननु क्वचिदेव विधिश्रवणेपि तदाकाङ्क्षितानुबन्धसमर्पणेन व्यवहितमपि वेदान्तवाक्यजातं तदेकवाक्यतया संबध्यते किं सर्वत्र विधिश्रवणेनेत्याशङ्क्याह यत्रापि विधिः श्रूयत इति । तत्रापि विधेरनुपपत्तिरिति § भावः ॥ ननु भावकर्मणोर्विहितानामपि कृत्यप्रत्ययानां कृत्याश्चेति विधौ स्मरणात्तव्यप्रत्ययेन ज्ञानं विधीयत इति तत्राह तत्र यद्यपि कृत्या इति । ‖ तथापीह विधिर्न सम्भवतीत्यर्थः । ननु गन्तव्यमिति गमनविधानवज्ज्ञानं विधीयताम् । सत्यम् । युक्तं भावविषये तव्यप्रत्यये विधानमित्याह यो भावाभिधायीति । भाव इति धात्वर्थमात्रमुच्यते । तत्प्राधान्येन स्वतन्त्रफलाय विधातुं शक्यत इत्यर्थः । ननु कर्माभिधायितव्यप्रत्ययादपि धात्वर्थविषयो विधिरवगम्यते स्वाध्यायो ऽध्येतव्य इति तत्राह यत्र पुनः कर्म प्राधान्येनोच्यत इति । तत्रापि स्वतन्त्रफलाय वा कर्म ¶ विधीयते किं वा कर्मकारकगतफलायेति । न तावत्स्वतन्त्रफलायेत्याह तत्र द्रव्ये गुणभूतामिति । अथ कर्मकारकसमवायिफलाय विधिः तत्राह द्रव्यपरत्व इति । नन्वात्मनि विहितक्रियासामर्थ्यादज्ञानाधर्मादिम ** लापकर्षः संस्कारः स्यादिति नेत्याह संस्कृतश्चेति ॥ तत्र सक्तूञ्जुहोतीति क्रतु- ,, १२
प्रकरणे श्रवणात्क्रत्वङ्गता सक्तुहोमस्यावगता । तत्राङ्गानि च द्विविधानि अर्थ-

---

* वास्थाने चकारः १, ३ पु॰ ।
† विधिनिष्कर्षत्वमिति शोधितं २ पु॰ ।
‡ याधिकाशङ्का दर्शिता तन्निराकरणायेति १ पु॰ ।
§ भावइत्यस्य स्थाने शेष इति १ पु॰ ।
‖ तथापीह तु विधिरिति १ पु॰ ।
¶ विधीयतामिति ३ पु॰ ।
** मलापकर्षसंस्कारः स्यादिति ३ पु॰ ।

कर्माणि संस्कारकर्माणि च । क्रतूपकारकाण्यनाश्रित्य स्वातन्त्र्येण विहितानि प्रयाजादान्यर्थकर्माणि व्रीह्यादिकारकगुणभूतानि संस्कारकर्माणि । तत्र न तावत्सक्तुहोमस्यार्थकर्मता सक्तुद्रव्यस्य गुणभूतत्वात्प्रोक्षणादिवत् । संस्कारकर्म च द्विविधम् विनियुक्तसंस्कारो यथा व्रीहिभिर्यजेतेति विनियुक्तव्रीहीनुद्दिश्य प्रोक्षणादिसंस्कारः । कश्चिद्विनियोक्ष्यमाणसंस्कारो यथाऽऽहवनीये जुहोतीति विनियोक्ष्यमाणस्याधानेन संस्कारः । संस्कृतस्य विनियोग इत्यर्थः । तत्र होमेन भस्मीकृतानां सक्तूनामुभयथापि क्रतौ विनियोगाभावात् वैयर्थ्यायोगाच्च संस्कारकर्मत्वं परित्यज्य सक्तूनिति प्राधान्यं च विहाय सक्तुभिरिति गुणभावेन कर्मप्राधान्यमुपादायार्थकर्मता निरूपिता यथा । तथात्मानमिति साध्यतया प्राधान्यं विहायात्मनोपासीतेति गुणत्वोपगमेन स्वतन्त्रफलायो-

४२ १३ पासनं प्राधान्येन विधीयतामिति शङ्कते अथ पुनर्विपरीत इति । तत्र यथा होमप्राधान्येपि सकर्मकत्वाद्धातोः सक्तव एव कर्मकारकतया भस्मीक्रियन्ते एवमवगमस्यापि सकर्मकत्वादर्थतः कर्माभावेन विधानमिति परिहरति तत्रापि न ज्ञायत इति । शब्दतः करणत्वेप्यर्थतः कर्मतात्मन एवेत्याशङ्कते अथ ज्ञायत इति । तर्हि कर्मकारकत्वे सत्यात्मनि कश्चिदतिशयो वक्तव्यस्त-दभावान्निष्कर्म्मकं विज्ञानं न विधातुं शक्यत इत्याह एवं तर्हि तदेवायात-मिति । नन्ववभास्यतया ऽवाप्तिरात्मनि विधेयक्रियाफलमिति नेत्याह तच्च कृतकरणमनर्थकमिति । नित्यचैतन्येन प्रतीतितो ऽवाप्तत्वान्न ज्ञानकर्म तेत्यर्थः । * अपरे पुनरित्यतः प्राक्तनो ग्रन्थः स्पष्टार्थः । अविद्याधर्मादिनि-वृत्तिः संस्कारो न च संस्कृतस्यान्यत्र विनियोगाकाङ्क्षा स्वयंपुरुषार्थत्वादपुरुषा-र्थसंस्कारस्य च नियोगापेक्षत्वात्तदर्थमारभ्यत इति पृथगारम्भवादिनो मतम् ।

अपरे पुनरेवमारभन्त इत्यादेरयमर्थः । प्रतिपत्तिविध्यपेक्षितो ऽपि चतुर्विधो न्यायः प्रथमतन्त्रे निरूपितः । तत्र तद्विषयस्य ब्रह्मणो निरूप-णाय शास्त्रमारब्धव्यम् । तच्च न संभवति ब्रह्मणि प्रामाणाभावादिति ।

४३ ३ अत्रोच्यत इत्यतः प्राक्तनो ग्रन्थः स्पष्टार्थः । अधिकारनियोगविषयतयेति । अयमर्थः । ज्ञानस्य फलसम्बन्धो ऽवगम्यत तत्फलकामिना तदनुष्ठेयं नियो-गाच्चानुष्ठानमिति फलकामिनियोगविषयतया ऽवगमादिति भावः ।

---

* इत्यर्थ इत्यनन्तरम् अविद्याधर्मादि ३ पुस्तके अस्ति, मध्यपाठस्तु नास्ति ।

अवोच्यत इत्यादिनारम्भद्वयं पूर्ववादी निराचष्टे । यदि लोके कृत्य- ४३ ५
प्रत्ययो न नियोगं गमयतीति शङ्कते तन्नास्तीत्याह तत्स्वयमेवेति । * अथ
वेदे तत्राह प्रसिद्धं चैतदिति । अतः प्रथमसूत्रेणाध्ययनविधिमङ्गीकुर्वतां गत
एवायं विचार इत्यर्थः । ननु चतुर्विधस्येत्यादिरुक्तार्थः । करणत्वेपि चात्मन
एव कर्मकारकत्वे स्वतोऽपरोक्षतया नित्यसिद्धस्य विधेयक्रियाजन्यप्रतिभासा-
योगादकर्मत्वान्निष्कर्मकं ज्ञानं न विधातुं शक्यमित्युक्तमित्याह तदपि नेति ।
आत्मनि चतुर्विधफलाभावादकर्मत्वेपि कर्तृसमवायिमोक्षफलाय तदवभासिज्ञा-
नसन्ताननियमविधिः स्यात् यथा हिरण्यं बिभृयादिति पक्षे प्राप्तस्य निय-
मविधिरभ्युदयफलस्तद्वदित्याह सिद्धस्यैवेति । नन्ववस्थात्रयेपि ज्ञानसन्ता-
नाविच्छेदान्न नियमविधिरित्याह ननु † न विधानतोपीति । तर्ह्यनात्मप्रति-
भासनिवृत्तये परिसङ्ख्याविधिरदृष्टार्थः स्यादित्याह एवं तर्हीति । अतो गतार्थ-
त्वान्नाधिकाशङ्केति भावः । सत्यपि ज्ञानविधाने प्रयोजनाभावान्न शास्त्रा-
रम्भ इत्याह यत्पुनरात्मज्ञानादित्यादि ‡। नचानर्थनिवृत्तौ स्वयमहेतुरपि
ज्ञानसन्तानो विधानादनर्थं निवर्त्तयति विशेषाभावादित्यर्थः । तर्ह्यलौकि-
कात्मतत्त्वज्ञानमविद्यादिदोषनिवृत्तिफलं विधीयतामित्याशङ्कते अथ पुनरहंप्र-
त्ययावसेयादिति । न अत्यन्तमसिद्धमुद्दिश्य विधानानुपपत्तेरित्याह तदसत्
विधिर्हीति । यथा सामान्यप्रसिद्धं यागमुद्दिश्य पूर्वानुभूतयागव्यक्तिसदृशं व्य-
क्त्यन्तरं बुद्धिस्थमेव विधीयते एवमलौकिकात्म § ज्ञानं सामान्यतः प्रसिद्ध-
मुद्दिश्य पूर्वानुभूतज्ञानव्यक्तिसदृशं व्यक्त्यन्तरं बुद्धावाकलय्य तत्कर्त्तव्यतया
विधेयमित्यर्थः । ननु ज्ञानसामान्यस्य लोके सिद्धत्वात्तदुद्देशेन विधाने
तद्व्यक्तित्वेनालौकिकात्मज्ञानं कर्त्तव्यतया प्रतीयतामिति नेत्याह तद्यदि ,, १८
नाम ज्ञानमिति । तादृगात्मज्ञानस्य ज्ञानसामान्यव्यक्तित्वेनाप्रसिद्धत्वात्तादृशं
ज्ञानं कर्त्तव्यतया बुद्धावारोपयितुं ‖ न शक्यमित्यर्थः । अथ तादृगात्मज्ञानं
सिद्धम् किं स्वात्मनि पुरुषान्तरे वा । पुरुषान्तरे चेत् अन्यस्याधिकारिणस्तद-
प्रतिपत्तेर्न तादृशं व्यक्त्यन्तरं कर्त्तव्यतया बुद्धावारोपयितुं शक्यम् । अथ

---

* अथवेदमिति १ पु॰ । † नकारो नास्ति १ पु । ‡ इत्यादिनेति १ पु॰ ।
§ तत्त्वेत्यधिकं ३ पु॰ । ‖ नशब्दो नास्ति १ पु॰ ।

४३ २० स्वात्मनि तत्राह किं विधिनेति । यदपि मतान्तरमित्यादिरुक्तार्थः । तद्वि-चाराय ब्रह्मविचाराय शास्त्रारम्भ इत्यर्थः ।

अपरं मतमिति स एव प्रतिपत्तिविधिवादी स्वपक्षमुपपादयति । सत्यम् । कार्यपरादपि वेदाद् ब्रह्मणोपि प्रतिपत्तेर्युक्तः प्रतिपत्तिविधिरित्याह *ननु तावन्मात्र इति । ननु विरुद्धमिदम् अर्थान्तरपराच्छब्दादर्थान्तरप्रति-पत्तिरिति तत्राह तस्मिन्सतीति । विधिप्रमाणाद्विधिसंसृष्टतयान्येपि पदार्था-स्तदपेक्षिताः प्रमीयन्त इत्यर्थः । यथा रूपविषयस्य चक्षुषस्तत्संसर्गि सर्वं विषय इति दृष्टान्तमाह यथा रूपे सतीति । ननु द्रष्टव्य इत्यादिना नाप-रोक्षज्ञानं विधेयम् सुखसंवेदनतया स्वर्गादिवत्पुरुषार्थस्याविधेयत्वात् । नापि शाब्दज्ञानम् तत्र विधेरश्रवणादिति चोदयति कथमिति । अस्ति शाब्दज्ञाने विधानमित्याह उच्यत इति । नन्विदं वाक्यमात्मनोऽनात्मरूपताविधानपरम् अतोऽपुरुषार्थत्वान्न विधेयमिति नेत्याह न तावत्सर्वरूपतेति । प्रति-पन्नमुद्दिश्याप्रतिपन्नात्मरूपस्यैव विधानादित्यर्थः । दूषणान्तरमाह यदि सर्व-रूपतात्मन इति । किं तर्हि विधीयत इत्यत आह अतः सर्वस्येति । नेति-नेत्यादिवाक्यपर्यालोचनयाप्यनात्मोपमर्दनात्मैव विधेय इत्याह अनात्मस्वरू-पविलयनेनेति । नन्वात्मनोऽद्वितीयत्वप्रतिपादनपरमिदं वाक्यम् न तत्र ज्ञाने वस्तुनि वा विधिरवगम्यत इत्याह नन्वत्र विधिर्न श्रूयत इति । पूषा प्रपिष्टभाग इत्यादाविव कल्प्यतामित्याह कल्प्यतां तर्हीति । किं प्रतीते विध्यर्थे इत्यादेरयमर्थः । कालत्रयानवमृष्टेऽनुष्ठानयोग्ये कर्मणि शब्दसा-मर्थ्यात्प्रतिपन्ने † तदन्यथानुपपत्त्या च कर्त्तव्यरूपे नियोगेऽवगते विधायक-पदार्थे पश्चाद्विधिर्विधायकपदं कल्प्यते ‡ किंवा एवंविधार्थेऽप्रतिपन्नेऽन-नुष्ठेये § वस्तुमात्रे च प्रतिपन्ने विधिपदं कल्प्यत इति । प्रतीते चेत्प्रमितयेऽनु-

४४ ९ वादाय वा पदं कल्प्यते नानुवादेन प्रयोजनम् । प्रमितये चेत्तत्राह प्रतीते कल्प-नावैयर्थ्यमिति । प्रतिपादकतया लिङादिपदकल्पनावैयर्थ्यमित्यर्थः । अननुष्ठे-यवस्तुप्रतिपत्तौ विधिकल्पनाहेत्वभावान्न तत्र पदादनुष्ठेयप्रतिपत्तिरित्याह

---

* ननु तावन्मात्र इतीति २ पु॰ । † तदप्यर्थानुपपत्त्येति २ पु॰

‡ किंचैवंविधेर्थे इति २ पु॰ ।

§ अननुष्ठेयवस्तुमात्रे च प्रतिपन्न इति १ पु॰, अननुष्ठेये वस्तुमात्रत्वप्रतिपन्ने इति २ पु॰ ।

अथाप्रतीत इति । अर्थवादसंसर्गेष्वपि कल्पनाप्रसङ्गादिति भावः । ननु ४४ १०
विकल्पदूषणयोः सर्वत्राविशेषान्न क्वचिदपि विधिकल्पनमिति मन्वानश्चोद-
यति नन्वश्रूयमाण इति । तत्र द्रव्यदेवतासबन्धः कालत्रयानवमृष्टः प्रमी-
यमाणः स्वाविनाभूतं यागं गमयति यागश्च * स्वाविनाभूतनियोगमिति श्रुत-
सामर्थ्यादेव विध्यर्थः प्रतिपन्नः । तत्र व्यवहारमात्राय पूषोद्देशेन पिष्टद्रव्य-
त्यागः कर्त्तव्य इत्युपसंह्रियते न † तथेह श्रुतसामर्थ्याद्विध्यर्थः प्रतिपन्न
इत्याह सत्यम् युक्तं तत्रेति । नन्विहापि श्रुतस्यात्मनः सामर्थ्यान्नियोगः
प्रतिपन्न इत्याह नन्विहाप्यात्मपदमिति । ‡ न यागनियोगयोर्नियोगप्रतिपत्ता-
रमन्तरेणानुपपत्तिवत्प्रतिपत्तुर्न्नियोगमन्तरेणानुपपत्त्यभावादित्याह नैतत्सारम्
नियोगो हीति । ननु यः कश्चिद्वेदे संसर्गः प्रतिपन्नः स साक्षात्परम्परया
वा नियोगसंसृष्ट एव वायुर्वै क्षेपिष्ठेत्यादावपि परम्परया विधिसंसर्गाभ्यु-
पगमात् तत्र सर्वस्यात्मस्वभावताप्यविनाभावाद्विधिमुपस्थापयतीति तत्राह
अथापि भवतु नामेति । § भावार्थविषयत्वान्नियोगस्य नासौ भूतसंसर्गविषय
इति भावः । एवं तर्हि भावार्थोपि विधिविषयः संसर्गमात्रेणाविनाभूत इति
सोपि कल्प्यतामित्याह धातुनैव सह कल्प्यत इति सर्वधात्वर्थदोषविवक्षया
पृच्छति कोसाविति । प्रथमं सर्वधात्वर्थसामान्यातिलङ्घने कारणाभावात्
कृतिधातुमुपस्थापयति यदि तावत्कर्त्तव्यमिति तत्र दूषणमाह तत्रानात्म-
स्वभावतेति । प्रपञ्चविलयनेनैव ह्यात्मदर्शनमिति भावः । दूषणान्तरमाह
इतिकर्त्तव्यता ‖ चेति । शमादयस्तु ज्ञानेतिकर्त्तव्यं न प्रपञ्चविलयनेति-
कर्त्तव्यमित्यर्थः । धात्वन्तरमाह अथेति । दूषयत्येवमपीति । नहि योषिदा-
दिष्वग्न्यादिभावेन ज्ञायमानेषु योषिदादिभावो निवर्त्तते विधेयबुद्धेरप्रामाणि-
कत्वादिति भावः । उभयथापि धात्वर्थविधौ दूषणान्तरमाह अशक्यार्थोप-
देशश्चेति । ननु योषिदग्न्यादिषु मानसी क्रिया ज्ञानं तु विधीयमानमना-
त्मानं निवर्त्तयतीति तत्राह नहि वस्तु वस्त्वन्तरात्मनेति । तर्हि पुरुषस्व- ४५ १
रूपप्रविलयनेन स्थाणुनिश्चयप्रमाणवदऽनात्म ¶ प्रविलयेनात्मनो निश्चायकं

---

* स्वाविनाभूतं नियोगमिति ३ पु॰ । † यथेहेति २ पु॰ । ‡ नकारो नास्ति १ पु॰ ।
§ भावार्थः विषयत्वादिति १, २ पु॰ । ‖ चकारस्थाने वाकारः १ पु॰ ।
¶ प्रविलयनेनेति ३ पु॰ ।

४५ १ प्रमाणज्ञानमन्यतःप्राप्तमनूद्य विधिमात्रमङ्गीक्रियत इत्याह एवं तर्हि ज्ञातव्य इत्यादिना । तर्हि विधिवाक्यार्थ * मितिव्यतिरेकेण ब्रह्मसंवेदनस्यान्यतः प्राप्तस्यानुवादो वक्तव्य नच प्रमाणान्तरमस्तीत्याह कुतः प्राप्तेरिति । ननु विधायकपदव्यतिरिक्तेभ्यो वेदान्ताभिधानेभ्य इत्याह अभिधानत इति । तर्हि विधिनिमित्तप्रतिपत्तिमनपेक्ष्याभिधानप्रमाणादेव ब्रह्मसंवेदने सिद्धे न विधिना कृत्यमित्याह एवं तर्हि विधानमनर्थकमिति । ननु निष्पन्नेपि संवेदने पुनस्तादृशं व्यक्त्यन्तरं चोद्यते इत्याह पुनःकर्त्तव्यतयेति । ननु किं तेन कार्य्यं पूर्वेणैव प्रयोजनसिद्धेरिति तत्राह यथा मन्त्रेष्विति । अयमर्थः । मन्त्राः स्वाध्यायविधिनैवोपात्ता गृहीतपदपदार्थसम्बन्धस्य स्वार्थे प्रत्ययमुत्पाद्य व्यवस्थिताः स्वार्थस्याननुष्ठेयत्वाद् ब्राह्मणवाक्यैश्च प्रमितत्त्वात्प्रवृत्तिनिवृत्तिप्रयोजनशून्या व्यवतिष्ठन्ते । तत्रैन्द्र्या गार्हपत्यं बर्हिर्देवसदनं दामि इमा † मगृभ्णन् ‡ रशनामृतस्येत्यश्वाभिधानीमादत्त इत्यादिश्रुतिलिङ्गवाक्यादिभिर्व्रीह्यादिवत्कर्माङ्गभावेन विनियुक्ताः प्रधानापूर्वनिर्वृत्तिद्वारेण प्रयोजनवन्तो मन्त्रा इत्युच्यन्ते । तत्र मन्त्राः केनोपकारेणापूर्वसिद्धेरुपकुर्वन्तीति वीक्षायामध्ययनविधेरर्थज्ञानार्थत्वाद्दृष्टोपकारे सत्यऽदृष्टकल्पनानुपपत्तेस्तेष्वनुष्ठानकाले प्रतिपत्त्यपेक्षस्य द्रव्यदेवतादेः प्रतिपत्तिमुत्पाद्य तद्द्वारेणापूर्वस्योपकुर्वन्तीति कल्प्यते । ततश्च मन्त्रैरेवानुस्मृत्यानुष्ठाने ऽपूर्वसिद्धिर्न ब्राह्मणवाक्यैरिति गम्यते । तत्र प्रयोगविधिरङ्गैरपूर्वोपकारं कारयन्मन्त्रैरर्थज्ञानं कारयतीति । तत्र यथा प्रयोगवचनो मन्त्रैः प्रथमोत्पन्नज्ञानातिरिक्तमपूर्वोपकारि ज्ञानान्तरमनुष्ठापयति एवं ब्रह्मसंवेदनमपरमनुष्ठीयते मोक्षफलायेति । ननु युक्तं तत्र स्वार्थे प्रत्ययमुत्पाद्य निवृत्तानां मन्त्राणां श्रुत्यादिविनियोगसामर्थ्यात्प्रयोगवचनेन ज्ञानस्य पुनःकर्त्तव्यत्वम् नचात्मज्ञाने प्रयोगवचनो ऽस्तीत्याह प्रयोगवचनस्तत्र विधायक इति । इहापि तर्हि स सम्पाद्यत इत्याह

,, ५ पूर्ववादी इहापि प्रयोगवचनो विधायक इति । कथम् । वेदान्तवाक्यैरात्मज्ञानं कुर्य्यादिति वेदान्तशब्दकरणविशिष्टोत्पत्तिविधिस्तावदध्याहृतः सोमेन यजेतेतिवत् । स च विधिः कथं ज्ञानं कर्त्तव्यमितीति कर्त्तव्यताभेदमीक्षमाणः

* प्रमितीति १ पु० । † अगृभ्णं रशनामिति १ पु० ।
‡ रशनामिति दन्त्यघटितः ३ पु० ।

प्रकरणपठित * शमादिविधीन् फलवदात्मज्ञानविधिसन्निहितानितिकर्त्तव्यतात्वेन विनियोजयन्विनियोगविधिः सम्पद्यते । पुनश्च साङ्गे कर्मणि नियोज्यमधिकारिणं ममेदं कर्त्तव्यमिति प्रतिपत्तारमाकाङ्क्षन्नर्थवादगतं मोक्षं रात्रिसत्रन्यायेनोपसंहृत्य मोक्षकामो वेदान्तवाक्यकरणैः शमादीतिकर्त्तव्यतानुगृहीतैरात्मज्ञानं कुर्यादिति स एव विनियोगविधिरधिकारविधिः सम्पद्यते । पुनः स एव साङ्गं तत्त्वज्ञानम † धिकारिणमनुष्ठापयन्प्रयोगविधिः सम्पद्यत इति । पुनश्च सिद्धान्तो मन्त्रेभ्यो वेदान्तानां वैलक्षण्यमाह ननु मन्त्रेष्विति । प्रत्ययपरत्वमिति । अपूर्वोपकारिप्रत्ययमात्रे मन्त्राणां तात्पर्यं नार्थतथात्व इत्यर्थः । तत्र वेदान्तानां स्वार्थविधिपरत्वं प्रयोजनवदज्ञातार्थावगन्तृत्वादिति । तत्र विधेयप्रत्ययसमर्पणेन विधिपरत्वमज्ञातार्थपरत्वं चोभयं न विरुद्धमित्याह अन्यार्थमपि प्रकृतमिति । ननु स्थायिपदार्थानां क्रमेण वा युगपद्वा ऽनेकानि कार्याणि सम्भवति । शब्दस्य तु तात्पर्यात्सकृत्कार्यहेतोः कथमुभयपरत्वमिति तत्राह यथा वा पदार्थानामिति । सिद्धान्ती ब्रह्मण्याऽऽभिधानिकप्रथमप्रत्ययोपगमेनैव पुरुषार्थसिद्धेर्न मन्त्रेष्विव विधिशेषतया द्वितीयप्रत्ययायोत्पत्तिविनियोगाधिकारप्रयोगविधिकल्पन ‡ मपेक्ष्यत इति दर्शयितुं मन्त्रेभ्यो वैलक्षण्यमाह तदेतदनिरूपितमिवेति । विधिविषयसमर्पणेन विधिप्रमितिशेषस्य योषिदग्न्यादिवाक्यस्य तज्जन्यज्ञानस्य वा प्रमेयपरत्वादर्शनादिति वाक्यशेषः । ननु § तत्र लौकिकप्रमाणगम्यत्वात्प्रमेयस्य तत्परत्वाभावः इह तु विधिब्रह्मणोरलौकिकत्वादुभयपरत्वं स्यादिति नेत्याह न युगपदुभयमिति । ज्ञानं प्रति ब्रह्मणः प्रमेयतया प्राधान्यम् विधेयज्ञानविशेषणतया गुणभावः प्रमेयत्वादुपादेयताविधिं प्रत्युद्देश्यता प्रमेयत्वाद्विधेयता विधानायानुवाद्यता ‖ चेति ब्रह्मणः स्वज्ञानस्य विधिविषयतया तत्प्रमितिशेषत्वे ¶ च प्राधान्योपादेयत्वप्रमेयत्वानि तद्विरुद्धगुणत्वोद्देश्यत्वानुवाद्यत्वानि चैकस्यां शब्दजन्यप्रमितौ प्रसज्यन्ते तदिदं वैरूप्यम् । ननु प्रथम-

४५ ६

,, १०

* शमादीन्फलवदिति ३ पु ।

† अधिकारिणा ऽनुष्ठापयन्निति पूर्वमभूत्, तत्स्थाने अधिकारिणमनुष्ठापयन्निति शोधितं ३ पु० । ‡ अपेक्षत इति १ पु० । § तत्रेति नास्ति २ पु० ।

‖ चकारस्थाने वाकारः २ पु० । ¶ सकृज्ज्ञातस्याऽप्राधान्येति १ पु० ।

ज्ञानमर्थपरं द्वितीयज्ञानं विधिविषयतया तत्परमित्यविरोधः किं न स्यात् । न । शब्दस्योभयपरत्वाभावे तज्जन्यज्ञानस्यासकृज्जनितस्याप्युभयपरत्वानुपपत्तेः । ननु वैरूप्यप्रसङ्गो न दोषमावहति अन्यथागुणकर्मविधानानुपपत्तेरिति

४५ १९ चोदयति नन्वेवं सति गुणकर्मणामिति । क्रत्वङ्गभूतकारकसंस्कारार्थानि कर्माणि । तत्र क्रियाजन्यातिशयविशिष्टमेव कर्मकारकं कारकविभक्त्यभिधेयमित्यङ्गीकृत्य वैरूप्यमुच्यते । व्रीहीणां तावत्प्रमाणान्तरसिद्धत्वात्कारकत्वाच्चानुवाद्यत्वगुणत्वोद्देश्यत्वानि सिद्धानि विधेयप्रोक्षणजन्यातिशयवत्तया साध्यत्वादुपादेयत्वप्राधान्यविधेयत्वानि विभक्तिसामर्थ्यात्प्रतीयन्त इत्येकस्यां प्रमितौ गुणकर्मसु वैरूप्यमिति । तत्र न क्रियाजन्यातिशयो वैभक्तिकः किन्तु तदर्थक्रियाविध्यनुपपत्तिगम्यः । अतः शाब्दज्ञाने गुणत्वोद्देश्यत्वानुवाद्यत्वान्येव प्रतीयन्ते । प्राधान्यप्रमेयत्वोपादेयत्वानि त्वर्थापत्तिप्रमित्यन्तरेऽवभासन्त इति । ज्ञानभेदान्न वैरूप्यदोष इति परिहरति न निराकृतं स्यादिति । इहापि तर्हि ब्रह्मज्ञानविधेयज्ञानयोर्भेदाद्विरुद्धत्रिकस्य व्यवस्थयावभास इति नेत्याह यत्र पुनः प्रमाणान्तरादिति । नन्विहापि ज्ञानद्वयमेवेष्यतां कस्तर्हि सामग्रीभेदः । नचैकसामग्रीजन्यज्ञानसहस्रस्यापि प्रमेयभेदः सम्भवति । अस्तु तर्हि विधायकपदव्यतिरिक्तपदसमुदायस्य पृथगेव ब्रह्मस्वरूपं प्रतिपाद्य पुनस्तदनुवादज्ञानं जनयित्वा तस्य विधिविषयत्वसमर्पणेन पुनर्विधायकपदेन पदैकवाक्यतेति नेत्याह न स एव समन्वय इति । ननु तर्हि विधिपदेन यानि पदैकवाक्यभूतानि तद्व्यतिरिक्तपदानां पृथगन्वयेन ब्रह्मप्रतिपत्तिशेषतेत्याशङ्कते अथार्थवादपदानामिवेति । एवं तर्हि न ब्रह्मवाक्यस्य विधिवाक्यशेषता नाप्यर्थवादतेत्याह तदसत् युक्तमर्थवादपदानीति । नन्विहापि भूतार्थत्वादर्थवादजन्यज्ञानवद्विधिशेषतेति नेत्याह इह पुनरपरामृष्ट इति । प्रयोजनपर्यन्तत्वाय विधिशेषता न भूतत्वनिमित्तेति भावः । यद्यपि शाब्दज्ञानादग्रहणं निवर्तते तथापि मिथ्याज्ञानतत्संस्काराविद्यानिवृत्तिरपरोक्षानुभवात् तस्य च शाब्दज्ञानादनुत्पद्यमानफलस्य सिद्धये ज्ञानं विधीयत इत्याशङ्कते अथ पुनः शाब्दज्ञानादिति । तर्हि विधीयमा-

४६ ८ नज्ञानस्य व्रीह्यादिवत्करणकारकं वक्तव्यम् तन्न सम्भवतीत्याह किं तज्ज्ञानमिति । ननु प्रत्यक्षादानामपरोक्षज्ञानसाधनत्वं प्रसिद्धमिति । न । पूर्व-

ज्ञानवदऽतत्फलत्वप्रसङ्गादित्याह शाब्दं चेति । ननु विधीयमानं शाब्दं ४६ ९
ज्ञानमिति । किं तज्ज्ञान विधीयमानतया परोक्षफलं प्राथमिकज्ञानं तत्स-
न्तानो वा । न तावत्प्राथमिकमित्याह तदयुक्तं यत्तावदिति । उभयपरत्वे
वैरूप्यस्य दर्शितत्वादिति वाक्यशेषः । ननु प्रथमज्ञानेना ऽवगते ब्रह्मणि
तदुद्देशेन प्रत्ययसन्तानो विधीयतां तत्संस्कारप्रचयादपरोक्षसिद्धेरिति शङ्कते
अथ पुनस्तदेव ज्ञानमिति । किमुपासनविधिसामर्थ्यादिदमवगतं किं वा-
त्मन्येवात्मानं पश्येदितिदर्शनविधानसामर्थ्यादिति । न तावदुपासने विधिः
श्रूयते आत्मेत्येवोपासीत आत्मानमेव लोकमुपासीत तमेव धीरो विज्ञा-
येत्यादेः स्वभावसिद्धप्रत्ययोपादानेनालौकिकात्मविषयप्रतिपादनपरत्वात् एव-
कारविशेषणश्रवणात् वाक्यस्य विशेषणपरत्वात् उभयप्रतिपादने वाक्यभेदात्
निदिध्यासितव्य इति चात्मप्रतिपादनपरे * वाक्यभेदाभावाय स्तुतिपरत्वात् ।
अथ दर्शनविधिसामर्थ्यादिति नेत्याह तत्कथं लभ्यते उपास्तिध्यायत्यो-
रिति । ननु ज्ञानस्य सर्वत्र प्रवाहेणाविनाभावाज्ज्ञानविधानेन सन्तान-
विधिर्लक्ष्यत इति नेत्याह नापि ज्ञानेनैवेति । अथापि कथञ्चिदुपासनवि-
धानं कल्प्येत निदिध्यासनविधेः । तथाप्यपरोक्षफलस्याहेतुत्वादुपासनस्य
न शाब्दज्ञानाद्विशेष इत्याह नाप्यभ्यासादिति । अभ्यासस्याप्रमाणत्वाद्वि-
षयस्यासम्प्रयुक्तत्वाच्च न वस्त्वापरोक्ष्यमभ्यासात्किन्तु मिथ्यापरोक्ष्यमित्यर्थः ।
ननु ततस्तु तं पश्यते निष्कलं ध्यायमान इति ध्यानमपरोक्षफलं श्रूयते ।
सत्यम् । एकत्र चित्तस्य समवधानता तदैकाग्र्यनिमित्तं भवति । तदेका-
ग्रचेतसा सहकारिणा शब्द एवौपनिषदमिति तद्धितप्रत्ययसामर्थ्यादपरोक्ष-
ज्ञानमुत्पादयति ध्यायमानो ज्ञानप्रसादेन पश्यतीति वाक्यस्यान्वयात् चित्तै-
काग्र्यस्य सूक्ष्मवस्तुदर्शननिमित्तत्वात् दृष्टेनैवोपकारसिद्धावऽदृष्टकल्पनायो-
गात् । आपरोक्ष्यकामस्योपासनायां स्वयंप्रवृत्तेरदृष्टार्थत्वाच्च निदिध्यासनवि-
धानस्येत्युक्तं तदेतदाह नापि श्रूयत इति । दृष्टसामर्थ्यानुवादत्वाद्वाक्यस्य
विधिर्न श्रूयत इत्यर्थः । नन्वैकाग्र्यद्वारेणापरोक्ष्यनिमित्तत्वाद्दृष्टद्वारेणापि
प्रवर्त्ततामिति चोदयति ननु किमत्र श्रवणेनेति । परिहारग्रन्थः स्पष्टार्थः । ,, १७
अतो ज्ञानद्वयाभावादेकस्य ज्ञानस्योभयार्थतायोगान्न ब्रह्मज्ञानं विधेयमिति

* वाक्ये-इति अधिकं ३ पु० ।

४६ १९ भाव: । यत्पुनरिति स्पष्टार्थ: । न स्थायिवस्तुदृष्टान्तेन तात्पर्य्यसापेक्षशब्द-व्यापारनिर्णय इत्याह युक्तं तच्चेति । ननु समिधो यजति * तनूनपातं यजति † इडो यजति बर्हिर्यजति स्वाहाकारं यजतीति पञ्च वाक्यानि पञ्च पदार्थान्विधाय तेषां क्रममपि विदधति । अत: शब्दस्यैव क्रैयर्थ्यमित्युक्त-मनुवदति यदपीदमुक्तमिति । पदार्था एव शब्दगम्या: क्रमस्त्वर्थापत्तिगम्यो न शब्दगम्य इति परिहरति यत्तावत्प्रत्येकमिति । ये तावदित्यर्थ: । तेषामेव न क्रमस्य विधानमित्यध्याहार: । किं पदार्थेभ्यो ऽर्थान्तरभूतस्य क्रमस्य वाक्यै: प्रतिपादनमुच्यते किं वा पदार्थमात्रस्यैव क्रमस्य प्रतिपाद-नमिति । न तावदुत्तर: कल्प इत्याह नापि ते क्रमशब्दाभिधेया इति । ननु विहितमङ्गं भवति अङ्गं च प्रयुङ्क्ते प्रयोगविधि: । अत: प्रयोगवचनप्रयोज्य-त्वात् क्रमस्यापि विधेयत्वे वाक्येभ्य एवापदार्थस्यापि क्रमस्य विधिरेष्टव्य इति नेत्याह प्रयोगवचनोपीति । विहितस्यैव प्रयोज्यत्वात्पदार्थानामेव विहितत्वादित्यर्थ: । अन्यथा विहिते प्रयोगविधि: प्रयोगविधौ च विधि-कल्पनेतीतरेतराश्रयात् । ननु पदार्था एव क्रम: तस्मात्पदार्थान्प्रयुञ्जान: क्रममपि प्रयुङ्क्ते इति नेत्याह न ते क्रम इत्युक्तमिति । अपर आह । न क्रमो नाम कश्चिदस्ति एकैकस्मिन् पदार्थे ऽदर्शनात् अनेकपदार्थाश्रयत्वे पदा-र्थयौगपद्यात्क्रमायोगात् अयौगपद्ये चोभयाश्रयधर्म्मायोगादिति तत्राह न च क्रमो नामेति । ननु संयोगवदुभयाश्रयत्वे पदार्थयौगपद्यमित्युक्तम् तत्राह तच्च क्रमो नाम वस्तुभूत इति । क्रमत्वादेव न यौगपद्यापेक्षेति भाव: । ननु देशकालवस्तूपाधिपरामर्शमन्तरेण क्रमो न दृश्यत इति तदाह ‡ तवेति । नन्वनुष्ठेयपदार्थानामनिष्पन्नस्वभावत्वान्न देशकालवस्तुक्रम इति तत्राह स्मृतिविज्ञानमेवेति । पाठक्रम एव स्मर्य्यमाणो ऽनुष्ठेयपदार्थेषूपरज्यत इत्यर्थ: । सर्वथेत्युपसंहार: । ननु क्रमस्य विधायकं वक्तव्यम् । न । क्रम-स्याविधेयत्वात् । किंत्वनुष्ठेयविशेषणतया § प्रमीयते क्रम: न विधीयते ऽन-नुष्ठेयत्वात् । केन तर्हि प्रमीयते । एकस्यानेकपदार्थप्रयोगानुपपत्त्येत्याह

४७ ६ तत्त्वैकत्वात्कर्त्तुरिति । सन्निहितं चेति । अर्थक्रमाभावे पाठक्रम इत्यर्थ: ।

---

* तनूनपाते यजति–इति १ पु·
† इडां यजतीति क्वचित्पाठः ।
‡ तत्र वेति ३ पु· ।
§ प्रतीयत इति ३ पु· ।

तस्मात्सर्वत्र प्रमाणद्वयेनैव प्रमेयद्वयसिद्धिरिति प्रकरणार्थः । न तथेह ज्ञान- ४१ १
द्वयमित्यारभ्य वेदो गमयतीति पर्यन्तः स्पष्टार्थः । प्रतिवस्तुसंप्रयोगं निरपेक्ष-
मेव प्रमाणं चक्षुर्न तथा प्रतिपदार्थं प्रमाणं शब्दः किन्तु यत्र तात्पर्यं तत्र
सम्भूयैव प्रमाणमित्याह युक्तं तत्र यद्यदवबोधयतीति । नन्वाभिधानिकमा-
त्मतत्त्वज्ञानं प्रमेयपरमेव मा भूत् किन्तु विधिविषयतया विधायकपदज-
न्यविधिप्रमितिविषयत्वेन विधिशेष इत्याह मा भूदिति । कथं तर्हि ब्रह्मा-
त्मसिद्धिरिति तत्राह तस्मिन्विहितेऽर्थादिति । ननु कस्यानुपपत्त्या तत्त्व-
सिद्धिरिति तदाह सविषयत्वादिति । अवगमविध्यन्यथानुपपत्त्यैवेत्यर्थः ।
परिहरति एवमप्यविवक्षितोऽर्थ इति । एकस्मिन्विषये *प्रथमप्रतिपत्तिरप्रमाणम् ।
तस्मिन्नेव द्वितीयज्ञानं प्रमाणमिति श्रुतिश्च न प्रमाणं श्रुत्यर्थापत्तिश्च प्रमा-
† णमित्यादि विरुद्धमित्यर्थः । किञ्चावगमविधानानुपपत्तिर्नावगम्यस्य वस्तुत्वं
गमयतीत्याह नच नियोगत इति । ननु ज्ञानस्य स्वतःप्रामाण्यात्तथा-
भूतार्थतैव युक्ता अन्यथा ऽऽरोपितज्ञानस्य विधौ प्रयोजनाभावादिति
तत्राह ‡ भवन्ति हि परिकल्पितविषया इति । आभिधानिकप्रत्ययस्य विधि-
संसर्गात्प्रागपि स्वतःप्रामाण्यं किं न स्यादिति भावः । ननु विधेयज्ञानस्यापि
§ स्वविषयप्रमितिरेव दृष्टं फलम् तत्परित्यज्यारोपितविषयत्वे ऽदृष्टकल्पना स्या-
दिति तत्राह एतदेवात्र युक्तमिति । सकलप्रमाणविरोधेन दृष्टकल्पनाददृष्टक-
ल्पनमेव युक्तमित्यर्थः । तस्मात्कार्यनिष्ठो वेद इति अनारम्भवादी ‖ सिद्धान्तैक-
देशीयदूषणमुपसंहरति । ननु वेदान्तानां धर्मब्रह्मविषयत्वाभावे ऽध्ययनविध्यु-
पात्तानामानर्थक्यं स्यादिति नेत्याह एवं च सत्य ऽयमात्मा ब्रह्मेत्यादिना । ११ २३

तत्रात्मनो वेदान्तसङ्कीर्तितसमस्तगुणविशिष्टस्योपासनोत्पत्तिविधौ
शमादीतिकर्तव्योपसंहारेण विनियोगविधौ मोक्षकामनियोज्यसम्बन्धितया
चाधिकारविधौ साङ्गे कर्मण्यधिकारिणोऽनुष्ठापकतया च प्रयोगविधौ वेदान्ताः
पर्यवस्यन्ति तच्च सर्वं निरूपितमिति । अत्र किं शब्दानां कार्यान्वितस्वार्था-
वबोधसामर्थ्यात् ¶ सर्वो वेदः कार्यपरतया निरूपित इत्युच्यते किं वा सूत्र-
काराद्यभियुक्तवचनसामर्थ्यादिति । न तावत्प्रथमः ** कल्पः समन्वयसूत्रे तस्य

* विषयेऽपि प्रथमेति १ पु० । † इत्यादीत्यस्य स्थाने इत्याहेति १ पु० ।
‡ संभवन्ति हीति १ पु० । § स्वविषयत्वप्रमितीति १ पु ।
‖ सिद्धान्त्येकदेशीति १ पु० । ¶ सर्वोवेद इति नास्ति १ पु० । ** कल्प इति नास्ति १ पु० ।

निराकरिष्यमाणत्वात् । अभियुक्तवचनसामर्थ्याच्चेत्याह स्यादेतदेवं यदि

४८ २ सर्व एव वेदार्थ इति । ननु धर्मस्यैवोपक्रान्तत्वेपि * प्रासङ्गिकत्वेनेदं ब्रह्म निरूपितमिति नेत्याह विचारितश्चेति । कथमवगम्यते न वेदार्थोपाधो विचारः प्रवृत्त इति सूत्रभाष्यवार्त्तिककारवचनसामर्थ्यादित्याह यावता

" ३ कार्य्यनिष्ठ एवेति ।

अत्रायमाशयः । अथातो धर्म्मजिज्ञासा धर्ममीमांसाशास्त्रं विषयः । तत्किमारम्भणीयं न वेति विचारः । नारम्भणीयमिति पूर्वः पक्षः विचार्य्यमाणार्थनिर्णये प्रत्यक्षादीना † मसाधनत्वात् । आम्नायस्य चाध्ययनविधिना ऽदृष्टार्थतया विनियोगात् तदर्थमध्ययनविधिः अदृष्टार्थो दृष्टार्थो वेति विचार्य्यते । दृष्टसाधने विधेरयोगाददृष्टनियमा‡द्विधिरदृष्टार्थ इति प्राप्तम् । ननु स्वाध्यायो ऽध्ययनक्रियाकर्मतया ऽवगम्यमानः संस्कार्य्यो वाऽऽप्यो वेति दृष्टसम्भवे कथमदृष्टार्थता सम्भवेत् । § न । संस्कृतस्य क्रत्वन्तरे विनियोजकप्रमाणाभावात् । अवाप्तस्य च निष्फलत्वात् । नन्ववाप्तादाम्नायात्फलवदर्थावबोधे दृष्टफले नाऽदृष्टं कल्पयितुं शक्यते । न । दृष्टफलसाधने ‖ ऽन्यत एव प्रवृत्तेर्विधिवैयर्थ्यप्रसङ्गात् । ननु कर्मकारकप्रधानस्याध्ययनस्य कथं स्वतन्त्रादृष्टफलत्वं कल्प्येत न कर्मकारकस्य वैफल्यात्सक्तुन्यायेन स्वाध्यायेनाधीयीतेति वैपरीत्यकल्पनात् । ननु न श्रूयते फलमध्ययनस्यार्थवादेपि । तन्न । जपाध्ययनफलस्य घृतकुल्यादेरध्ययनत्वसामान्येन प्रथमाध्ययनेप्यतिदिश्य रात्रिसत्रन्यायेन घृतकुल्यादिकामः स्वाध्यायेनाधीयीतेति फलविपरिणामात् । संस्कारकर्मत्वाभावाच्च न फलश्रुतेरर्थवादता । नन्वदृष्टार्थत्वेपि स्वाभाविकस्यार्थावबोधसामर्थ्यस्य का हानिः । न । विषनिर्हरणादिकार्यान्तरे विनियुक्तानां मन्त्राणामर्थविवक्षाप्रतिबन्धदर्शनात् । तस्मादाम्नायस्यार्थविवक्षाभावात्प्रत्यक्षाद्यविषयत्वात्प्रमाणानुग्राहकत्वाच्च विचारस्य निरालम्बनो धर्मविचारो नारब्धव्य इति प्राप्तम् । आरम्भणीय एवायं विचार इति सिद्धान्तः । तस्य स्वाध्यायाध्ययनविधिप्रमितकर्त्तव्यत्वात् ।

---

* प्रासङ्गिकत्वेनैव ब्रह्मणि रूपितमिति १ पु० । † असाधकत्वादिति ३ पु० ।
‡ विधेरिति १ पु० । § नशब्दो नास्ति १ पु० । ‖ नशब्दोऽधिकः १ पु० ।

ननु निरालम्बनत्वमुक्तम् । न । आम्नायस्यालम्बनत्वात् । नन्वदृष्टार्थो ऽसौ दर्शितः । न । अध्ययनस्य कर्मकारकप्रधानत्वात्स्वतन्त्रादृष्टार्थत्वायोगात् । ननु कर्मकारके न किञ्चित्प्रयोजनमस्ति इत्युक्तम् । न । उभयस्याप्युपपत्तेः । अध्ययनेन दृष्टद्वारेण ऽऽप्यते * साङ्गाध्ययनविधिसामर्थ्यात् संस्क्रियते च स्वाध्याय इति । ननु † संस्कृतस्य विनियोगाभाव उक्तः । न । क्रतुविध्युपादानप्रमाणादेव विनियोगसिद्धेः । क्रतुविधिर्हि स्वविषयावबोधमाकाङ्क्षमाणस्तस्य जनकतया संस्कृतं स्वाध्यायमुपादत्ते । ननूपादानप्रमाणं ज्ञानस्य जनकतया स्वाध्यायमात्रमादत्ते न संस्कारमिति । सत्यम् । अध्ययनविधिसामर्थ्यादेव संस्कृतस्वाध्यायजन्यविशिष्टज्ञानवतैवानुष्ठितो यागो ऽपूर्वं जनयतीति कल्प्यते । अतः स्वाध्यायविधिसामर्थ्यमीक्षमाणः क्रतुविधिः स्वविषयज्ञानजनकतया संस्कृतस्वाध्यायमुपादत्ते । ननु स्वतन्त्रादृष्टं ‡ कल्प्यतामित्युक्तम् । न । दृष्टार्थाक्षरस्वीकरणतज्जन्यज्ञानादिसमवाय्यदृष्टसम्पत्तौ श्रुतविरोधेन कारकवैपरीत्यमादाय स्वतन्त्रादृष्टकल्पनानुपपत्तेः आधानवद ऽनङ्गस्याप्यध्ययनस्य क्रतूपकारित्वं न विरुध्यते । ननु तव्यप्रत्ययेन प्रकृत्यर्थोपरक्तमपूर्वमेव स्वतन्त्रमभिधीयते । तच्चापूर्वाभिधानेपि भिन्नपदोपात्तप्रकृत्यर्थोपरक्तापूर्वाभिधानाद्दूरमेकपदोपात्तकर्म्मकारकगतापूर्वाभिधानम् । भावार्थजन्यमपूर्वं न द्रव्यादिजन्यमित्येतावत् समवायस्तु यत्र क्वापि संभवति । अदृष्टार्थतया च स्वाध्यायस्यार्थविवक्षाऽभावेध्ययनविधिवाक्यस्याप्यर्थविवक्षाभावात् अदृष्टार्थतया ऽध्ययनविधानमेव न स्यात् । तस्मात्साङ्गाध्ययनविधिप्रयुक्तादृष्टस्य स्वसमवायितया ऽक्षरग्रहणार्थावबोधक्रतुप्रवृत्त्यादिदृष्टफलसापेक्षत्वात् स्वाध्यायस्य स्वभावनिमित्तार्थावबोधप्रतिबन्धकताभावाद्विवक्षितार्थमाम्नाय § मवलम्ब्य धर्मविचारः कर्त्तव्य इति । तदेवमर्थविवक्षाधर्मविचारावसरप्रदर्शनपरे शास्त्रारम्भे न सर्ववेदार्थविचारसिद्धिरिति प्रारभ्यमाणविचारो धर्मविषयो न वेदार्थमात्रविषय इत्युपपादयति ‖ तथाहि ४८ ४ शास्त्रारम्भ इति ।

ननु वेदवाक्यानि विचारयेदित्यादिभाष्य ¶ लिङ्गाद्वेदार्थमात्रविचारा-

* साङ्गाध्यायाध्ययनेति १ पु॰ । † संस्कृत्यविनीति १ पु॰ । ‡ कल्प्यमिति ३ पु॰ ।
§ आलम्ब्येति २ पु॰ । ‖ तथा च शास्त्रेति १, ३ पु॰ ।
¶ लिङ्गादित्यस्य स्थाने लिखनादित्युपकल्पितम् २ पु॰ ।

रम्भो ऽवगम्यत इति शङ्कते कथमिति । * सामान्यसिद्धिविशेषविप्रतिपत्त्योर्भा- ष्यकारेण धर्म्मे प्रदर्शितत्वात्स एव † विचार्यत इत्याह धर्मो नाम कश्चि- त्साधयितुरिति । एवं विषयविप्रतिपत्ती दर्शयित्वा धर्मविषय एव पूर्वपक्षप्राप्तिं दर्शयतीत्याह तत्राग्निहोत्रादिलक्षण एवेति । ‡ न कारः पूर्वपरयोः संब- ४८ ११ ध्यते । एवमाशङ्कित इत्यतः प्राक्तनो § ग्रन्थस्स्पष्टार्थः ।

एवमाशङ्किते शास्त्रारम्भे सिद्धान्तसूत्रं तत्प्रतिपाद्यार्थकथनेनावतार- यति धर्माय वेदवाक्यानीति । ‖ यस्याम्नायस्यार्थविवक्षा तस्यैव विचारावसर- श्चेति तदर्थविवक्षाविचारावसरौ । विवक्षाविचारावसरधर्मविचारात्सूत्रार्थान् सूत्रयोजनया दर्शयति वेदमधीत्यानन्तरमिति । ततः किमायातमित्यत आह एवं स्थित इति । किं तत्र विवक्षितं गम्यत इति तदाह किंतु धर्मातिरिक्त इति । अयमर्थः । वेदस्यार्थविवक्षाप्रदर्शनेन वेदार्थविचारः कर्तव्य इति ¶ वक्तव्ये धर्मग्रहणं कुर्वन्मा भूत्सर्ववेदार्थविचारप्रतिज्ञा किंत्वेकदेशविचारो ऽयमिति मन्यते सूत्रकार इति गम्यते । नन्वथातःशब्दाभ्यां स्वाध्यायस्य पूर्वनिर्वृत्त- तया **विचारहेतुत्वमुच्यते । स्वाध्यायो हि स्वार्थविचारहेतुर्भवति न धर्म- विचारहेतुः अतो ऽथातःशब्दविरोधान्न धर्मविचारः प्रतिज्ञातुं शक्यत इति चोदयति †† तत्कथं यत्तावदिदमिति । सामान्यविशेषाभ्यां विचार्यमाणप्र- धानाभिधायिधर्मपदग्रहणसामर्थ्यात् ‡‡ तस्यैव विप्रतिपत्त्या पुरुषार्थसाधनतया च §§ जिज्ञासितत्वात् । प्रामाण्यप्रतिपादनात्प्राग्वेदार्थे सामान्यप्रतिपत्तिविशेषवि- प्रतिपत्तिपुरुषार्थसाधनत्वादीनामनवगमाज्जिज्ञासितत्वायोगाद् धर्म एव विचा- र्यत इत्याह उच्यते धर्मो नामेत्यादिना । ‖‖ तत्र धर्मे जिज्ञासायोग्यत्वप्रदर्श- नेन वेदार्थे तदभावं विवक्षति लोकप्रवादादिति । ननु धर्मविचारे स्वाध्या- यस्य पूर्वनिर्वृत्ततया हेतुत्वमर्थविवक्षायाः प्रदर्शनं चानुपयोगीत्युक्तम् । सत्यम् । अग्निहोत्रादेरपि धर्मस्कन्धत्वा¶¶ट्टैवगत्या च धर्मत्वादुपयोग इत्याह अग्निहोत्रादिरपि वेदार्थे इति । यत इति विप्रतिपत्तिस्कन्धत्वादित्यर्थः ।

---

* सामान्यप्रसिद्धीति १ पु॰ ।
† विचार्य इत्याहेति १ पु॰ ।
‡ नकारस्तु पूर्वापरयोरिति १ ।
§ ग्रन्थ इति २ पु॰ ।
‖ तस्येति १ पु॰ ।
¶ वक्तव्यमिति १, २ पु॰ ।
** विचारहेतुरुच्यत इति १ पु॰ ।
†† तत्स्थाने 'नन्विति'—इति १ पु॰ ।
‡‡ तस्य चेति १ पु॰ ।
§§ जिज्ञासितत्वाप्रामाण्येति १ पु॰ ।
‖‖ अत्र धर्मे—इति १ पु॰ ।
¶¶ धर्मस्कन्धत्वादैवगत्येति १ पु॰ ।

तेन विवक्षितोऽसौ स्वाध्याय इति प्रदर्शनीयमित्यर्थः । ननु पुरुषार्थत्वाच्च-
द्धर्मविचारो ऽध्ययनेनैव तत्सिद्धेः किं धर्मविचारेणेति नेत्याह नचाध्यय-
नमात्रादिति । अतो ना ऽथातःशब्दविरोध इत्याह अतो ऽध्ययनानन्तरमिति ।
किंच धर्म* शब्दस्य प्रधानत्वादथातःशब्दविरोधेपि धर्मविचार एव युक्त
इत्याह इति वदितुं धर्मग्रहणं युक्तमिति । पुरुषा हि धर्ममेव जिज्ञासन्ते
न वेदार्थम् तस्यापि धर्मत्वप्रयुक्तत्वादुपादानस्येत्याह यतो न वेदार्थेति ।
सामान्यग्रहणविशेषविप्रतिपत्तिपुरुषार्थसाधनत्वधर्म्मशब्दग्रहणैर्द्धर्मविचारपरं
प्रथमसूत्रमित्युक्तम् द्वितीयमपि सूत्रं तथैवेत्याह यत्पुनर्द्धर्मस्येति । धर्मल-   ४८   २३
क्षणपरं सूत्रमर्थात्प्रमाणप्रतिज्ञेति प्राभाकराः † मुखतः प्रमाणप्रतिज्ञा ऽर्थाद्धर्म-
लक्षणत्व ‡ मिति वार्त्तिककारीयाः । सर्वथाप्युभयं विवक्षितमिति । तत्र
वेदग्रहणे प्राप्ते सर्वो वेदो धर्मविषयो मा भूदिति चोदनामग्रहीदिति गम्यत
इत्याह तन्नूनमिति । ननु चोदनाग्रहणं § सर्ववेदस्य धर्मे प्रामाण्यपरिहाराय
न भवति किंत्वन्यदेव प्रयोजनमित्याह ननु चोदनाग्रहणस्येति ।   ४९   १

अयमर्थः । लिङादिशब्दव्यापारः पुरुषप्रवृत्तिलक्षणार्थभावनालक्षणभा-
व्यनिष्ठः स्वज्ञानकरणकः स्तुतिनिन्दार्थवादादिज्ञानेतिकर्त्तव्यताको लिङादिश-
ब्देनाख्यातत्व ‖ सामान्यादर्थभावना¶भिधायिनापि लिङ्विशेषेणाभिधीयमानः
शब्दभावनेति कथ्यते । शब्द एव वा प्रदर्शितांशत्रयविशिष्टः शब्दभावना
शब्दगुणो वा । सर्वत्र हि करणमितिकर्त्तव्यतानुगृहीतं भाव्यनिर्वृत्तिद्वारेणैव
भावनां प्रति करणं भवति तत्र शब्दभावनाविषयं ज्ञानं लिङादिशब्दजन्यं
प्रवर्त्तकज्ञानत्वात् । स्तुत्यादिज्ञानानुगृहीतं पुरुषप्रवृत्ति**निवृत्तिहेतुरिति भा-
व्यनिर्वृत्तिद्वारेण शब्दभावनां प्रति करण††मुच्यते । सा च शब्दभावना पुरुषप्र-
वृत्तिमुत्पादयन्ती तस्याः पुरुषार्थविषयत्वमन्तरेण नोत्पादयितुं क्षमते अपुरु-
षार्थे पुरुषस्याप्रवृत्तेः । ततश्चोदनाप्रयुक्तपुरुषप्रवृत्तेः समानपदोपात्तमऽपुरुषार्थं
धात्वर्थं भाव्यं विहाय पुरुषविशेषणमपि स्वर्गादिकं भाव्यत्वेनोपादाय धात्वर्थ-
करणिका प्रयाजादीतिकर्त्तव्यताका स्वर्गादिभाव्यनिष्ठा पुरुषप्रवृत्तिरर्थभावना
संपद्यते । तदेवंविधार्थभावनानिष्पत्तये शब्दभावनायाः प्रवर्त्तकत्वद्योतनाय
चोदनाग्रहणमिति ।

---

* शब्दशब्दो नास्ति १ पु० । † मुखतः–इति कृतं ३ पु० । ‡ त्वप्रत्ययो नास्ति ३ पु० ।
§ सर्वस्य वेदस्येति १ पु० । ‖ सामान्याकथं भावेति १ पु० । ¶ विधायिनाऽपीति २ पु० ।
** निवृत्तीति नास्ति १ पु० । †† करणमित्युच्यत–इति २ पु० ।

नैतत्सारम् अध्ययनविधिरित्यादिपरिहारः । तस्यायमर्थः । स्वाध्यायोऽध्येतव्य इति तव्यप्रत्ययव्यापारः शब्दभावनाऽध्ययने पुरुषप्रवृत्तिलक्षणार्थभावनाभाव्यनिष्ठा स्वविषयप्रवर्त्तकज्ञानकरणिका ऽध्ययनफलार्थवादादिविज्ञानेतिकर्त्तव्यताका भवति । सा च * पुरुषप्रवृत्तिलक्षणामर्थभावनामध्ययनकरणिकां स्वाध्यायभाव्यनिष्ठां प्राङ्मुखत्वादीतिकर्त्तव्यताकामुत्पादयति । सा च भाव्यस्य स्वाध्यायस्य फलवद्विज्ञानजननिमित्तत्वमन्तरेणार्थभावनामुत्पादयितुमसमर्था स्वाध्यायगतलिङादिशब्दाभिधेयक्रतुभावनानां स्वर्गादिविषयत्वं परम्परया कल्पयतीत्यध्ययनविधिसामर्थ्यादेव वेदस्य विशिष्टफलविषयभावनानां प्रतिपादकत्वं सिद्धम् । अतो वेदग्रहणेनैव भावनानां धात्वर्थं विहाय स्वर्गाद्यालम्बनत्वं सिध्यतीति । अपिच चोदनाग्रहणे वेदान्तानामर्थान्तर †परत्वाशङ्का स्यात्

४९ ७ तन्निवृत्तये वेदग्रहणमेव युक्तमित्याह अपिच वेदग्रहणमेवेति । संदेहान्तरमाह चोदनाग्रहणे हीति । ननु वेदाध्ययनानन्तरं धर्मविचारं प्रतिज्ञाय चोदनालक्षण इति ब्रुवन्वैदिकचोदनामेव ब्रवीति । न तच विशेषाभावात् । अनेन च सूत्रेण तथापि सर्वचोदनानन्तर्यं किं न स्यात् । प्रकारान्तरेण वैदिकचोदनानियममाह अथ वेदाधिकरण इति । ‡ लक्षणसूत्रे प्राप्तं वेदग्रहणं विहायान्यत्र कुर्वन्न § बुद्धिपूर्वकारी स्यादिति परिहरति सोऽयमभाणक इति । अतो वेदान्तानां धर्मपरत्वपर्युदासाय चोदनाग्रहणमित्याह ततश्चोदनाग्रहणादिति । तस्मात्सूत्रभाष्यवार्त्तिककाराभिप्रायेण ब्रह्मपरत्वमेव न धर्मपरत्वमित्याह तदेवं सूत्रकार इति । ननु तेषामेव कृत्स्नस्य वेदस्य धर्मे विनियोजकं वचनमस्तीत्याह ननु दृष्टो हि तस्यार्थ इति । सत्यम् । धर्मचोदनासूत्रप्रक्रमसामर्थ्यादुत्तरं सामान्यवचनं प्रकृतविशेष उपसंह्रियत इत्याह सत्यम् तत्प्रक्रमबलादिति । सामान्येन परिहारमभिधाय प्रत्येकमाह अपिच दृष्टो हीति । नन्वाम्नायशब्देन सकलवेदस्य धर्मावबोधे विनियोगः स्पष्ट इति चोदयति कथमिति । न विनियोगकार्त्स्न्यपरं भाष्यं किंत्वाम्नायस्यार्थसद्भावपरम् यथा रूपं प्रत्यक्षमित्युक्ते न सर्वप्रत्यक्षस्य रूपे विनियोगः किंतु रूपस्य प्रत्यक्षान्वयमात्रं कथ्यते तद्वदिति परिहरति वेदाध्ययनानन्तरमित्यादिना । अयोगव्यवच्छेद इति । वेदस्य

* पुरुषप्रवृत्तिलक्षणाऽर्थभावना भाव्यनिष्ठा स्वविषयभावनाऽध्ययनकरणिका स्वाध्यायभाव्यनिष्ठा प्राङ्मुखत्वादीतिकर्त्तव्यताकामुत्पादयतीति १ पु॰ ।

† परत्वशङ्केति १ पु॰ । ‡ लक्षणसूत्रेणेति १ पु॰ । § पूर्वेति नास्ति १ पु॰ ।

कर्मावबोधेनासंबन्धं निराकृत्य संबन्धः प्रतिपाद्यत इति । नान्ययोगव्यवच्छेद इति वेदस्यार्थान्तरसंबन्धो नास्तीति नाभिधीयत इत्यर्थः । ननु कर्मशब्दः प्रमेयमात्रपरतया धर्मब्रह्मणोरविशिष्टः किं न स्यादिति नेत्याह कर्मशब्देन चेति । क्रियायां विषयमात्रे च प्रसिद्धस्य शब्दस्य कुतः क्रियापरत्वमिति प्रकरणादित्याह यतस्तदवबोध इति । तस्मादित्युपसंहारः । यत्पुनरित्युक्तानुवादः । आनर्थक्यशब्देनाभिधेयाभावः प्रयोजनाभावो वा *भिधीयते न तावदभिधेयाभाव इत्याह तत्र यद्यानर्थक्यमर्थाभाव इत्यादिना । अर्थेति निष्प्रयोजनत्वमनूद्य दूषणमाह भवतु सो ऽरोदीदिति । ननु तेषामपि पूषा प्रपिष्टभाग इत्यादिसंसर्गेष्विव प्रयोजनं † कल्प्यतामिति नेत्याह एकवाक्यत्वादिति । नन्वधस्तात्समिधं धारयन्ननुद्रवेदुपरि हि देवेभ्य इत्युपरिधारणस्य पूर्वेणैकवाक्यस्य विधानवत्सप्रयोजनो विधिः कल्प्यतामिति नेत्याह कल्पयितुं चाशक्यत्वादिति । वेदान्तवाक्यान्यपि तर्हि प्रयोजनशून्यतया क्रियार्थानीति नेत्याह यानि पुनरपास्ताशेषाशिवमिति । अतः सूत्रं क्रियाप्रकरणपठितवाक्यविषयमित्याह अतः स्वयमपुरुषार्थत्वादिति । क्रियाप्रकरणपठितानामेव प्रयोजनशून्यानां स्तावकत्वेन क्रियान्वयो दर्शितो न वेदान्तानामित्यत्र लिङ्गमाह तथाच तद्विधान्येवेति । ‡ न वेदान्तवाक्यं किंचिदप्यर्थवादाधिकरणे क्रियाशेषत्वेनोदाहृतमस्तीत्यर्थः ।

[५० १; ,, ८]

यदपि केचिदिति प्राभाकराणां शास्त्रारम्भप्रकारं दर्शयति । अयमाशयः । अध्ययनविधिर्हि विचारं विदधाति । स च स्वाध्यायस्य फलपर्य्यन्ततामाकाङ्क्षन् वेदार्थविचारमेव विदध्यान्न धर्मविचारमिति । ननु सामान्यप्रतिपत्तिविशेषविप्रतिपत्तिभ्यां जिज्ञासितोऽर्थो विचारमर्हति न तथा वेदार्थ इति तत्राह किं तर्हि अधीतवेदस्येति । उद्भिदा यजेत पशुकाम इत्यत्र पशुकाममुद्दिश्य यागो विधीयते यागविधानं चोद्दिश्य पशुकामाधिकारः । किंचोभयमिति । तथा सत्त्रे यजमाना एवर्त्विज इति यजमानानुद्दिश्य ऋत्विग्भावो विधीयते किंवर्त्विज उद्दिश्य यजमानभावो विधीयत इत्यादिवचनव्यक्तिसंशयाद्विचार इति । अथातो धर्मजिज्ञासा । वेदार्थविचारो विषयः स कर्त्तव्यो वा § न वेति ‖ विचारः ।

---

* विधीयते-इति १ पु· ।   † कल्पतामिति १, २ ।   ‡ नशब्दो नास्ति १ पु· ।

§ वाशब्दो नास्ति ३ पु· ।   ‖ विचारे नेतीति तावदिति १ पु· ।

नेति तावत्प्राप्तम्। आलम्बनप्रमाणाभावात्। नन्वाम्नायालम्बनो विचारः स्यात्। न। अध्यापनविधिशेषतयाम्नायस्य * स्वार्थविवक्षाभावात्। कथम्। अध्ययनं तावदध्यापनविधिप्रयुक्तानुष्ठानत्वात्तच्छेषतामश्नुते। स्वाध्यायोप्यध्ययननिर्वृत्तिद्वारेणाध्यापन † निर्वृत्तिपरो विषनिर्हरणादिवाक्यवन्न स्वार्थविवक्षामर्हतीति के चित्। अन्ये तु स्वाध्यायविधिवाक्ये तव्यप्रत्ययेनापूर्वस्य प्रतिपादनात्तदङ्गता तावत्स्वाध्यायस्याधिगता। तच्च विहिताध्ययनस्य प्रयोजकत्वादध्यापनविधेः प्रथमावगतामपूर्वाङ्गतामनपाकृत्यैवाध्ययनेनाध्यापनं निर्वर्त्यत इति ततश्चापूर्वाङ्गत्वादविवक्षितार्थत्वाद्विचारानारम्भः प्राप्तः। तत्रारम्भणीयो विचारः। स्वाध्यायस्य विवक्षितार्थत्वात्। नन्वध्यापनविधिशेषः स्वाध्याय इत्युक्तम्। न। प्रयुक्तिमात्रेणाङ्गत्वानुपपत्तेः। नह्याधानमुक्तक्रतुप्रयुक्तिमात्रात् तदङ्गं भवति। ननु लिङ्गसंख्याप्रयाजादयः क्रतुविधिप्रयुक्तानुष्ठानास्तदङ्गतामश्नुवते न प्रकरणादिविनियोग ‡ प्रमाणसामर्थ्यादङ्गभावः। तदङ्गत्वाच्च तत्प्रयुक्तानुष्ठेयता। न तथेह विनियोगे प्रमाणमस्ति। नच प्रयुक्तिमात्रादङ्गतेति विशेषः। अतः स्वातन्त्र्याद्विवक्षितार्थः स्वाध्याय इति। यत्त्व § ध्ययनापूर्वाङ्गतेति तत्राप्यपूर्वस्य प्रयोजनाकाङ्क्षायां दृष्टे सत्यऽदृष्टकल्पनानुपपत्तेः। स्वाध्यायसामर्थ्यजन्यं प्रयोजनवद्विज्ञानं फलत्वेन कल्प्यते। ननु न नैयोगिकं तत् किंतु दृष्टसामर्थ्यजन्यं फलविज्ञानम्। सत्यम्। नैयोगिकफलस्यैव विज्ञानस्यानुष्ठानाङ्गतया पूर्वोपकारः कल्प्यते। अथवा ऽर्थे तात्पर्य्यं विज्ञानस्य नैयोगिकफलत्वाधीनमिति कल्प्यते। लौकिकतात्पर्य्यनिमित्तविवक्षाद्यभावात्। तदेवं विवक्षितार्थत्वाच्छास्त्र ‖ मारम्भणीयमिति।

तत्र वेदार्थविचारारम्भेपि न वेदान्तानाङ्गतार्थत्वमिति परिहरति

५० १३ तत्रापि न निखिलवेदार्थेति। वेदार्थोपाधिविचारेपि धर्मग्रहणसामर्थ्यात्तदेकदेशो विचारित इति भावः। ननु कृत्स्नाध्ययनविधिप्रयुक्तो विचारः कथमेकदेशविषयः स्यादिति चोदयति तत्कथमिति। परिहरति तथा सत्य ऽथात इति प्रतिवाक्याध्ययनविचारं विधिव्यापारभेदात्प्रयोजन ¶ भेदवशादेकदेशविचारेपि न विधिप्रयोज्यत्वविरोधः यथा चक्षुषा रूपं पश्येदिति विधिप्रयुक्त्या रूपैकदे-

* स्वार्थविवक्षायोगात् अध्ययनमिति १ पु०। † निवृत्तिविषयनिर्हरणेति १ पु०।
‡ प्रमाणेति नास्ति १ पु०। § अध्यापनेति १ पु०। ‖ आरम्भणीयमेवेति १ पु०।
¶ भेदेति नास्ति १ पु०।

शनीलदर्शनेपि तत्प्रयुक्तिर्न विरुध्यते तद्वदित्यर्थः । अन्यथा विध्यनुसारेण कृत्स्नवेदार्थविचारविवक्षायां धर्मग्रहणं न स्यादित्याह यतो न धर्म इति कृत्वेति । धर्मग्रहणस्य न वेदार्थैकदेशविचारपर्युदासः प्रयोजनम् किंतु वेदार्थस्य पुरुषार्थतासिद्धिः प्रयोजनमिति शङ्कते सत्यम् तथापि शास्त्रकाराणामिति । परिहरति एवं तर्हीति । धर्मशब्दस्य हि * वेदार्थे प्रयोगनिमित्तं वक्तव्यम् । † न तावद्रूढिः चैत्यवन्दनादावपि प्रयोगविप्रतिपत्तेः । अथान्वय‡व्यतिरेकसिद्धः श्रेयःसाधनाभिधायी धर्मशब्दः । तथाभूतत्वाद्वेदार्थस्यापि § धर्मशब्दः तत्र प्रवर्त्तत इति । एवं तर्हि स्वाध्यायपाठादेव ब्रह्मणः प्रतीयमानस्य धर्मशब्दाभिधेयत्वाभावाच्छ्रेयोरूपत्वात्तस्यार्थात्पर्युदस्तत्वाद्धर्म इत्येवं कृत्वा विचारो युक्तः । अन्यथा ऽऽपातप्रतिपन्नधर्मब्रह्मसंग्रहज्ञापनाय वेदार्थजिज्ञासेति वक्तव्यमिति भावः । नह्यनुष्ठेयश्रेयःसाधनवदननुष्ठेयश्रेयोरूपमपि ब्रह्मपदान्वयमात्रादेव विचारात्प्राङ् प्रतीयत इति शक्यं वक्तुम् । लक्षणसूत्रमपि धर्म्मविषयं न वेदार्थविषयमित्याह तथाचोत्तरमपीति । लक्षणं हि लक्ष्यस्यान्यप्रसङ्गविभ्रमनिरासपरम् तत्र च धर्म एव चैत्यवन्दनादौ प्रसक्ततया विप्रतिपन्नो न वेदार्थः । अतो लक्षणस्य कृतार्थत्वाय धर्म || एव लक्ष्यत इत्याह धर्मस्वरूपविप्रतिपत्तिनिरासपरमिति । ननु वेदार्थेपि विप्रतिपत्तयः सन्ति किमर्थवादलक्षणो वेदार्थः किं वा चोदनालक्षण इति तन्निरासाय लक्षणमुच्यत इति तत्राह इतरथा वेदार्थविप्रतिपत्ताविति । मन्त्रादिषु कार्यस्याप्रतीतेर्येन यत्प्रतीयते स तस्यार्थ इतिनियमान्नैवं विप्रतिपत्तिरिति भावः । ननु धर्म्मग्रहणेऽप्यर्थवादलक्षणत्वं निराकृत्य चोदनालक्षणत्वं वेदार्थस्य किन्न सिध्यतीत्यत आह यतो न धर्मग्रहणे सतीति । वेदार्थविप्रतिपत्तिनिराकरणप्रतिभासाभावाद्धर्म्मविप्रतिपत्तिनिरासप्रतिभासादप्रतिपन्नवेदार्थविप्रतिपत्तिनिरासग्रहणायोगादित्यर्थः । अथ धर्मशब्दस्य वेदार्थे प्रयोगात् तद्विप्रतिपत्तिनिरास एव विवक्ष्यतामिति चोदयति कथमिति । तत्र न तावद्रूढिमाश्रित्य धर्मश-

(Margin: ५० १४ ; ,, २१)

---

* वेदार्थप्रयोगे निमित्तमिति १ पु० ।
† न तावद्भूरिः—इति १ पु० ।
‡ व्यतिरेकाभ्यां सिद्ध इति १ पु० ।
§ धर्मशब्द इति नास्ति १ पु० ।
|| लक्षित इत्याहेति १ पु० ।

ब्दस्य वेदार्थे प्रयोग इत्युक्तम् । नापि लक्षणया * अभिधेयादन्यस्य लक्ष्यत्वेन वेदार्थस्याधर्मत्वप्रसङ्गात् । इदानीं † स्वार्थप्रक्षेपेण वा तत्र प्रवृत्तिः शब्दमात्रस्य वा संज्ञासंज्ञिसम्बन्धपरतयोपयोग इति शिष्यते । तत्र न तावत्स्वार्थप्रक्षेपेणे-
५० २१ त्याह यत्तावच्चोदनालक्षणो योऽर्थ इति । चोदनालक्षणस्य धर्मत्वेऽभिधीयमाने धर्मस्य वा चोदनालक्षणत्वे वेदार्थस्त्वेतावानिति न निर्णीतं भवति । चोदना-धर्मशब्दयोर्वेदतदर्थाभिधायित्वाभावात् । यथा यच्चाक्षुषं तद्रूपमित्युक्ते न सर्वस्य प्रत्यक्षस्य रूपमर्थ इत्युक्तं भवति तद्वदिति भावः । चोदना-लक्षणोऽर्थे धर्मसंज्ञाविधिपरत्वं सूत्रस्य निराकरोति अथ पुनरित्यादिना । अङ्गीकृत्य दूषणमाह अथापि कथञ्चिदिति । अयं भावः । चोदना-लक्षणस्य वेदार्थत्वे ऽर्थशब्दस्य वैयर्थ्यं स्यात् । श्येनादीनामपि चोदनाल-क्षणत्वाद्वेदार्थत्वाच्च तद्व्यावृत्त्यनुपपत्तेः । अचोदनालक्षणत्वे वेदार्थत्वे च ताभ्यामेव श्येनादिनिवृत्तेरर्थशब्दस्य वैयर्थ्यं स्यात् । लक्षणवाक्ये ऽनुवाद-मात्रानुपपत्तेश्च प्रमाणप्रतिज्ञायामप्यर्थशब्दस्य वैयर्थ्यं स्यात् । धर्मविचारपक्षे श्येनादेः प्रतिषेधचोदनाविषयस्यानर्थत्वेनाधर्मत्वसिद्धिः प्रयोजनमिति । ‡ तथा चोदनाशब्दोऽपि कृत्स्नवेदलक्षणापरो वक्तव्यः । कथम् । चोदनाव्यतिरिक्तोऽपि वेदभागोऽस्ति § वा न वा । अस्ति चेत् चोदनालक्षणोऽर्थः चोदनार्थ इति ‖ लक्ष्य-लक्षणयोरैक्यमेव स्यात् । अस्ति चेत्सो ऽप्यर्थवान्वेदभागो निरर्थको वा । अर्थवांश्चेत्कथं चोदनाप्रमेयो ऽचोदनाभागस्यार्थः स्यात् । अर्थशून्यश्चेत् चोदनाव्यतिरिक्तो वेदभागः कथं तर्हि चोदनार्थो ऽर्थानर्थवद्भागद्वयसमुदाय-वेदार्थः स्यात् । तस्माच्चोदनाशब्दः कृत्स्नवेद ¶ लक्षणापर इति चोदनालक्षणो
५१ १ वेदार्थ इति वाक्ये शब्दद्वयदूषणमभिप्रेत्य अथापि कथंचिदित्युक्तम् । तथा सति वेदस्य प्रामाण्यादर्थवत्त्वनिश्चये विचारात्प्रागेव संजाते किं वेदार्थश्चो-

---

* गङ्गाशब्देन किं जहल्लक्षणा विवक्षिता उताऽजहल्लक्षणा· नाद्य इत्याह—अभिधेयादिति· गङ्गापदलक्ष्यस्य तीरस्य गङ्गात्वाभाववज्जहल्लक्षणायां धर्मपदेन लक्ष्यमाणस्य वेदार्थस्य धर्मत्वं हीयेतेत्यर्थः—इति तत्त्व० ।   † स्वार्थप्रक्षेपेण अजहल्लक्षणयेत्यर्थ इति तत्त्व० ।

‡ एवं गुरुमतेऽर्थशब्दवैयर्थ्यमभिधाय दोषान्तरं समुच्चिनोति तथेति—इति तत्त्व० ।

§ वाशब्दो नास्ति ३ पु० ।

‖ लक्ष्यलक्षणयोरैक्यमित्यस्यायमर्थः, धर्मशब्दाभिहितवेदार्थशब्देन चोदनालक्षणोऽर्थो निर्दि-श्यते चोदनालक्षण इत्यत्र स एव निर्दिश्यत इति लक्ष्यलक्षणयोरैक्यं स्यादिति—इति तत्त्व० ।

¶ लक्षणापर इति २ पु० ।

दनालक्षणः किं वाऽर्थवादादिलक्षण इति विशये नार्थवादादिलक्षणः किंतु चोदनालक्षणो वेदार्थ इति निर्णयपरं सूत्रं स्यात् तच्चानुपपन्नम् निश्चित-त्वादर्थवत्त्वस्येत्याह तथा सति चोदनालक्षण इति । ननु प्रथमसूत्रे स्वाध्याय- ५१ २ स्यार्थविवक्षायाः प्रदर्शितत्वादर्थवत्त्वनिश्चयात्तदुद्दिश्य लक्षणविधानं युक्तम् । न अनिश्चिते प्रामाण्येऽर्थविवक्षाऽयोगात् । तत्र चाध्ययनविधिप्रयुक्ता-प्रामाण्यमात्रनिराकरणेनार्थविवक्षादर्शिता न तु पौरुषेयत्वप्रमाणान्तरयोग्यवि-षयत्वादिनिमित्ताप्रामाण्यं तत्र निराकृत्य प्रामाण्यं व्यवस्थापितम् । तस्मा-दर्थवत्त्वानिश्चयाद्वेदार्थश्चोदनालक्षण इति नियन्तुं न शक्यते । अथ प्रथम-सूत्रसामर्थ्यादेवार्थवत्त्वमङ्गीकृत्य लक्षणविधानमिति तत्राह तत्रानन्तरं प्रामा-ण्यप्रतिपादनं न युज्येतेति । ननु तस्यैव दृढीकरणाय पुनःप्रतिपादनम् । न । अर्थवत्त्वे निश्चिते दृढीकरणप्रयोजनाभावात् । अनिश्चिते च लक्षणप्रवृ-त्त्यभावात् । ननु वेदप्रामाण्यस्यापि वेदार्थत्वादेव प्रतिपादनं न वेदस्यार्थव-त्त्वनिश्चयायेति । न वेदप्रामाण्यस्यापि वेदार्थत्वे सिद्धे वस्तुनि प्रामाण्यप्र-सङ्गात् । भाष्यकारश्च द्वितीयाध्यायमारभमाणो वृत्तं प्रमाणलक्षणमिति प्रथमाध्यायेन वेदस्य प्रामाण्यमेव साधितं दर्शयति तन्न युज्यते वेदस्यार्थव-त्त्व*निश्चयपूर्वे विचारेऽतो धर्मे प्रमाणप्रतिज्ञैव लक्षणं वा द्वितीयसूत्रेण क्रियत इत्याह वृत्तं प्रमाणलक्षणमिति चेति । किंच । अस्मिन्नेव सूत्रे मन्त्रार्थवादयो-र्धर्मे प्रामाण्यनिराकरणा† दर्थवादाधिकरणमनपेक्षितं स्यादित्याह मन्त्रार्थवा-देषु‡ वेति । स्तावकत्वेनान्वयप्रकारप्रतिपादनार्थमधिकरणमिति चेत् न । अत्रैव धर्मे प्रामाण्यनिराकरणाद्धर्मस्य प्रतिपादकतया तत्र पूर्वपक्षानुदयात् । उपसं-हरति अतः पूर्वोक्तेन न्यायेन कार्य्यनिष्ठ एव वेदभागो विचार्यतया प्रक्रान्तो विचारितश्च न वस्तुनिष्ठ इति अतो वस्तुतत्त्वनिष्ठं वेदभागं विचारयितुमि-दमारभ्यते§ अथातो ब्रह्मजिज्ञासेति ॥ ,, ७

॥ इति द्वितीयं वर्णकं समाप्तम् ॥

---

* निश्चयपूर्वविचारे—इति १ पु॰ ।

† आम्नायस्य क्रियार्थत्वादिति सूत्रम् ।

‡ वास्थाने चकारः १ पु॰ ।

§ अथातो ब्रह्मजिज्ञासेति सूत्रं तु प्रतीके न गृहीतं १ पु॰ ।

*तत्र लोके ऽथशब्दस्य चत्वारो ऽर्था वृद्धव्यवहारे प्रयोगसामर्थ्यात्प्रसिद्धाः आनन्तर्य्यमधिकारो मङ्गलाचरणं प्रकृतादर्थादर्थान्तरत्वं च। तत्र इतरपर्युदासेनानन्तर्य्यमथशब्देनोपादीयत इत्यस्मिन्नर्थे सति चानन्तर्यार्थत्व

५२ १ इत्यतः प्राक्तनभाष्यस्य तात्पर्य्यमाह तत्राथशब्द आनन्तर्यार्थ इत्यादिना। कथम्। जिज्ञासाशब्दस्यावयवार्थेनार्थवत्त्वे सतीच्छायाः कर्त्तव्यतया प्रारम्भानुपपत्तेः। प्रत्यधिकरणं चाप्रतिपाद्यत्वान्नाधिकारार्थोऽथशब्दः ब्रह्मज्ञानेच्छाया मङ्गलाचरणार्थत्वस्य प्रसिद्धतरत्वात्। अप्रसिद्धत्वेपि प्रशंसापरतया ऽर्थवादत्वप्रसङ्गात् सूत्रस्य न मङ्गलाचरणार्थता। इच्छायाश्च कुतश्चित्प्रकृतादर्थादर्थान्तरभावस्य प्रसिद्धतरत्वान्नाभिधानेन कृत्यमिति अथशब्दस्य न तदर्थतेति। नन्विच्छायाः कुतश्चिदानन्तर्य्यमपि प्रसिद्धम्। सत्यम्। हेतुफलभावेनानन्तर्य्यस्य विवक्षितत्वात् आनन्तर्य्याभिधानमुखेन पूर्वप्रकृतपुष्कलकारणमथशब्देनावद्योत्यते। ननु ब्रह्मज्ञाने प्रवृत्तिपर्यन्तेच्छोदयसामर्थ्यादेव पुष्कलकारणमनुमीयते किमथशब्देन। सत्यम्। इच्छोदयप्रभृतीष्यमाणज्ञानोदयपर्य्यन्तस्य कार्यस्य पुष्कलकारणतया पूर्वप्रवृत्तस्य शास्त्रीयस्याधिकारिविशेषणस्य प्रतिपत्तिपरत्वादथशब्दस्य न दोषः। † तत्प्रतिपत्तिश्चेष्यमाणज्ञाने प्रवृत्तिपर्य्यन्तेच्छोदयद्वारेण प्रवृत्त्यङ्गभावं भजत इति तेनानन्तर्याभिधानमुखेन प्रवृत्तिनिमित्तविशिष्टेच्छोदयप्रभृतेर्ज्ञानोदयपर्य्यन्तस्य कार्यस्य पुष्कलकारणतया पूर्वनिर्वृत्तसाधनचतुष्टयावद्योतनायानन्तर्यार्थो ऽथशब्द इति सूक्तम्।

ननु जिज्ञासाशब्दस्य विचारे रूढस्य कथमवयवार्थेनार्थवत्त्व‡मादीयते रूढिर्हि योगमपहरतीतिन्यायादित्याक्षिपति अयं तु जिज्ञासाशब्दो विचार-

,, १७ वचन इत्यारभ्योच्यत इत्यतः § प्राक्तनेन। ग्रन्थः स्पष्टार्थः। उच्यते नायं जिज्ञासाशब्दस्य इत्यादिः परिहारः। अयमाशयः। चत्वारः शब्दप्रवृत्तिप्रकाराः। तत्र रूढिः यथा वृद्धव्यवहारे ऽभिधानाभिधेयव्यतिरिक्तमनपेक्ष्यैव प्रयोगसामर्थ्यात् अखण्डाभिधानसम्बन्धः। योगः समासादिनैकपद्यमापन्नस्य

---

* अत्र लाके इति ३ पु॰।

† तत्प्रतिपत्तिरिति, यदिदं पूर्ववृत्तं पुष्कलकारणं तस्य शास्त्रीयत्वज्ञानाभावे निःसन्दिग्धा प्रवृत्तिर्न स्यात् शास्त्रपर्युदस्तत्वशङ्काया अपि संभवात्॰ तस्माच्छास्त्रीयाधिकारिविशेषणसमर्पणार्थत्वमथशब्दस्येत्यर्थ इति तत्त्व०।

‡ उपादीयत इति १ पु॰।

§ प्राक्तनो ग्रन्थः स्पष्टार्थः इति ३ पु॰।

शब्दस्य स्वावयवगतानेकाभिधानशक्तिद्वारेण विशिष्टार्थाभिधानम् । एतच्चोभयं मुख्यं वृत्तिरित्युच्यते । गौणः स्वाभिधेयादर्थादर्थान्तरे* लक्षणया वृत्तिरिति । तत्रैकस्यैव शब्दस्यार्थान्तरे रूढस्यार्थान्तरे च योगवृत्तिसम्भवे रूढिर्योगमपहरतीतिन्यायेन योगं परित्यज्य रूढिरुपादीयते । † रूढियोगमुख्यवृत्तिसम्भवे गौणः परित्यज्यते । तत्रैकस्मिन्नर्थे शब्दस्य योगवृत्तिसम्भवे तत्रैव तस्यैव शब्दस्य शक्त्यन्तरकल्पनानिमित्तकार्यान्तराभावात् । ननु पङ्कजशब्दादिषु योगरूढिरिति वृत्त्यन्तरम् वा कल्प्यत इति । न । तत्रापि योगवृत्त्यैवार्थप्रतिपत्तेः । ननूत्पलादिवस्त्वन्तरम् विहाय पङ्कजशब्दाज्झटिति तामरसे प्रतिपत्तिदर्शनाच्छक्त्यन्तरमेव कल्पनीयम् । न । प्रयोगबाहुल्यादपि सामर्थ्याविशेषे प्रथमप्रतिपत्तिदर्शनात् । यथा नवस्वऽर्थेषु शक्त्यऽविशेषेपि गोशब्दात्सास्नादिमदाकृतौ प्रयोगबाहुल्यादेव प्रथमप्रतिपत्तिः । तस्मात् क्लृप्तसामर्थ्यादेव प्रयोगप्रतिपत्तिसम्भवे न शक्त्यन्तरकल्पनेत्याह नायं जिज्ञासाशब्द इति । कथमित्यतः प्राक्तनो ग्रन्थः स्पष्टार्थः । ५२   १७

नन्ववयवार्थसंसर्ग एव योगवृत्त्याऽपि शब्देन प्रतिपाद्यते विचारस्तु न जिज्ञासाशब्दावयवार्थः । कथं तदवगमस्य क्लृप्तसामर्थ्येनैवान्यथासिद्धिरिति चोदयति कथमन्यथासिद्धत्वमिति । स्वयमवयवार्थत्वाभावेप्यवयवार्थसंसर्गाविनाभावादपि तल्लक्षणया प्रयोगप्रत्ययोपपत्तौ न शक्त्यन्तरकल्पना ऽनन्यथासिद्धकार्याभावादिति परिहरति अन्तर्णीतविचारार्थत्वादिति । ननु ज्ञानमात्रमिष्यमाणं कथं विचारेणाऽविनाभूतमिति तदाह तथाहीति । किं तत्र प्रमाणमिति तदाह एवं प्रयोगप्रत्यययोरिति । ज्ञानं खल्विष्यमाणं विषयेण सहावगतमिष्यते अनवगतविषयेच्छायोगात् । ततश्च प्रतिपन्ने वस्तुनि ज्ञानमिष्यमाणं संदिग्धे निश्चयफलं वा परोक्षे ऽपरोक्षफलं वेष्यते । तच्चोभयं प्रमाणादिविचारप्रयत्नसाध्यमिति प्रतिपन्ने वस्तुनि विशिष्टज्ञानमिष्यमाणं प्रमाणादिविचारमविनाभावेन गमयतीति विचारसाध्यज्ञाने प्रयोगप्रत्ययावित्यर्थः । ननु नेच्छामात्रं सूत्रेण प्रतिपाद्यते प्रयोजनाभावात्किंत्विष्यमाणज्ञानप्रदर्शनमुखेन   ,,   २२

---

* गुणलक्षणयेति ३ पु॰ ।

† रूढिश्च योगश्चेति रूढियोगौ, तावेव मुख्यवृत्ती तयोः संभव इति विग्रह इति तत्त्व॰ ।

तत्साधनं विचार*मन्तर्णीतमुपलक्ष्य स एव तात्पर्य्येण प्रतिपाद्यते अतो विचा-
रज्ञानब्रह्मणामन्यममस्य तात्पर्य्येण प्रतिपाद्यस्यारम्भायाऽथशब्द इति चो-
५३ १ दयति नन्वेवमपि कुत एतदिति । तदेव प्रपञ्चयति अन्तर्णीतं विचारमा-
श्रित्येति । अर्थलक्षणेन प्राधान्येनान्तर्णीतं विचारमाश्रित्येति सम्बन्धः ।
अतस्त्रयाणामन्यतमस्याधिक्रियमाणत्वमङ्गीकृत्येति योजना । तत्राथशब्देना-
नन्तर्याभिधानमुखेन शास्त्रीयसाधनचतुष्टयसंपन्नाधिकारिविशेषस्य न्यायतः-
समर्पणाभावे विचारारम्भार्थत्वे च कर्त्तव्यतया विधीयमानो विचारो निरधि-
कारो ऽननुष्ठेयः स्यादिति परिहरति उच्यते शास्त्रस्यानारम्भप्रसङ्गादिति । ननु
विचारविधिरेव विश्वजिन्न्यायेना † ऽधिकारिविशेषं कल्पयित्वा प्रवृत्तिपर्य्यन्तो
भविष्यति किमथशब्देनेति । ननु कर्त्तव्यतया ‡ वगतो विचारोपि प्रारम्भमर्था-
द्गमयति किं § विचारप्रारम्भार्थेनाथशब्देन । ननु विधिसामर्थ्यादुभयप्राप्तौ क-
स्तत्र निर्णयः विध्यपेक्षितोपाधित्वादानन्तर्याभिधानमुखेनाधिकारिसमर्पणमेव
युक्तमित्याह अधिकारार्थत्वे ह्यप्रयोजनमिति । प्रवृत्तिद्वारेण ‖ प्रयोजनपर्य्यन्त-
ताशून्यमित्यर्थः । ननु मोक्षकामः कल्प्यते । न । प्रसज्यप्रतिषेधप्रसङ्गात् ।
तथाहि । कर्त्तव्य इत्युक्ते ऽविशेषात्सर्वाधिकारप्रतिपत्तौ तदनुपपत्त्या विशिष्टा-
धिकारः कल्पनीयः ततो वरं शब्देनैव विशिष्टाधिकारिसमर्पणमिति भावः ।
ननु रात्रिसत्रन्यायेनार्थवादगतमेव मोक्षं ब्रह्मज्ञानं वा प्रयोजनं साध्यत्वेन
परिणमय्य मोक्षकामो ब्रह्मज्ञानकामो वा विचारयेदिति विधिप्रतिपत्तिसमये-
" ७ ऽधिकारिविशिष्टविधिप्रतिपत्तेर्न्न प्रसज्यप्रतिषेध इति चोदयति ननु ब्रह्मज्ञानं
प्रयोजनमिति । तत्रेदं वक्तव्यम् किं सर्वेषां फलकामितया सर्वाधिकारं शास्त्रमु-
च्यते किंवा विशिष्टाधिकारमिति । विशिष्टाधिकारत्वे विधिप्रतिपत्त्यधीनत्वा-
दर्थवादसामर्थ्यलभ्याधिकारिकल्पनायाः प्रसज्यप्रतिषेधव्यापारगौरवं तदवस्थ-
मेव । अतोथशब्देन श्रोतव्यादिविधिप्रकरणपठितसाधनचतुष्टयसम्पन्नाधिका-
रिप्रतिपत्तिपूर्वके विचारविध्यवगमे नासौ दोष इत्यथशब्देन श्रोतविशेषाधि-
कारिसमर्पणमेव युक्तमिति । अथ सर्वाधिकारं शास्त्रमिति न प्रसज्यप्रति-

---

* अन्तर्नीतमिति १ पु॰ प्रायः ।
† अधिकारविशेषमिति २, ३ पु॰ ।
‡ अवगते विचारेऽपीति शोधितं १ पु॰ ।
§ विचारे प्रारम्भेति १ पु॰ ।
‖ फलार्थपर्यन्तताशून्यमिति ३ पु॰ ।

षेधः नापि विशेषाधिकारिसमर्पको शब्दापेक्षेति । तच्च वक्तव्यम् । किं फलतः सर्वाधिकारं शास्त्रं किं वा विधितः । न तावत्फलतः सर्वेषां * फलार्थिताऽभावादित्याह न ब्रह्मज्ञाने ऽर्थित्वानुपपत्तेरिति । मा भूद् ब्रह्मज्ञानार्थितेत्यतः ५२ ७ प्राक्तनो ग्रन्थः स्पष्टार्थः ॥

नन्वध्ययनविधेस्त्रैवर्णिकाधिकारत्वात्तत्प्रयुक्तत्वाच्च विचारस्य विधित एव सर्वाधिकारं शास्त्रमिति चोदयति मा भूद् ब्रह्मज्ञानार्थितेति । ननु विधिर्नाम स्वविषयस्य तदुपकारकस्य वा ऽनुष्ठाननिमित्तं भवति । नच विचारो ऽध्ययनविधेर्विषयस्तदुपकारको वा तत्कथमध्ययनविधिविधेयो विचार इति तत्राह स्वाध्यायाध्ययनस्यार्थावबोधफलत्वादिति । अयमाशयः । ,, २१ दृष्टफलस्याध्ययनविधेर्यावदर्थावबोधफलं व्यापाराद्विचारमपि फलनिष्पत्तये ऽध्ययनविधिरनुष्ठापयतीति । ननु विषयतदुपकारिव्यतिरिक्तस्य व्यापारस्य फलनिष्पत्त्यपेक्षया विधिप्रयुक्तानुष्ठेयत्वं क्व दृश्यते । अवघातादिष्विति चेत् । न । विधेयावघातस्यैव फलपर्य्यन्तमावर्त्यमानत्वात् विचारस्तु स्वतन्त्रमेव भावार्थान्तरं कथं विधीयत इति वक्तव्यम् । नैष दोषः । आवृत्तिगुणस्याविहितस्य विहितानुपकारकस्य च विधेः फलपर्य्यन्ततानुपपत्त्या विधेयत्वकल्पनवद्विचारस्यापि तदुपपत्तिरिति । तत्र किं विचारसाध्यज्ञानमर्थनिश्चयफलमध्ययनस्यान्वयव्यतिरेकसिद्धं दृष्टफलम् किं वा तदुद्देशेन विधानादधिकारिविशेषणतया शास्त्रीयं फलम् किं वा विधेः प्रयोजनपर्य्यन्ततासामर्थ्यलभ्यं फलमिति । न तावद् दृष्टं फलम् । अध्ययनमात्रादावृत्तिगुणकादप्यर्थनिश्चयानुदयात् आपातदर्शनस्य च विचारानपेक्षत्वात् । अतो नार्थनिश्चयदृष्टफला ऽध्ययनक्रिया स्यादिति । ननु तव्यप्रत्ययेन स्वव्यापारः शब्दभावनाविधिरूपतया ऽभिधीयते सा च शब्दभावनाध्ययनकरणिकामर्थभावनां निष्पादयन्ती फलवदर्थावबोधं पुरुषार्थमर्थभावनाभाव्यत्वेन कल्पयति अपुरुषार्थे पुरुषप्रवृत्त्ययोगात् । ततश्च भाव्यान्तरलाभात्समानपदोपात्तमध्ययनं भावनायाः करणतामापन्नं भाव्यस्यार्थावबोधस्य निर्वर्त्तकतया करणं भवति । कुठारादीनामपि क्रियाभाव्यद्वैधीभावनिर्वर्त्तनद्वारेण छिदिभावनाकरणत्व-

---

* फलार्थित्वाभावादिति १ पु॰ ।

दर्शनात् । अतो ऽध्ययनविधेः प्रवर्त्तकत्वान्यथानुपपत्त्यैवार्थभावनाकरणस्याध्ययनस्यार्थावबोधः फलमिति सिद्धम् अन्यथासमानपदोपात्तस्याध्ययनस्यैव भाव्यतया स्वाध्यायावाप्तेरपि विधिफलत्वाभावप्रसङ्गादित्यत आह सा

५३ २३ ह्यधीयमानावाप्तिफलत्वादक्षरग्रहणान्तेति । अयमाशयः । तव्यप्रत्ययेन भावनाकर्मकारके ऽभिधीयमाने स्वाध्याये स्वावाप्तिफले च न भाव्यान्तरं कल्पनीयम् भावनाकर्माभिधायिशब्दविरोधादिति । ननु न भाव्यमात्रेण पुरुषप्रवृत्तिर्विधिना जन्यते किन्तु पुरुषार्थभाव्यापेक्षयैव ततश्च शब्दविरोधेऽपि भावनानिष्पत्तये ऽर्थावबोधो भाव्य इति शङ्कते अथाक्षरग्रहणं *निष्प्रयोजनमिति । परिहरति भवतु तर्हि सक्तूनां गतिरिति । अयमाशयः । अर्थनिर्णयस्याध्ययनमात्रादनिष्पत्तेः श्रूयमाणस्य स्वाध्यायस्य चाफलत्वादध्ययनमात्रस्य चाप्रयोजनतया भाव्यत्वायोगात्स्वाध्यायाध्ययनेन स्वर्गं भावयेदिति कल्प्यत इति ॥

ननु व्याकरणस्याप्यङ्गत्वात् †साङ्गादध्ययनाद्विधीयमानादर्थनिश्चयो दृष्टफलतया जायते तस्य च विरोधपरिहाराय विचारः प्रयुज्यते अतो दृष्टे सत्यऽदृष्टकल्पना न न्याय्येति चोदयति तदपि न अक्षरेभ्यः प्रयोजनवदिति । परिहरति न तर्हि निष्प्रयोजनानीति । श्रूयमाणस्वाध्यायलक्षणात्कर्मण एवाध्ययनभावनया ‡भाव्यमानात्फलवदर्थावबोधसिद्धेः पश्वन्नादीनां प्रयोजनं प्रति परम्परया साधनानामपि भाव्यत्वदर्शनाच्छ्रूयमाणस्वाध्यायावाप्तिपर्य्यन्त एव विधिव्यापार इति भावः । नन्वक्षरग्रहणपर्यन्ते विधिव्यापारे फलवदर्थावबोधस्य निर्निमित्तता स्यादिति

५४ ४ तत्राह फलप्रयुक्त एवार्थावबोध इति । अयमाशयः । लौकिकाप्तवाक्यानां विधिमन्तरेणापि फलवदर्थावबोधकत्वदर्शनात्साङ्गाच्च कर्मणो विधायमानादवघातानिष्विवादृष्टजन्मनियमान्न विधिफलमर्थावबोधः किंतु स्वीकृतस्वाध्यायमात्रजन्यं फलमिति । विधेस्तु दृष्टसमवाय्यदृष्टमेव किंचित्फलमिति दृष्टफलाविरोधेनादृष्टसिद्धौ न तद्विरोधिस्वतन्त्रादृष्टं कल्पयितुं युक्तमिति । किंच । फलवदर्थावबोधफले ऽध्ययनविधौ यस्य यस्मिन्कर्मण्यधिकारस्तस्य

---

* निःप्रयोजनेति १, २ पु० । † साङ्गाध्ययनादिति ३ पु० ।
‡ भाव्यमानत्वादिति ३ पु० ।

तद्वाक्याध्ययनमेव स्यात् न वाक्यान्तराध्ययनम् तच प्रवृत्त्यादिफलाभा-
वादिति न कृत्स्नवेदाध्ययनसिद्धिरित्याह अपिच अक्षरग्रहणान्तो विधिरिति । ५४ ४
ननु कृत्स्नस्वाध्यायाध्ययनस्य नित्यतया विधेयत्वेपि सकलस्वाध्यायावाप्ति-
समवेतस्यादृष्टस्यानधिकृतकर्मवाक्यगतस्यार्थावबोधानुष्ठानादिद्वारेण कथमपू-
र्वसिद्धिहेतुतेति । नैष दोषः । प्रायश्चित्तजपाद्यपूर्वोपकारित्वोपपत्तेः । नन्व-
ध्ययनादक्षरावाप्तेः को विशेषः । अस्त्यत्र विशेषः । स्वाधीनोच्चारणक्षमत्वं
नामाक्षरधर्मो ऽवाप्तिः तदर्थो वाङ्मनसव्यापारो ऽध्ययनमिति ॥

नन्वधिकारिविशेषणमर्थावबोधमुद्दिश्याध्ययनं विधातव्यम् निरधिका-
रविधानायोगात् अर्थावबोधमुद्दिश्यैव च विहितशब्दोच्चारणे सति वाक्यता-
त्पर्य्यसिद्धेरर्थावबोधमुद्दिश्य रागप्रयुक्तशब्दोच्चारणे लोके तात्पर्यदर्शनादिति
चोदयति ननु चाश्रूयमाणाधिकारो ऽध्ययनविधिरिति । अधिक्रियते ऽस्मिन्क-
र्मण्यनेनेत्यधिकारो विधिपुरुषसंबन्धनिमित्तं जीवनकामादिरुच्यते । ननु वि-
श्वजिन्न्यायेनाधिकारी कल्प्यताम् अथवा वाजसनेयिनां ब्रह्मचर्य्यमागामित्या-
दिनोपनयनस्य प्रकृतत्वादुपनीतो ऽधिकारीति प्रकरणप्रमाणेन कल्प्यतामिति
नेत्याह दृष्टश्चाक्षरग्रहणे ऽर्थावबोधः स कल्पनामधिकारस्य * निरुन्धन्नित्या-
दिना । भवतु नामाध्ययनेनार्थावबोधं भावयेदर्थावबोधकाम इति विधिः तथापि
विचारेणार्थावबोधं भावयेदिति विचारे प्रवृत्तिरध्ययनविधिना न विधीयत
इति तत्राह दृष्टाधिकारेषु प्रत्यक्ष इति । तत्र किमर्थसामर्थ्यादेवाध्ययनस्या-
र्थावबोधः साक्षाद्वा परम्परया वा फलमित्युच्यते किं वार्थावबोधकाममुद्दिश्य
विधानत इत्यभिप्रेत्याह । अत्रोच्यत इति प्रथमः कल्पोऽङ्गीकृत इत्याह
भवेदध्यनविधेरिति । द्वितीयः पक्षो ऽनुपपन्न इत्याह नाधिकारहेतुतेति । ,, १३
अध्ययनात्प्रागर्थावबोधस्याप्रतिपन्नस्य कामनायोगान्नार्थावबोधकाममुद्दिश्य
विधानमित्यर्थः । ननु कथमर्थावबोधस्या ऽप्रतिपत्तिरध्ययनात्प्राग्वेदार्थस्या ऽप्र-
तिपत्तेः † विशेषणापरिज्ञाने तद्विशिष्टावबोधानवगमात् । ननु ‡ वेदस्य वाक्य-
प्रमाणत्वादाप्तवचनवदर्थो विद्यत इत्यर्थसद्भावमात्रमनुमानेनावगम्यते । न ।
अर्थवत्त्वज्ञानमात्रस्यानुमानसिद्धत्वात्तज्ज्ञानकामना ऽयोगात् अग्निहोत्रादिवि-

---

* निरुन्धन्निति २ पु॰ । † नाऽगृहीतविशेषणाविशिष्टबुद्धिरितिन्यायादित्यर्थः—इति तत्त्व॰ ।
‡ वेदस्यापीति । ३ पु॰ ।

शिष्टवाक्यार्थानामप्रतिपन्नतया तद्विशिष्टज्ञानकामनाऽयोगात् । उपदेशत एवा-
ग्निहोत्रादिवाक्यार्थविशेषाः प्रतिपन्ना इति चेत् । तर्हि वाक्यार्थविशेषज्ञाना-
नामपि सिद्धत्वान्न तत्र कामना सम्भवेत् । अथौपदेशिकज्ञानस्याप्रमाणत्वा-
न्निर्णयज्ञानं काम्यत इति चेत् । अप्रामाण्ये निश्चिते न तत्र निर्णयज्ञानका-
मना अर्थस्य विभ्रममात्रत्वात् । औपदेशिकज्ञानस्य सन्दिग्धे प्रामाण्यविचार-
स्यैवावसरो नाध्ययनस्य । किंच । सर्ववाक्यार्थज्ञानानां युगपदेकबुद्ध्योद्देशना-
सम्भवात्सामान्येनोद्दिश्य शब्दोच्चारणायामर्थमात्रज्ञाने शब्दस्य तात्पर्य्यप्रस-
ङ्गादग्निहोत्रादिविशेषज्ञाने तात्पर्य्याभावाद्वाक्यशक्त्यनुसारेण विशिष्टार्थे तात्प-
र्यकल्पनायार्थज्ञानमुद्दिश्याध्ययनविधेस्तात्पर्य्यानिमित्तत्वप्रसङ्गात् । तस्माद्वि-
१४ शेषज्ञानानां प्रागसिद्धत्वान्न तत्काममुद्दिश्य विधानमित्याह प्राक् चाधिकार-
ज्ञानेन प्रयोजनमिति । किंचोद्दिश्यविधानेऽपि नाध्ययनमात्रादृष्टफलतया
ऽर्थावबोधसिद्धेरदर्शनादित्याह अतो न विधेरिति । नन्वर्थावबोधमुद्दिश्य
शब्दोच्चारणायां तात्पर्यं लोके दृश्यते । न तावच्छ्रोतुरुच्चारणातात्पर्यं
नेमित्तम् लोके तदभावात् । न* वक्तुरुच्चारणा वेदे ऽपौरुषेये तात्पर्याभावप्र-
सङ्गात् । तस्मात्स्वभावत एवार्थप्रतिपादनसमर्थस्य शब्दस्य पुरुषसम्बन्धकृ-
तदोषपरिहारायार्थज्ञानमुद्दिश्य शब्दोच्चारणापेक्ष्यते तात्पर्यमपि शब्दधर्म
एव षड्विधलिङ्गगम्यो न पुरुषधर्म इति वक्ष्यते ॥

इदानीमध्ययनविधेर्नित्याधिकारतां प्रतिपादयितुमधिकारिविशेषणा-
भावादनध्ययनमेवेत्यध्ययनप्रवृत्तिमाक्षिपति यद्येवमधिकाराश्रयणादिति ।
तत्र विधिर्हि स्वविषये प्रवर्त्तकतया प्रतिपन्नस्तदन्यथानुपपत्त्या ममायं नियोग
इति प्रतिपद्य प्रवृत्तिसमर्थमधिकारिणं कल्पयति । यदा तु पुनर्विधिविषयस्य
निमित्तान्तरादनुष्ठानं सम्पद्यते तदा विधेः प्रवर्त्तकत्वं प्रतिबध्यते । प्रतिब-
द्धप्रवर्त्तकभावश्च विधिः प्रवृत्तिसिद्धये न स्वामिनमधिकारिणं कल्पयित्वा
प्रवर्त्तयति । तत्राध्ययनविधिरपि स्वविषयस्याध्ययनविधिप्रयुक्तानुष्ठानत्वात्स्वयं
प्रतिबद्धप्रवर्त्तकभावो नाधिकारं कल्पयित्वा प्रवर्त्तयतीति प्राभाकराः प्रत्यव-
तिष्ठन्त इत्याह अत्र केचिदाहुरिति । नन्वष्टवर्षं ब्राह्मणमुपनयीत तमध्याप-

---

* ननु वक्तुरुच्चारणे—इति ३ पु° ।